  सुकीर्तिनीरैः समसिंचि येन ॥ १०* ॥

प्रम[क्रमु]क्रामयहेम ० ११ ॥

उद्धरणं शुद्धरणं संहरणं विद्विषां समुद्धरणं ।
सुहृदां पुरातनहृदां नमतितम (मां Bh.) को न नाम
[तसुमाना (! तमनामः Bh.) ॥ १२ ॥

सौंदर्येण विजृंभिणा रति[पति]: शौर्येण श्रीपतिः
  गांभीर्येण सरित्पतिर्विलसता धैर्येण भूभृत्पतिः ।
सत्कीत्योड्र(l. डु)पतिः श्रिया धनपतिर्यस्तेजसाहर्पतिस्
  तेनार्योद्धरणेश्वरेण सुमतिः स्पर्धेत कः क्ष्मापतिः ॥ १३† ॥

* Bh. gives verses 9 and 10 in the order 9*a*, 10*a*; (10*b*), 9*b*. His reading of our 10*b* is:

भल्लीशतप्रोतशकेशकुंभीकुंभास्रनीरैः समसिं(से)चि येन ।

† The MS. numbers both half-verses (13 and 14); hence the next verse 15, etc.

यस्य(? l. स्या)यसाधाहितसत्प्रतापः
  स्वसंनिवेशोचितभव्यदेशं ।
सध्यास्त सिद्धान(? l. स्त)समस्तशक्रा
  स्पदं पुरं सादरमेकचक्रं ॥ १४ ॥ ०

यस्योपकंठे सितिकंठकंठ-
  स्पर्धिप्रभा भानुसुता वहंती ।
तदुच्चवेदध्वनिसंनिकर्षाद्
  अभ्यस्यतीवाखिलपावनत्वं ॥ १७ ॥ ०

पुरं शशासैव पुरंदराभस्
  तदैकचक्राख्यमनेकचक्रः ।
असंख्यसंख्यारिजयोर्जिताख्य-
  चिख्यासु (!) येनोद्धरणक्षितीशः ॥ २३ ॥

समुद्रैरपि यः सप्तसमुद्रैः संयुतां महीं ।
पालयंस्तन्महीपालः पुरालंकुरुते पुरं ॥ २४ ॥

गुणरत्नाकराच्चंद्रश्चंद्रसेनस्ततो ऽभवत् ।
महा महा स देवस्य शालिमौलिविभूषणः (!) ॥ २५ ॥

यस्य विश्वोपकाराय सदा सत्युद्यते करे ।
शशंके धनदः स्वैरं चकंपे कनकाचलः ॥ २६ ॥ ०

तस्यात्मजो ऽभूच्चरितार्थजन्मा
  श्रीसूर्यसेनो जयति क्षितींद्रः ।
सुदर्शनेनैव बिभर्ति गोपी-
  नारायणत्वं भुवि यः प्रसिद्धं ॥ ३० ॥ ०

चकास्ति यस्यातिनलप्रतापः
  प्रतापसेनो ऽवरजः प्रसिद्धः ।
भक्त्याभिरामस्य सदाग्रजस्य
  यो लक्ष्मणाकारमुपैति भद्रं ॥ ४० ॥

औदार्यसौंदर्यदयानयाज्ञा
  विज्ञानशौर्यादिगुणेषु नान्यं ।
प्रतापसेनस्य समं समंतात्
  लोके विलोके ऽत्र विचित्रलोके ॥ ४१ ॥

श्रीदेवसेनस्तनयो ऽपि गोपी-
  नारायणस्याजनि कामरूपः ।
लब्धप्रसादेन महेश्वरस्य
  ममारतिस्तुष्टिमुपैति यत्र ॥ ४२ ॥

देवसेनकुमारस्य कुमारस्य च नांतरं ।
आर्यानंदकृतो नित्यं विधाणां शक्तिमुत्तमां ॥ ४३ ॥

श्रीसूर्यसेनः पुरमेकचक्रं
वरांगमध्यास्य जयत्यजस्रं ।
यमन्यकीर्तं जितनाककीर्तं
गुर्वीयमुर्वीव सदोर्विरास्ते ॥ ४४ ॥
विद्वत्सु सत्स्वपि महत्सु समाश्रितेषु
श्रीसिद्धलक्ष्मणसुतः सुतराममुष्य ।
श्रीसूर्यसेननृपते[र्निजते]जसो ऽभूद्
अल्लाडनाथमतिमानतिमानपात्रं ॥ ४५ ॥ ०
अगाधग्रंथपयोधिं तथालोड्य मया [धिया] ।
समुद्धृतं नृपादेशान्नेदं निर्णयामृतं ॥ ४७ ॥
मनुस्मृतिं विष्णुपराशराप-
स्तंबस्मृतीर्वीक्ष्य मिताक्षरां च ।
तथापरार्कार्णवपारिजातान्
स्मृत्यर्थसारं स्मृतिचंद्रिकां च ॥ ४८ ॥
मात्स्यं कौर्मं वाराहं च दृष्ट्वा वैष्णववामने ।
मार्कंडेयपुराणानि भविष्योत्तरभारते ॥ ४९ ॥
[परिशिष्टं हेमाद्रेरनंतभट्टीयगृह्यपरिशिष्टे ।
कालादर्शं चिंतामणिं त्रिदंडीं च कृत्यकल्पतरुं ॥ ५० ॥]
सकलपुराणसमुच्चयदुर्गोत्सवरामकौतुकानि तथा ।
संवत्सरप्रदीपं सभोजराजीयदेवदासीयं ॥ ५१ ॥
रूपनारायणीयं विद्याभट्टपद्धतिं विततां ।
वीक्ष्य महादेवीयं शुभं निबं[धं] च विश्वरूपकृतं ॥ ५२ ॥
श्रीसूर्यसेननृपतेरादेशात्सिद्धलक्ष्मणतनूजः ।
अल्लाडनाथसूरिः संग्रहमिह कालनिर्णयं कृतवान् ॥५३॥

इति ग्रंथावतारं ॥ अथानुक्रमणी ॥
ग्रंथे श्रीसूर्यसेनस्य निर्णयामृतसंज्ञके ।
आदावस्मिन्नुदाहारः कथितः प्रथितः क्रमः ॥

*Śloka* 50, omitted by the present MS., is found in other MSS., viz. Weber, Cat. Berl., no. 1170; Bhandarkar, Rep., p. 351; Burnell, Tanjore MSS., p. 130*b*.

For other MSS. see Rāj. Mitra, Notices, I., p. 151; IV., p. 285; also Cat. of Bikāner MSS., p. 426 ('written by *Gopīnārāyaṇa*, under the auspices of the King *Sūryasena*,' but beginning and ending differently).

Ch. I., *sāmānyatithinirṇayaprakaraṇa* ends fol. 16*b*; II., *sakalatithinirṇaya* (calendar of fasts and feasts), fol. 94*b*; III., *śrāddhanirṇaya-prakaraṇa*, fol. 129*a*; IV., *āśaucaprakaraṇa*, ends:

कूष्मांडमंत्रके घृतं हुत्वा विप्राय गां दत्त्वा पंचगव्यं प्राश्य शुद्धः । सूतकी आवश्यकं विवाहादिमंगलं कुर्यात् ॥ इति मंगलं ॥

इति श्रीसूर्यसेनमहामहींद्रविरचिते निर्णयामृते आशौचप्रकरणं समाप्तं ॥

श्रीसूर्यसेनभूभृद्विमलयशःक्षीरसागरादुदिते ।
इति निर्णयामृते ऽस्मिन्नाशौचप्रकरणनिर्णयो जातः ॥ १ ॥
श्रीमत्पंडितलक्ष(सिद्ध fol. 16*b*)लक्ष्मणसुतः श्रीसिद्ध-[लक्ष्मीपद-
द्वंद्वाराधनसुप्रसिद्धमहिमा यः सिद्धसारस्वतः ।
आदेशादकृतैष सूर्यमहसः श्रीसूर्यसेनप्रभोर्
वैधे कर्मणि कालनिर्णयमसावल्लाडनाथः सुधीः ॥ २ ॥

As the work is quoted in *Acala's Nirṇaya-dīpaka* (see the next MS.), it must have been composed prior to 1518 A.D.

[H. T. COLEBROOKE.]

## 1580–1582.

**690–692.** Foll. 510; size $9\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, about 1730 A.D.; 8 or 9 lines in a page.

*Nirṇayadīpaka*, a compendium of rules and opinions regarding religious practices and observances, compiled, in Saṃvat 1575 (A.D. 1518), by *Acala Dviveda* (*Dvivedin*), surnamed *Bhāgyavateya*.

The author, who was one of three sons of *Vatsarāja*, and a native of Vriddhapura, carries his genealogy still further up through *Govinda*, *Lakshmīdhara*, and *Ananta* to *Dhāvigadeva* (?).

It begins (as corrected with the help of the next MS.):

हेरंबः सर्वकार्यार्थसिद्धिदः सर्वदा सतां ।
सिद्धिबुद्धियुतः सो ऽस्तु ग्रंथनिर्मितिकर्मणि ॥ १ ॥

देयः श्रीशंभुजन्मा गणपतिरखिलान्नागरानार्यवृद्धान्
  रक्षत्वस्मिन्समस्ते जगति तु भयतो यत्र कुत्र स्थितांश्च ।
येषां सम्यग्वृत्ता परमविधियुता पंचयज्ञान्विता या
  धर्म्या स्वाचारयुक्ता न चिरमति यतो नित्यचर्या कदा-
षट्कर्मधर्मनिरतैरपि चातिथेयैर् [चित् ॥ २ ॥
  यज्ञक्रियाकुशलिभिस्तु विचारगर्भैः ।
धर्म्यैर्द्विजैश्च शरणागतसाधुवृन्दैर्
  आस्थापितं पुरवरं हि शिवेन वृद्धं ॥ ३ ॥

विद्यावृद्धा धर्मवृद्धा ज्ञानवृद्धा हि ये नराः ।
वसंति यत्र तेनैतद्बुद्धा वृद्धपुरं विदुः ॥ ४ ॥

आचार्यतामुपगताय चतुर्मुखाय
  शंभुः स्वयं स्वकरसक्तविवाहशोभः ।
शैलांगजोद्वहनपर्वणि संव्यतारीत्
  तीर्थास्पदं नगरमेतदमर्त्यसद्म ॥ ५ ॥

नास्माभिर्नेनु नागरस्य पुरतो वेदार्थवादः कदा
  जेयो यत्र महस्रपैरिति (? ह्मष°) शिशोर्ब्रह्मर्षिभिर्निर्गतं।
दुर्वासा वसति स्म नागनिलये व्यासो ऽपि काशीपुरे
  ऽगस्तिः स्वस्ति समुच्चरे[त्] त्रिजगतां लंकाकृतात्मा-
अतः सम्मानमर्हंति सर्वेभ्यो नागरा ननु । [लयः ॥ ६ ॥
यतो ब्रह्मर्षिराजर्षिदेवर्षिभिरुपासिताः ॥ ७ ॥

ये नागरा भूवलये प्रसिद्धाः
  श्रुत्युक्तमार्गाचरणे प्रगल्भाः ।
द्रव्यप्रदानाप्तकुबेरशोभा
  धर्मद्विषः प्रत्यनिशं कठोराः ॥ ८ ॥

तेषु व्यक्तिरभूदेका मडोडेत्यभिधोत्तमा ।
तस्यां धारिगदेवो भूधरायां(?l. ऽभूद्व°) धर्मवर्धकः॥९॥

अनंतनामा समभूत्तदंगजो
  यो ऽध्यापिपद्वेदमनंतयाडवात् ।
अनंतभक्त्या निजजन्म सार्थकं
  कृत्वा ययावीश्वरधाम निर्मलं ॥ १० ॥

लक्ष्मीधरः सूनुरभूदनंताद्
  आनंददायी भुवि भूसुराणां ।
यस्मिन् द्विजे श्रीश्च सरस्वती च
  कुटुंबभावेन सदोषतुस्ते ॥ ११ ॥

लक्ष्मीधरादात्मजंतुर्द्विजेशो
  गोविंदनामा भुवि विश्रुतो यः ।
वेदार्थविद्वैदिककर्मविज्ञो
  विद्वद्द्विजैरर्चितपादपद्मः ॥ १२ ॥

तस्यात्मजो ऽभूत्तनु वत्सराजो
  वत्सैस्त्रिभिर्विस्तृतवंशराजः ।
यो धर्मवत्मश्रियराजराजः
  सर्वार्थविज्ञानविधौ सराजः(!) ॥ १३ ॥

श्रीवत्सराजादचलद्विवेदी
  जनुर्दधद्विप्रजनाग्रिरेणुः ।
श्रीनागराणां श्रुतिसागराणां
  करोति किंचिच्छुभकर्मसिद्ध्यै ॥ १४ ॥

श्रीमन्महारुद्रभवं विधानम्
  ऋग्वेदिविप्राप्तमतारिदं यत् ।
तस्यानुजं निर्णयदीपिकाख्यं
  ग्रंथं वचोमोहहरं करोमि [करोति 2595] ॥ १५ ॥ °

द्विवेदीविदुषां प्रधानमभवच्छ्रीवत्सराजो द्विजस्
  तत्सूनुः सकलद्विजाग्रिरजसामंशः कृती यो ऽचलः ।
तेनायं क्रियते प्रियाय विदुषां सन्निर्णयाकांक्षिणां
  ग्रंथो निर्णयदीपको ऽधिवसता श्रीपूर्ववृद्धं पुरं ॥ १८ ॥

जनकं स्वं प्रणम्याथ गुरुं भट्टविनायकं ।
तिथ्यादेर्निर्णयं ब्रूते ऽचलो नागरवाडवः ॥ १९ ॥

तिथ्यादिकं चोदनातः(!) श्राद्धदानादिकर्मसु ।
अंगत्वेनेष्यते तस्मान्निर्णेतव्यत्वमर्हति ॥ २० ॥

आदिशब्देन कालो नक्षत्रादि च । °

The work is chiefly concerned with the various observances connected with *śrāddha*, followed by chapters on *aśauca* and *grahaṇa*; other ceremonies such as *upanayana*, *vivāha*, *pratishṭhā*, etc., being only cursorily dealt with towards the end of the work.

Of the authorities referred to by the author, the following may be mentioned: *Anantabhaṭṭa*, foll. 59*b*, 60*b*, 444*a*; *Ācāratilaka*, fol. 74*b*; *Ṛshyaśṛiṅga*, foll. 315*b*, 340*a*, 362*a*; *Kāraṇa-tantra*, foll. 481*a*, 482*a*, 483*a*; *Kārshṇājini*, foll. 334*a*, 335*a*, 348*a*, 350*a*; *Kālanirṇaya*, foll. 324*a*, 354*b*; *Kālanirṇayadīpikā*, fol. 441*b*; *Kālādarśa*, foll. 7*a*, 127*b*, 184*a*, 254*a*; *Kauśika-saṃhitā*, fol. 139*b*; *Kshīrasvāmigrantha*, fol. 45*b*; *Khādiragṛihya*, fol. 401*b*; *Gabhasti*, fol. 450*a*; *Gālava*, foll. 276*a*, 313*a*, 315*b*; *Gṛihyapariśishṭa*, foll. 250*b*, 444*b*, 468*b* (also *Kāṭhakagṛihyapari-*

*śishṭa*, foll. 449*a*, 450*a*, 461*a*; and *Maitreya-gṛihyap.* fol. 338*a*); *Govindarāja*, fol. 288*a*; *Caturviṃśatimata*, fol. 419*b*; *Candranibandha*, foll. 271*b*, 273*b*; *Candrasmṛiti*, fol. 250*a*; *Camatkārakhaṇḍa*, fol. 341*b*; *Jātūkarṇya*, foll. 336*a*, 337*a*, 361*a*, 398*b*; *Jaimini*, fol. 179*a*; *Jyotiḥsāgara*, fol. 446*a*; *Jyotir-Bṛihaspati*, fol. 350*a*; *Trikāṇḍamaṇḍana*, fol. 445*b*; *Dāmodarīya*, foll. 462*b*, 463*b*, 469*a*; *Dhaumya*, foll. 163*a*, 164*a*, 165*b*; *Nigama*, foll. 424*b*, 433*a*; *nigamasmaraṇa*, fol. 155*a*; *Nirṇayabhāskara*, fol. 108*a*; *Nirṇayaśiromaṇi*, fol. 158*a*; *Nirṇayāmṛita*, fol. 39*b*; *Pārijata*, foll. 273*b*, 279*b*; *Paiṭhīnasi*, foll. 8*b*, 49*b*, 56*a*; *Bṛihaspatijyotirgrantha*, fol. 459*a*; *Bhalla*, foll. 174*a*, 238*a*; *Bhāshyasaṃgraha*, fol. 44*a*; *Bhūpālavallabha*, fol. 466*a*; *Ratnamālā*, foll. 4*b*, 237*b*, 463*a*; *Lalla*, foll. 171*a*, 239*a*, 465*b*, 474*a*; *Vijñāneśvara* (*yathā Vijñāneśvareṇa Smṛityarthasāre*), fol. 273*b*; *Viśvarūpa*, fol. 159*b*; *Viśvarūpanibandha*, foll. 163*a*, 166*b*, 170*b*; *Viśvādarśa*, foll. 271*b*, 308*a*; *Vishṇubhakticandra*, fol. 219*b*; *Vishṇurahasya*, foll. 113*a*, 181*a*, 185*a*; *Vyavahārasāra*, foll. 464*a*, 487*a*; *Vyāghra*, fol. 418*a*; *Vyāghrapāda*, foll. 432*b*, 434*a*; *Vratakalpa*, fol. 220*b*; *Vratasamuccaya*, fol. 118*a*; *Śrīpati*, fol. 174*a*; *Shaṭtriṃśanmata*, foll. 395*b*, 396*a*, 402*a*, 415*b*; *Satyavrata*, foll. 452*a*, 457*b*; *Sumantu*, foll. 315*b*, 316*b*, 331*a*; *Sureśvara*, fol. 474*a*; *Smṛiticandrikā*, foll. 151*a*, 472*b*; *Smṛitimañjarī*, foll. 337*b*, 359*b*; *Smṛitisaṃgraha*, foll. 260*b*, 332*a*, 434*b*, 455*b*; *Smṛitisamuccaya*, fol. 333*a*; *Smṛityarthasāra*, very often; *Hāṭakeśvarakshetramāhātmya*, foll. 130*a*, 141*b*, 234*a*.

It ends: इति उक्तेषु निर्णयेषु वर्तमानानां पुंसां सर्वकार्येषु मंगलं स्यादिति मंगलं ॥ संपूर्णोयं ग्रंथः ॥

नानानिर्णयसंपन्नः कृतो निर्णयदीपकः ।
शुभं भाग्यवतेयेन द्विवेदेनाचलेन च ॥
ऋग्वेदोक्तमहारुद्रविधानस्य सहोदरः । [दीपकः ॥
शुधांघदर्शनायायां (? शुद्धांगदर्शनाय यो) कृतो निर्णय-
द्वैवेदीविदुषां ० श्रीपूर्ववृद्धपुरं ॥
वसिते (?l. वसंति) ये वृद्धपुरे द्विजास्ते विबुधोपमाः ।
तथापि सद्विवेकाय ग्रंथो भूवलये ऽस्तु॰नः ॥
पंचसप्ततिमे वर्षे संवत्पंचदशात्परे ।
शुक्रस्य कृष्णद्वादश्यां ग्रंथः पूर्णत्वमीयिवान् ॥

इति श्रीनिर्णयदीपकः समाप्तः ॥ इदं पुस्तकं केशवेन लिखित्वा श्रीलक्ष्मीधरब्राह्मणाय स्वार्थपरमार्थनिमित्तं दत्तं लेखकपाठकयोर्हरिहरौ सर्वदा सुप्रसन्नावास्तां ॥

The surname *Bhāgyavateya* also occurs at fol. 424*a*:

कृते ऽचलद्विवेदेन ग्रंथे निर्णयदीपके ।
इत्थं भाग्यवतेयेन कृतो ग्रहणनिर्णयः ॥

[H. T. Colebrooke.]

## 1583.

**2595.** Foll. 290 (of which foll. 164, 174, 270 273 are missing; while three old *śuddhipattras* are inserted after foll. 32, 57, 124); size $11\frac{3}{4}$ in. by 5 in.; fairly written, in Devanāgarī, by different hands; 10–12 lines in a page.

*Nirṇayadīpaka.*

This MS. is made up of different portions, which still show an original separate pagination, viz. foll. 141 seq., foll. 188 seq., and foll. 252 seq. The last two leaves are older than the rest, while foll. 252–288 are again more ancient than the other portions.

The preceding MS. must have been derived, at least for the greater part, from the present MS., having been transcribed from it by a careful and experienced hand. This was certainly the case as regards the last portion, where the text of this MS. has been exactly reproduced. The lacunæ caused by the lost leaves 164 and 174 occur also at foll. 305*b* and 318*a* of MS. 691, without, however, any indication of a gap in the text; while, on the other hand, the gap occasioned by the loss of

foll. 270–273 has been supplied in foll. 476–481 of MS. 692, but evidently from some other source than the missing leaves, as fol. 274 of this, and fol. 482 of the other MS., begin exactly alike in the middle of a word, while the last line of fol. 481*b* of the latter MS. has been left blank.

The date (of the last two leaves) of this MS. is **संवत् १६४८ समये चैत्रवदि १५ सोमवासरे लिपितं वाराणस्यां जगदीशब्राह्मणेन ॥**

For another MS. of this work, see Rāj. Mitra, Bikāner Cat., p. 427.

[MACK. COLL.]

## 1584, 1585.

**2187, 2188.** Foll. 322 and 333; size 11 in. by 5 in.; large, clear, modern Devanāgarī writing; nine lines in a page.

*Nirṇayasindhu* (also called *Nirṇayakamalākara*), a comprehensive work on religious rites and ceremonies, compiled, in 1611-12 A.D., by *Kamalākara Bhaṭṭa*, son of *Rāmakṛishṇa Bhaṭṭa* and *Umā*, grandson of *Nārāyaṇa Bhaṭṭa*, great-grandson of *Rāmeśvara Bhaṭṭa*, and younger brother of *Dinakara* (*Divākara*) *Bhaṭṭa*.

The work is one of the chief authorities in Western India on matters connected with ceremonial observances.

It begins [A]:

कारुण्यैकनिकेतं रामं सीतालतायुक्तं ।
विश्वामित्रान्ववायव्रततिसमालंबशाखिनं वंदे ॥ १ ॥
लक्ष्मीसहायं कल्पद्रुतरलं जितगोकुलं ।
बर्हापीडं घनश्यामं महः किंचिदुपास्महे ॥ २ ॥
वेदार्थधर्मरक्षायै मायामानुषरूपिणं ।
पितामहं हरिं वंदे भट्टनारायणाह्वयं ॥ ३ ॥
यत्पादसंस्मृतिः सर्वमंगलप्रतिभूर्मता ।
तान् भट्टरामकृष्णाख्यान् श्रीतातचरणान्नुमः ॥ ४ ॥
सर्वकल्याणसंदोहनिदानं यत्पदद्वयं ।
धुनदीसोदरीमंबामुमाख्यां नौमि सादरं ॥ ५ ॥
[विंदुमाधवपादाब्जरोलंबीकृतविग्रहं ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥ ६ ॥ om. A.]
हेमाद्रिमाधवमते प्रविचार्य सम्यग्
ञालोच्य तत्त्वमथ तीर्थकृतां परेषां ।
श्रीरामकृष्णतनयः कमलाकराख्यः
काले यथामति विनिर्णयमातनोति ॥ ७ ॥
संति यद्यपि विद्वांसस्तन्निबंधाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥ ८ ॥

तत्र संक्षेपतः कालः षोढा । अब्दो ऽयनमृतुर्मासः पक्षो दिवस इति । ०

The work is divided into three chapters (*pariccheda*), the 1st of which deals with generalities (*paribhāshā*) and the several days of the *paksha* (*tithinirṇaya*); while the 2nd (*saṃvatsarakṛityanirupaṇam*) supplies a regular calendar of religious fasts and feasts; and the 3rd chapter (*prakīrṇanirṇaya*) is again subdivided into three *prakaraṇa*, treating of, a) *saṃskāra*, and various ceremonies such as dedications of trees, tanks, etc., of *devapratishṭhā*, etc.; b) *śrāddha*; c) *asauca* and miscellaneous rites, such as *vidhavādharmāḥ*, *yatidharmāḥ*, *saṃnyāsa*, etc.

Vol. I. of this MS. contains chapters I. (foll. 76) and II. (foll. 150, numbered 148, nos. 57 and 58 being used twice); and foll. 1–72 of the third chapter, terminating in the middle of *vivāha*; Vol. II. contains the remainder of the chapter (foll. 73–405, numbered 404, no. 168 occurring twice).

The last two concluding stanzas and the colophon run thus:

वसुऋतुऋतुभूमिते* गते ऽब्दे
नरपतिविक्रमतो ऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितो ऽयं
रघुपतिपादसरोरुहे ऽर्पितश्च ॥ ६ ॥

* Only MS. 193 has the second ऋतु, whilst the present MS. has क्रतु instead, and the other MSS. omit it altogether.

जगति सकलविद्यासिंधुमुग्धिंधयानां
परभणितिपरीक्षा युज्यते सज्जनानां ।
तदिह मम निबंधे दूषणं भूषणं वा
यदि भवति विदग्धैस्तद्यपश्यं विमृश्यम् ॥ ७ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीणश्रीमद्रामेश्वरभट्टसुत-विश्वमुकुटहीरांकुरश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ तृतीयपरिच्छेदः समाप्तश्चायं निबंधः ॥

Fourteen leaves inserted at the beginning of Vol. I. contain a complete table of contents, but without references to the pages.

The work has been printed at Bombay 1862, and Benares 1865. Cf. also Gildemeister, Bibl. Sansk., no. 318; West and Bühler, Digest, 3rd. ed., p. 23; Burnell, Tanjore MSS., p. 130*b*.

[GAIKAWAR.]

## 1586.

**1888**. Foll. 382 (in three parts of foll. 45, 92, and 245); size 11¾ in. by 5½ in.; fairly written, in Devanāgarī, by two or three hands, 12–15 lines in a page.

*Nirṇayasindhu.*

Dated: शके १६७१ शुक्लनामसंवत्सरे भाद्रशुक्लत्रयोदश्यां सौम्यवासरे तद्दिने समाप्तिमगमत् ॥ वझेोपनामकशंकरेण लिखितोयं ग्रंथः समाप्तः ॥ after which, by another hand: कर्वे (i.e. *Karvekar*) इत्युपनामस्य रघुनाथभट्टस्येदं पुस्तकं ॥

[DR. JOHN TAYLOR.]

## 1587.

**2173**. Foll. 507 (in three parts of foll. 60, 129 and 318); size 11¼ in. by 5¼ in.; clear Devanāgarī writing of about 1780 A.D.; ten lines in a page.

The same work. [GAIKAWAR.]

## 1588, 1589.

**2654, 2655**. Foll. 556 (numbered 557, no. 495 having been passed over); size 10 in. by 4½ in.; good, clear Devanāgarī writing of the latter part of last century; 8–11 lines in a page.

The same work.

Vol. II. begins with fol. 289, in the *liṅgārcāpratishṭhāvidhi* (ends fol. 300*b*).

[GAIKAWAR.]

## 1590, 1591.

**192, 193**. Foll. 372 (paged 44, 106, and 222); size 11¾ in. by 5¼ in.; fairly written, in Devanāgarī, by three different hands, towards the end of last century; ten lines in a page.

*Nirṇayasindhu.*

Vol. I. contains the first two, vol. II. the third chapter. [H. T. COLEBROOKE.]

## 1592.

**2690**. Foll. 112; size 9¾ in. by 7½ in.; fairly written, in Devanāgarī; fifteen lines in a page; European paper.

A portion of the *Nirṇayasindhu;* viz. *paricch.* III., *prakaraṇa* 2, here called the 4th *pariccheda.* [MACK. COLL.]

## 1593.

**1149**. Foll. 224; size 9½ in. by 3½ in.; good Devanāgarī writing of about 1600 A.D.; nine lines in a page; the last four leaves have been supplied by a modern hand.

*Jaṭamalla-vilāsa,* a digest of rules of conduct, compiled (in the latter part of the 15th, or of the 16th century), by *Śrīdhara,* under the patronage of Prince *Jaṭa Malla,* younger brother of *Cāya Malla;* son of *Bālacandra,* and grandson of *Ḍhaula,* sole minister of the ruler of *Ḍhilli.*

On the first page the writing, which had faded, has been touched up in several places, but not always correctly.

It begins :

रम्योत्तुंगलसत्कपोल[⏑⏑–]द्दानांबुधाराभर-
भ्राम्यन्मत्तमधुव्रतैव(? र)तिव(? त)रामारब्धकोलाहलः ।
सान्द्रानंदसुरेन्द्रवंदितपदद्वंद्वारविंदः सदा
विघ्नध्वंसनधूमकेतुरवतु श्रीमानुमानन्दनः ॥ १ ॥

फुल्लेन्दीवरदामसुंदरतरश्यामाभिरामद्युतिं
वंशीनिस्वनमुग्धतर्णककुलैराकीर्णमुत्कर्णकैः ।
भक्तन्यस्तविनिद्रसुंदरमिलन्मंदारदामश्रियं
श्रीगोविन्दमनिद्रपंकजरुचिं स्मेराननाब्जं भजे ॥ २ ॥

कुंडलीकृतभुजंगकुंडलीमंडितो भसितभूषितदेहः ।
संततं द्विरदकृत्तियुतांगो मंगलं दिशतु मे शितिकंठः ॥ ३ ॥

प्रसादमासाद्य सदैव यस्या
मूको ऽपि वागीशतुलामुपैति ।
सा पुस्तकव्यग्रवरैकहस्ता
सरस्वती मंगलमातनोतु नः ॥ ४ ॥

अस्ति स्वर्णपुरी सुपर्वनगरीसौंदर्यगर्वापहा
वर्णानां बहुवित्तसंग्रहवतां पूर्णा चतुर्णां गणैः ।
यस्यां कौशलगोत्रजक्षितिभुजां मंदीरनामामल[:]
क्षत्रश्रोत्रियसंभवो भुवि महान् वंशः समुज्जृंभते ॥ ५ ॥

तस्मिन्नसीमगुणरत्नचयैकसिंधुः
सिंधूद्भवारमणचिंतनदत्तचेताः ।
संग्रामनिर्जितबलोर्जितवैरिवीरो
विशिष्ट[–⏑]रघुवंशभवो बभूव ॥ ६ ॥

अभवदमलमूर्तिर्विश्वविख्यातकीर्तिः
सुकुलनलिनभानुर्वीरभूपालसूनुः ।
करकृतकरवालो वैरिभूपालकालः
कृतहरिहरसेवः श्रीजयचंद्रदेवः ॥ ७ ॥

असमसमरलीलालंपटक्षोणिपाल-
क्षपितविपुलदर्पश्चंडकोदंडशाली ।
अनवरतवितीर्णस्वर्णपूरो धरायाम्
अयमकृत कृतार्थानर्थिसार्थानजस्रं ॥ ८ ॥

तस्य सूनुरभवन्नयशाली
नल्लदेव इति विश्रुतकीर्तिः ।
पार्थिवप्रथितवंशवतंसः
कंसवैरिपदपंकजहंसः ॥ ९ ॥

तस्याजनिष्ट तनयो विनयोपपन्नो
दासः शशीव जगति द्विजदेवदासः ।
भूपालमौलिविलसन्नखचक्रवालो
भूमावनश्वरवैरिनृपालकालः ॥ १० ॥

तस्याभवत्सूनुरनुत्तमौजा
ढोलाभिधानो दृढराजशब्दः ।
ढिल्लिपतिप्रौढतरैकमंत्री
येनाभवत्पुत्रवती जनित्री ॥ ११ ॥

असमसमरलीलः सर्वदा दानशीलः
स्वजनकदनहर्ता वंदिनिर्मोककर्ता ।
उपचितबहुवित्तः संततानंतचित्तो
विदितविमलवंशः क्षत्रवंशावतंसः ॥ १२ ॥

हृदयनिहितकंसध्वंसिपादारविंद-
द्वितयजनितभक्तिक्षालिताशेषदोषः ।
सततकनकदानामंदनंदन्मुखेंदु(?)-
प्रणतविविधविद्वद्वृन्दवंदारुमौलिः १३ ॥

तदात्मजः संप्रति बालचंद्रो
जागर्ति कीर्त्या जितपूर्णचंद्रः ।
यच्छासनं के दधति स्म नित्यं
मालां विशालामिव भूमिपालाः ॥ १४ ॥

नृपतिमुकुटरत्नश्रेणिसंपातनिर्गत्
तरुणकिरणराजीमंजरीरंजितांघ्रिः ।
स्वभुजविजितभूभृत्प्रापितानंतवित्त-
द्विजवितरणलीलो विश्वविख्यातशीलः ॥ १५ ॥

तस्याभवन्नयवतस्तनयो दयावान्
अंभोनिधेरिव विधुः किल चायमल्लः ।
सत्री बलक्षपितवीरविपक्षपक्षो
यो जन्मना जनयितारमलंचकार ॥ १६ ॥

तेनार्थिनः कृतवता कृतिनः कृतार्थान्
विद्याविनोदमुदितामलमासनेन(? r. ⁰मानसेन) ।
सौंदर्यनिर्जितमनोभववैभवेन
मानोन्नतेन कुलमुन्नतिमाजगाम ॥ १७ ॥

तस्य सो ऽयमनुजो जटमल्लः
पांडवस्य जगति प्रतिमल्लः ।
भाति कीर्तिजितकर्णदधीचिर्
दीननीरभवदर्णववीचि(:) ॥ १८ ॥

तरुणतरणिकल्पानल्पचंडप्रतापो
विगतदुरितशंकः शोषितारातिपंकः ।
सुचितविबुधवृंदो (? मुदित⁰) राजवृंदैकवंद्यो
विजितमदनमुद्रो वैरिराजीवचंद्रः ॥ १९ ॥

न दैन्यं रक्षितं तेन न सैन्यमपि चाक्षतं ।
जटमल्लनृपालेन विदुषा विद्विषामिह ॥ २० ॥

सत्यमेव जयते

वालचंद्रनृपनंदनस्फुरत्कीर्तिचंद्रजटमल्लकारिते ।
श्रीधरेण कृतिना वितन्यते संग्रहप्रथममाह्निकक्रमः ॥२१॥

सदाचारस्य वेदमूलकत्वेनान्वयव्यतिरेकाभ्यां दृष्टादृष्टोभयरूपफलसंपादकतयाभ्यर्हितत्वेन प्रथममाचारो निरूप्यते ॥ तथा च मनुः ॥ श्रुतिस्मृत्युदितं ०

इति पुरीषोत्सर्गविधिः fol. 5a; ०शौचविधिः fol. 6b; आचमनविधिः fol. 7b; दंतधावनविधिः । अथ केशप्रसाधनादिमंगल्यविधिः fol. 9a; ----

वालचंद्रकुलकैरवचंद्रक्षोणिपालजटमल्लविलासे ।
श्रीधरस्य कृतिनः कृतिरेषा संततं कृतिमुदे समुदेतु ॥

इति श्रीमहाराजाधिराजश्रीवालचंद्रात्मजमहाठकुरश्रीजटमल्लकारिते जटमल्लविलासे आह्निकप्रकरणे तर्पणविधिः ॥

अथ देवपूजा । ० fol. 24b; ०आह्निकप्रकरणे अतिथिपूजा fol. 30a; ०भोजनविधिः fol. 36a; ०शयनविधिः ॥ इति ० आह्निकप्रकरणं समाप्तं fol. 37a.

II. वचनानि विचिन्वता मुनीनां
बहुधा श्रीधरशर्मणा बुधेन ।
जटमल्लनृपालशासनात् क्रियते
कालविनिर्णयो ऽधुना ॥ ०

इहाविधिवाक्यबोधितानां निखिलकर्मणां निष्पत्तये ऽधिकरणतयाङ्गत्वेनोपयोगित्वात्कालो निरूप्यते । तथा हि विधिर्द्वेधा । प्रवर्तको निवर्तकश्च । ०

इति वेधनिरूपणं fol. 41a; नक्षत्रव्रतविनिर्णयः fol. 44a; इति ० तिथिनिर्णयप्रकरणे प्रतिपदादिजन्माष्टमीपर्यन्ततिथिविनिर्णयः fol. 55a; दुर्गाष्टमीनवम्योर्निर्णयः fol. 57b;—एकादशीद्वादशीव्रतनिर्णयप्रकरणं fol. 83a; ०शिवरात्रि० fol. 85a; होलिका fol. 86a; वटसावित्री fol. 86b; दीपोत्सव fol. 87a; श्रावणी fol. 88b; युगादिकालनिर्णयः fol. 94b; महालयनिर्णयः fol. 97b;—इति० श्राद्धप्रकरणम् fol. 115a; ०संक्रमणकालानिर्णयप्रकरणम् fol. 120a; ग्रहणकालनिर्णयः fol. 125a; अधिकमासनिर्णयः fol. 135b; ०मांसतैलादिविहितनिषिद्धकालनिर्णयः fol. 141b; इति ऋतुकालोपगमनिर्णयः ॥ ib.

अथ गर्भाधानादि संस्काराणां कालनिर्णयः । ० पुंसवनादिकर्मकालनिर्णयः fol. 142b; उपनयन० fol. 144a; विवाहादि० fol. 146a; अधिवेदन० fol. 147b; मृतिकाल० fol. 151b; अनध्यायकाल० fol. 157b; देवारामादिप्रतिष्ठाकाल० fol. 160a; अग्न्याधानादिकाल० fol. 161a;—संकीर्णकप्रकरणम् fol. 170b; इति० तिथिनिर्णयप्रकरणं समाप्तम् fol. 171a.

III. On *aśauca*, beg.: शुचिः कर्माणि कुर्वीतेति सकलवैधकर्मसु शुद्धिरधिकारिविशेषणं ०

इति० शुद्धिप्रकरणं fol. 204b; तैजसादिद्रव्यशुद्धिः fol. 207b; धान्यादिशुद्धिः fol. 210a; सिद्धान्नशुद्धिः fol. 211b; तोयशुद्धिः fol. 213b; भूम्यादिशुद्धिः fol. 215a; स्वभावशुद्धिः fol. 217b; देहशुद्धिः fol. 219a; इति शरीरशुद्धिः । अथ स्नानशुद्धिः । fol. 220b.

It concludes with four stanzas in praise of *Kṛishṇa* (स्फुरत्पुरटकुंडल०), after which:

वालचंद्रकुलकैरव० ॥ ५ ॥ see above.

संवत्सरे श्रीनृपविक्रमार्के
बानाब्धबाणक्षितिभाजि(!) तिथ्यः(l. तिथ्यां) ।
शुचौ शिते कारितपात्र(नि)बंधे
बालेंद्रपुत्रं(!) जटमल्लनामा ॥ ६ ॥

इति श्रीगजाधिराजश्रीवालचंद्रात्मजजटमल्यतकारितं(!) जटमल्लविलासशुद्धिप्रकरणं संपूर्णम् ॥

जटमल्लविलासः समाप्तः ॥

Among the authorities quoted may be mentioned: *Karaṇatantra*, 158b, 161b; *Kālanirṇaya*, 155a [तयोक्तं कालनिर्णये । काण्डप्रश्नानुवाक्यानां समाप्तौ काल इष्यते । दशाष्टपंचरात्राः स्युस्तथ्यानां(!) तु त्र्यहं भवेत् । तंत्राणि संहिता ब्राह्मणमारण्यकं च ॥ ?not in the *Kālamādhavīya*]; *Kālādarśakāra*, 104a; *Dāmodarīya* (astron.), 144a; *Pañcānanasiṃha*, 126a; *Pārijāta*, 147b [मनुः । चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या । पतिघ्नी च विशेषेण जुंगितोपगता च या ॥ जुंगितो निंदितः ॥ प्रतिलोम इति पारिजातः]; *Prāsādadīpikā*, 26b [अथ शिवे वर्ज्यानि ॥ प्रासाददीपिकायां ॥ जयावंधूकसिंदूरं तथा वैसंधिके शुभे । दमनीकेतकीयूथीमालतीकुटजानि च ॥ घुमृणं चापमारश्च प्रमादेनापि मार्पयेत्(!) । बर्बरां सर्जपत्रीं च तथा च कुमुदद्वयं ॥ two *ślokas* more]; *Ratnamālā*, 145a, 161b; *Vallabha*, 162b (*Vallabhācārya*, 38a, 163b); *Viśvādarśa*, 102b; *Vishṇudharmāmṛita*, 124a; *Śrīpati*, 135a, 145b, etc. (-*paṇḍita*, 160a); *Shaṭtriṃśanmata*, 40a, 47b; *Smṛitisaṃgraha* (जातकर्म च पुंसूतिः सीमंतोन्नयनव्रतं । मलिम्लुचे ऽपि कुर्वीत निमित्तं यदि जायते ॥) 126b; (आद्ये

ऽब्दे वा तृतीये वा विप्रश्चौडं प्रकल्पयेत् । दैवात्तस्यान्तराये च पंचमे ऽपि न दुष्यति ॥ तृतीये वा पंचमे वा चूडा राज्ञां विशामपि । निगदव्याख्यानमेतत् ॥), 142*b*; *Smṛitisaṃgrahakāra* (तपनस्य सुता गंगा गौतमी च सरस्वती । रजसा नाभिभूयन्ते वेणा च नदसंज्ञिता इति ॥) 137*b*.

[H. T. COLEBROOKE.]

## 1594.

**1441b.** Foll. 119; size 12 in. by 4 in.; carelessly written, in Devanāgarī, in A.D. 1799; eleven lines in a page.

The same work. Copied, very incorrectly, from the preceding MS., with the exception, probably, of the last four (modern) leaves of that copy. The verse containing the date is given thus:

संवत्सरे यौनृपविक्रमार्के वाणयाणक्षितिभाविभिन्ना शुचौ शिते – रिसमाप्तनिबंधे वालेंद्रपुग्नं – टनल्लनामा ॥ ०

[H. T. COLEBROOKE.]

## 1595.

**2772.** Foll. 403; 4to; size 12¾ in. by 10 in.; fairly written, in Devanāgarī; 31 lines in a page.

*Jayasiṃha-Kalpadruma*, a general digest of rules and opinions on religious observances, compiled, under the patronage of *Jayasiṃha* of Mathurā, in A.D. 1713, by *Ratnākara*, son of *Paṇḍita śrī-Deva Bhaṭṭa*, of Benares.

It begins:

करींद्राननं चारुचंद्रावतंसं
  मधप्तंडपालीमिलद्भृंगमालं ।
अपर्णासुतं विघ्नपूगं हरंतं
  गणेशं सुरेशं नमाम्यं प्रपद्ये ॥ १ ॥
श्रीजानकीशं शरणागतैक-
  दुःखापहं श्रीगिरिजाधवं च ।
स्मृत्वाथ पूज्यौ पितरौ गुरूंश्च
  श्रीधातरौ सूर्यसमौ नमामि ॥ २ ॥
आसीद्ब्रह्माद्वितीयं त्रिगुणविरहितं निष्कलं निर्विकारं
  यच्चिन्मात्रं तदेव प्रलयजलनिधौ विष्णुरूपं बभूव ।
जातस्तन्नाभिपद्माद्विधिरमितमतिस्तत्प्रपौत्रो विवस्वान्
  तस्माद्वैवस्वतो ऽभून्मनुरखिलगुणस्तत्सुत इक्ष्वाकुभूपः ॥ ३ ॥
इक्ष्वाकोस्तु कुले गिरीशसदृशो राजा ककुत्स्थो ह्यभूत्
  तद्गोत्रान्ततनुर्दृढः समजनि श्रीधुंधुमारो नृपः ।
मांधाता तु तदन्वये समभवत्तस्यान्वये ऽभून्महान्
  राजा धर्मविवृद्धये किल हरिश्चंद्रः सुरेंद्रोपमः ॥ ४ ॥
पूते हरिश्चंद्रकुले विशिष्टे
  गरेण युक्तः सगरो हि जातः ।
भगीरथस्तत्कुलजः प्रसिद्धः
  श्रीजाह्नवी येन महीमनायि ॥ ५ ॥
खट्वांगः समजनि तत्कुले ऽतिधन्ये
  तद्वंश्यो रघुरिति नामतः प्रसिद्धः ।
तद्वंशे विभुरवितुं महीं च धर्मं
  श्रीरामः क्षपितनिशाचरो बभूव ॥ ६ ॥
तत्पुत्रः कुश इति विश्रुतः पृथिव्यां
  तद्वंशे विपुलयशा बृहद्बलो ऽभूत् ।
युद्धे यः कुरुकुलनाशके प्रसिद्धे
  भित्त्वार्कं परमपदं जगाम सद्यः ॥ ७ ॥
तद्वंशे वितते महाभटनुते धर्मैकसेतुर्महान्
  पृथ्वीराज इति प्रसिद्धमहिमा सत्सात्वतामग्रणीः ।
राजा क्षत्रधुरंधरः समभवद्यस्याभयज्ञोचरो
  वाचां यो मनसाप्यगोचरतरो विष्णुः कृपावारिधिः ॥ ८ ॥
तद्वंशे मानसिंहः समभवदतुलः प्रत्यहं दानमत्तान्
  ईषादंतान्गजेंद्रानभिनवतुरगान्याचकेभ्यो ऽददाद्यः ।
यश्चोर्वीशाननेकानुदधिजलगतान् खंडशः स्वैर्बलौघैः
  कृत्वा साम्राज्यलक्ष्मीं समयहदभितो भारतं मत्स्यदेशे [॥ ९ ॥
मानसिंहादभूत्तस्माज्जगत्सिंहो महाबलः ।
जगत्सिंहान्महासिंहो जयसिंहस्तु तत्सुतः ॥ १० ॥
येन श्रीजयसिंहेन दिल्लींद्रपदलिप्सवः ।
शिवप्रभृतिभूपाला वशं नीताः स्वतेजसा ॥ ११ ॥
तस्याम्यपुत्रः प्रबलः पृथुश्रीः
  श्रीरामसिंहो ऽवनिपालपालः ।
कौर्मे कुले ऽभूद्विजितारिवर्गः
  श्रीरामपादाब्जविलग्नचित्तः ॥ १२ ॥
यः कृत्वा ब्रह्मपुत्राभिधनदपुलिने स्वर्णभूमिविशालां
  मुक्तामाणिक्यरम्यां गिरिजलधियुतां चाददाद्वाडवेभ्यः ।
दारिद्र्यं याचकानां कथमपि न गतं यत्पुरा कर्णदात्
  तत्क्षिप्रं भूरिभूमिद्रविणवितरणैरर्थ्यतो नास्ति लोके
[॥ १३ ॥

तत्पुत्रः कृष्णसिंहः प्रथितगुणगणः कृष्णवत्सोत्सवाढ्यो
जातः पृथ्व्यां पृथुश्रीररिगणतिमिरध्वंसने भानुरूपः ।
तस्माच्छ्रीविष्णुसिंहः क्षपितरिपुगणः पालकः सज्जनानां
राजा राजीवनेत्रः समजनि मथुरा* पालिता येन
[पूर्वं ॥ १४ ॥

तस्माच्छ्रीविष्णुसिंहाख्याद्राजा राजीवलोचनः ।
जातः श्रीजयसिंहो ऽसौ क्षीराब्धेरिव चंद्रमाः ॥ १५ ॥
[० ३१ ॥

In the verses omitted the author eulogises *Jayasiṃha's* virtues, especially his piety and liberality to Brāhmans.

प्रोद्यच्छ्रीमदसीमराज्यविलसद्दिल्लीन्द्रसेनाचलद्
दृप्यद्योधगणे हुसेनसहितान् (!) म्लेछान् स्वयं यो ऽनयत् ।
स्वं राज्यं परिगृह्य सत्कृसचिवो† राजा गृहे संवसन्
सामंतेष्वतपत्सहस्रकिरणो ग्रैष्मो यथा दुःसहः ॥ ३२ ॥

तेन श्रीजयसिंहेन सर्वशास्त्रार्थसंविदा ।
संप्रार्थितस्त्वियं कृत्यं कुरुतेति सुसंग्रहं ॥ ३३ ॥

रामांघ्रिप्रवणः सुकर्मनिरतः शांडिल्यगोत्रोद्भवः
काशीस्थद्विजदेवभट्टतनयः सम्राट् सुविद्यान्वितः ।
संलब्धेर्धनसंचयैर्बहुविधैः सर्वान्क्रतूनाचरन्
तत्प्रीत्यै व्रतकल्पशाखिनममुं निर्माति रत्नाकरः ॥ ३४ ॥

हेमाद्र्याद्दीन्समालोक्य ग्रंथान्प्राज्यार्थसंयुतान् ।
तेभ्य एव समादाय पुराणेभ्यस्तथैव च ॥ ३५ ॥

किंचित्किंचिद्ब्रतग्रातं तत्सिद्ध्यै समये ऽपि च ।
संदर्भो रचितो रामतुष्ट्यै च भवतादयं ॥ ३६ ॥

क्षम्यतां साहसं धीरैर्गुणज्ञैरमत्सरैः ।
यदर्थ्यं सुष्ठु तद्ग्राह्यं यदसच्छोध्यतामिह ॥ ३७ ॥

बहवो हि बुधाः संति तन्निबंधाः सहस्रशः ।
तथाप्यस्य तु वैदग्ध्यं सुहृद्भिः संविचार्यतां ॥ ३८ ॥

वक्ष्यमाणव्रतेषु कालस्य निमित्तत्वादादौ कालस्वरूपं तन्निर्णयश्चोच्यते । ०

The work is divided into eighteen sections (*stavaka*), on the contents of which see Rāj. Mitra, Notices, IV., p. 276 seq. (another MS., Bikāner Cat., no. 850).

It ends:

श्रीमद्दिल्लीशसेनोद्भटविकटभटोद्दंडमत्तेभसिंहश्
चंडोन्मादानुरुध्व(रुध्क)क्षुभितवसुमतीपालने धर्मराजः ।
पौत्रः श्रीकृष्णसिंहक्षितिपकुलमणेर्विष्णुसिंहस्य पुत्रः
श्रीमान् राजाधिराजो जयहरिमराधीशवत्को सुखी
[स्यात् ॥ १ ॥

श्रीमत्पंडितदेवभट्टतनयः श्रीरामपादद्वय-
ध्यानावाप्तसमस्तकामनिवहः सम्राट् स रत्नाकरः ।
तुष्ट्यै श्रीजयसिंहवर्मनृपतेः कल्पद्रुमे ऽष्टादश
वारादिव्रतविस्तरं समकरोत्तच्छस्त्रसत्कामदं ॥ २ ॥

यश्चक्रे ऽवंतिपुर्यां द्विजवरसहितः सम्मुखं सोत्सवाढ्यं
ज्योतिष्टोमं ततो वैजयनृपतियुते वा पुरे वाजपेयं ।
श्रेष्ठं सर्वक्रतुभ्यो विविधविधयुतं पौंडरीकं च यज्ञं
षट्त्रिंशद्यससाध्यं द्विजवरसहितं द्वादशाहक्रतुं च ॥ ३ ॥

सर्वतोमुखमखं क्रतूत्तमं संविधाय युगवेदिकायुतम् ।
देवभट्टजनुषाग्रजन्मना कल्पवृक्षरचना त्वियं कृता ॥ ४ ॥

शाके विक्रमपार्थिवस्य शुभदे व्योमर्षिसप्तेंदुयुग्
वर्षे शोभनसंज्ञके शिवतिथौ मासे नभस्याख्यके ।
कूर्मश्रीजयसिंहदेवनगरे पुण्ये ऽविकेशांचिते
ग्रंथः कल्पतरुः समाप्तिमगमत्सज्ज्ञानवित्तप्रदः ॥ ५ ॥

रत्नाकरेण जयसिंहसमर्चितेन
सद्वाक्यरत्ननिवहैः परिसंगृहीतः ।
ग्रंथो ऽयेदः सफलकल्पमहीरुहाख्यः
श्रीजानकीशपदपद्मयुगे ऽर्पितो ऽयं ॥ ६ ॥

ग्रंथान् बहून् सुविततान् सुचिरं विभाव्य
कष्टेन यः कविवरैरधिगम्यते ऽर्थः ।
निर्मत्सरं बुधवराः परितो विचार्य
ग्रंथाद्गृहीकुरुत तं हि विना प्रयासं ॥ ७ ॥

दिवि पंचकल्पतरवः परं श्रुता
जयसिंहवर्मनृपतेः समानते ।
कथमन्यथा सुरगणो ऽंबिकापुरे
चनितुं यदाध्वरमिषात्समाययौ ॥ ८ ॥

इति श्रीदेवभट्टात्मजपौंडरीकयाजिरत्नाकरविरचिते श्रीजयसिंहकल्पद्रुमे ह्योते सप्तदशः स्तवकः ॥ समाप्तश्चायं ग्रंथः ॥ ० श्रीसंवत् १८७६ मीती आश्वीनवदी ३ तृतीयाकेदीपुस्तक समाप्त वारसोमवारके दीन संपूरणलिखीतं तिवाडी श्रीरामब्राह्मणदे-सवालीगुजरगोडकाशीमध्ये राजमंदके वाशी ॥ श्रीमथुरानाथजीसाहाय: ॥ ०

[Coll. of Fort William.]

सत्यमेव जयते

* मथुरा A.

† Thus A.; च सुसचिवो B.

## 1596-1598.

**1337, 1026, 1550.** Foll. 347, the first of which is wanting; size $11\frac{1}{2}$ in. by $6\frac{1}{2}$ in.; fairly written, in Devanāgarī; twelve lines in a page.

*Jayasiṃha-Kalpadruma.*

It begins with the concluding words of the 9th introductory couplet (° मत्स्यदेशे) which, however, is counted the 10th in this copy.

Dated: संवत् १८६३ चैत्रमासि शुक्लपक्ष १० शनिवारे.

[H. T. Colebrooke.]

## 1599.

**565.** Foll. 478; size $12\frac{1}{2}$ in. by $6\frac{1}{4}$ in.; fairly good Devanāgarī writing of 1802 A.D.; 12–16 lines in a page.

The same work. [H. T. Colebrooke.]

## 1600-1602.

**909-911.** Foll. 1-248, 249-474, 475-737; size $15\frac{1}{2}$ in. by 5 in.; fair Bengalī handwriting of 1799 A.D.; eight lines in a page.

*Rāmaprakāśa,* a similar digest, compiled in the name of *Kṛipārāma* (son of *Yādavarāja*), a descendant of the royal family of *Māṇikyacandra,* and himself a feudal lord in the times of *Jehāngīr* and *Shāhjehān* (first half of the 17th century).

Though the work is ascribed to *Kṛipārāma* himself, the fulsome praise bestowed on him, and on his son *Govardhana* (*Pṛithumati*), leaves little doubt that the work was compiled by some protégé of his. Indeed, the real author would seem to be *Rāghavendra,* son of *Kāśīnātha,* and father of *Rāmadeva Ciraṃjīva,* as appears from a statement in the introduction to the latter's *Vidvanmodataraṅginī* (Aufrecht, Cat. Bodl., p. 261*a*)—where a *Mantrārthadīpikā* is also ascribed to the same author—though the work there referred to under the title *Rāmaprakāśa* seems to be rather the commentary on the *Kālanirṇayadīpikā* (see nos. 1664–66), likewise published under *Kṛipārāma's* name.

It begins (with the figures supplied):

प्रणम्य सकलेशानं सकलेशानतुष्टये ।
कालतत्त्वार्णवे रामप्रकाशं सेतुमादधे ॥ १ ॥
महेशानकृपारामकृपारामेण तेन तु ।
संपादनीयो ग्रन्थो ऽयमानन्दयतु सज्जनान् ॥ २ ॥
शौर्यं यस्य महाप्रतापनृपतेर्जागर्ति मूर्ध्नि स्थितं
कीर्तिर्यस्य जनानुरञ्जनकरी विश्वग्दिशो धावति ।
यत्सूनुः समरे द्विपत्क्षितिभुजः शूरान्विहन्ति क्षणाज्
जाता[न्] वीरविमर्दनः पृथुमतिर्नाम्ना च गोवर्धनः ॥३॥
यद्बुद्धिः सदसद्विवेकनिपुणा प्रागेव जाग्रद्यशो-
जाहाँगीरमहीमहेन्द्रगणिता श्रैष्ठ्येन सद्बुद्धिषु ।
यन्नीतीरवगत्य सन्नयगुरुः शुक्रो ऽपि मोहात्स्वयं
स्तम्भस्खालितशीर्षिमो(l. षे ई)षदसकृन्नीतिं पुनः प्रेक्षते [॥४॥
कर्तव्यानिह कुर्वतो ऽपि विषयान्नाशक्तिमन्वेच्छतो
यस्यानन्दिहृदः सदैव परमब्रह्मैकनिष्ठं मनः ।
दातुः पण्डितमण्डले विहरतो विद्याविचारेच्छया
दीने यस्य दया श्रुतिस्मृतिगताचारः समुन्मीलति
[(l. स उ°) ॥ ५ ॥
श्रीमद्भूपसमूहवन्दितपदश्रीसाहजाहाँकृपा-
पात्रं यादवरायवर्भतनयो माणिक्यचन्द्रान्वयः ।
गौडक्षत्रकुलोद्भवो* भुवि कृपारामाभिधो भूमिपो
ग्रन्थं धर्मकृतां कृते रचयितुं तस्मिन्मनो यो दधौ ॥ ६ ॥
सन्ति यद्यपि भूयांसो ग्रन्था एषोत्तमोत्तमाः ।
तथापि कंचनास्वादमयमुत्पादयिष्यति ॥ ७ ॥
शास्त्रतत्त्वार्थसंज्ञानाद्ये धीरा गतमत्सराः ।
गुणग्राहितया तेषामत्र दृष्टिर्भविष्यति ॥ ८ ॥
हेमाद्रिमाधवादीनां गौडानां तत्त्वदर्शिनां ।
संततं समभिज्ञाय ग्रन्थो ऽयं परिनिर्मितः ॥ ९ ॥
तेषां मिथो यत्र विरुद्धमागतं
मतं विचारेण च तत्र यच्छिवं ।
तदर्पितं चात्र मनोविचक्षणैः
क्षणं निवेश्यं सदसत्प्रबुद्धये ॥ १० ॥

अथ शुचि तत्कालजीवी कर्म कुर्यादित्यादिविधौ °

* गौडक्षत्र ° MS., corr. for orig. गौडक्षेत्र; in other places it reads गौडक्षेत्र; but see also nos. 1664–66 (MSS. 885–7).

The arrangement of the subjects treated of is the usual one, viz. I., generalities as regards times and seasons; II. (from fol. 132*a*), a complete calendar of religious duties; III. (from fol. 621*b*), special rites, here mostly of the *Vaidik* order.

Among the authorities cited may be mentioned: *Kālādarśa*, foll. 227*a*, 369*a*; *Kṛityatattvārṇava*, 229*a*; *Gaṅgāvākyāvalī*, 229*b*; *Gauḍagrantha-jyotisha* (or *-kāra*), 233*a*, 238*b*, 243*a*, 261*b*, 289*b*, 340*a*; *Gauḍatithitattva*, 203*a*; *Gauḍanibandha(kāra)*, 103*a*, 387*b*; *Caturviṃśatimata*, 718*a*; *Janmalagna*, 664*a*; *Jyotiḥsaṃgraha*, 310*a*; *Tithitattva-gauḍagrantha*, 231*a*; *Tīrthacintāmaṇi*, 229*b*; *Dākshiṇātyagrantha*, 231*a*; *Dākshiṇātya-Jyotiḥsaṃgraha*, 70*b*; *Dīpakālikā*, 339*a*; *Nirṇayāmṛita*, 220*b*; *Purāṇasamuccaya*, 152*b*; *Pratāpamārtaṇḍa*, 202*b*, 232*a*; *Bhojarāja* (quoted from *Gauḍanibandha*), 130*a*; *Bhojarājīyagrantha*, 237*b*; *Madanaratna*, 659*a*, 664*a*, 671*a*; *Rājamārtaṇḍa*, 130*a*; *Viśvarūpanibandha*, 326*b*; *Vishṇurahasya*, 348*b*, 459*b*; *Śāntidīpikā*, 343*a*; *Śivarahasya*, 234*a*; *Saṃvatsarapradīpa*, 645*b*. It ends:

भट्टाचार्यशताग्रधानकृतिनिर्णयादिशास्त्रार्थविद्-
वर्यें द्वैतमते तदेकतरतो निर्णायके भूरिशः ।
साक्षां तत्र विधाय धर्मविदुषां हर्षाय सम्पादिते
ग्रन्थे ऽस्मिन् विमले प्रयान्तु सुधियां चेतांसि निर्विघ्नता ॥

इति गौडक्षेत्रकुलावतंसयादवरायात्मजमाणिक्यचन्द्रान्वयमहामतिकपरमज्ञानिविरामभानमानोन्नतकीर्तिप्रतापोर्जितश्रीकृपारामविरचितः कालतत्त्वार्णवसंतरणोपायसेतुभूतस्तिथ्यादिकालनिर्णयको रामप्रकाशनामग्रंथः समाप्तः ॥

धराक्षिशैलेन्दुमिते शके रौ(द्राब्दे)
गजारिगे हेलिदिने व्यलेखीत् ।
रामप्रकाशं द्विजजीवनाख्य-
सुतेन दुर्गाचरणं विभाव्य ॥

[H. T. Colebrooke.]

## 1603.

**2316.** Foll. 145; size 13 in. by 5 in.; good, modern Devanāgarī writing; from fol. 67 by a different hand; nine lines in a page.

*Paraśurāmaprakāśa*, a digest of matters relating to *ācāra* and *śrāddha*, by *Khaṇḍerāya*, son of *Nārāyaṇa Paṇḍita*.

The work consists of two chapters (*ullāsa*), only the first of which (on *ācāra*) is contained in this MS. It begins:

निश्च्योतन्मदगंडमंडलमिलद्भृंगावलीमंजुल-
ध्वानाकर्णनिमीलिताक्षियुगलव्याजात्मजास्य प्रभुः ।
भक्तेभ्यः किमदेयमस्ति परमं वस्तु त्रिलोकीतले
ध्यायन्नंतरतीव मंगलचपदेयार्थदारायणीः ॥ १ ॥

यः क्षीरोदसुतारदच्छदसुधास्वादैकतानः स्फुरत्
तत्सौंदर्यनिभालनैकरसिकस्तद्वक्त्रसौरभ्यवित् ।
श्रोता तन्मणितस्य तत्कुचपरीरंभोत्सुकः संगमे
श्रीविष्णुः सकृदिंद्रियैरनुभवन् सर्वैः सुखं पातु वः ॥२॥

The work was composed at Yamunāpurī, on the river Gomatī, by order of *Paraśurāmamiśra* (*prabhū*), son of *Horilamiśra*, and grandson of *Sūryākara* (of the *Pārāśaragotra*). Of himself the author gives the following genealogy:

*Viśvanātha* of Varāṇasī, his son
*Anantapaṇḍita*, his son
*Kṛishṇapaṇḍita*, his son
*Nārāyaṇapaṇḍita*, his sons
*Nīlakaṇṭha* and *Khaṇḍerāya*.

Of *Nārāyaṇapaṇḍita* it is said:

स एकदा संमतमानुपूर्वम्
आहूय तं होरिलमिश्रसूनुः ।
निबन्धमेकं कुरु पंडितेति
विपश्चितां संसदि संदिदेश ॥ ३५ ॥

ततः स नारायणपंडितो ऽपि
समादिशद् ग्रंथमिमं विधातुं ।
तं धर्मशास्त्रार्थविचारनिष्ठं
पुत्रं कनिष्ठं हि गुणैर्गरिष्ठं ॥ ३६ ॥

श्रीनारायणपंडितस्य तनयः श्रीनीलकंठानुजः
खंडेराय इति श्रुतिस्मृतिपुराणार्थं समुद्धृत्य च ।
नत्वा देवमभीष्टदं स्वपितरौ विद्वज्जनप्रीतये
संक्षिप्तं कुरुते निबन्धमखिलग्रंथार्थसारास्पदं ॥ ३७ ॥ ०

सत्यमेव जयते

नाम्ना हि परशुरामप्रकाश इति विश्रुतो ग्रंथः ।
प्रकटयतु धर्मतत्त्वं तमसा वृतमर्थतत्त्वविदां ॥ ५१ ॥
निबंधे प्रथमोल्लास आचाराख्यः प्रकीर्तितः ।
द्वितीयः श्राद्धसंज्ञः स्यादुल्लासश्च तथा पुनः ॥ ५२ ॥ - -

The MS. ends: इति स्वप्नप्रकरणं ॥ इति परशुराम-प्रकाशे निद्रामयूखः ।

इति श्रीशाकद्वीपीयकुलावतंसहोलिलमिश्रात्मजपंडितमं-डलीमंडनायमानसार्वभौमलब्धवाणीरसालरायपदवीविराजमान-मानोन्नतश्रीमत्परशुराममिश्रकारिते वाराणसीस्थधर्माधिकारि-नारायणपंडितात्मजखंडेरायपंडितविरचिते परशुरामप्रकाशे आ-चारोल्लासः समाप्तः ॥

For another MS. of this work see Weber, Cat. Berl., no. 1025.

[H. T. Colebrooke.]

## 1604.

**1217a.** Foll. 132 (foll. 75–82 of which are wanting); size 11½ in. by 4¾ in.; fairly written, in Devanāgarī, about 1650 A.D.; 10 or 11 lines in a page.

*Dinakaroddyota*, a digest of matters relating to religious observances, compiled by *Dinakara Bhaṭṭa*, son of *Rāmakṛishṇa Bhaṭṭa*, grandson of *Nārāyaṇa Bhaṭṭa*, and great-grandson of *Rāmeśvara Bhaṭṭa*.

This volume contains that section of the work which supplies a regular calendar of religious feasts and fasts (*Varshakṛitya*).

It begins:

संसारचक्रे मुनयो ऽप्यनाप्य
  यां मातरं मातुदरे निवासं ।
नेच्छंतुमां तामभिनम्य मात्रं
  न स्यामहं कस्य मनोरथस्य ॥ १ ॥
स रामकृष्णः प्रथितो ऽपि मर्त्ये
  यस्मिन्नपरामा (!) इति स्ववाचा ।
समादधे विज्ञजनेषु विज्ञैः
  श्रुतिश्रुतागुत्वमहत्त्वसाम्यात् ॥ २ ॥
ब्रूते दिनकरः काले यदन्येन न कल्पितं । [॥ ३ ॥
पचसामाकरानुक्तौ सदीपः (? सदोपः MS.) कालमाधवः
दारेष्विव निबंधेषु जीर्णेषु सुधियां ग्रहः ।
वयसः क्षपणायैव न रसाय कदाचन ॥ ४ ॥
यत्र माधवहेमाद्री युयुधाते महागजौ ।
तत्र मां वराणं लोकस्तदीयमभिधास्यति ॥ ५ ॥
मद्ग्रंथाभिज्ञमासाद्य कालं नेष्यति पंडितः ।
मौनेन वा कथाभिर्वा कर्णकंडूयनेन वा ॥ ६ ॥
गुणग्रहश्चेज्जगतीतले ऽस्मिन्
  ग्रंथांतरं द्रक्ष्यति नैव को ऽपि ।
परं तु देवस्य गतिं न जाने
  लोका गुणाढ्यां गृहिणीं त्यजंति ॥ ७ ॥

अखंडकालस्य निर्णयानर्हत्वात्तदुपाधयो निर्णीयंते । तत्र दिनं चतुर्धा । ०

*Iti .. paribhāshāprakaraṇam*, fol. 13*a*; *grahaṇanirṇaya*, 43*b*; *ravisaṃkrāntinirṇaya*, 47*a*; *caitrakṛityanirūpaṇam*, 52*b*; *vaiśākha*, 56*a*; *jyeshṭha*, 57*a*; *āshāḍha*, 61*a*; *śrāvaṇa*, 70*a*; *bhādrapada*, (lacuna); *āśvina*, 107*a*; *kārttika*, 121*a*; *mārgaśīrsha*, 122*b*; *māgha*, 126*b*; *phālguna*, 131*b*.

It ends: नक्षत्रादियोगो दिनपूर्वार्धगतो ग्रास्य इत्युक्तं प्राक् चैत्रामावास्यामत्वादि ॥ इति श्रीमद्रामेश्वरसूनुश्रीमन्नारायणसुतश्रीमद्रामकृष्णात्मजदिनकरकृते दिनकरोद्योते वर्षकृत्यं समाप्तं ॥

[H. T. Colebrooke.]

## 1605.

**275.** Foll. 72 (numbered originally 94–102, 94–156; and then by a different hand consecutively 137–208); fairly written, in Devanāgarī, by three different hands, c. 1650 A.D.; 8-12 lines in a page.

Another section of the *Dinakaroddyota*, treating of *śrāddha* or obsequies. Probably incomplete at the beginning.

The MS. begins: अथ युग[ध]र्मः। हेमाद्रौ वासिष्ठः। ध्यानं परं कृतयुगे त्रेतायां लिंगपूजनं। ०

*Iti ... yugadharmanirṇayaḥ*, fol. 9*b*;

श्रीरामकृष्णं पितरमुमावामु(l. नु)मया समं(l. मं) ।
नत्वा दिनकरः श्राद्धकालं ब्रूते यथामति ॥ ०

Notwithstanding the different pagination, the text seems to be continuous.

It ends: एवं सत्यत्र शिष्ट एवं (l. शिष्टमेवं) प्रमाणं ॥ इति श्रीमीमांसकभट्टदिनकरकृते दिनकरोद्योते तीर्थास्थिप्रक्षेपविधिः॥

प्राचीनमार्गपरिपंथिगिरापराधं
संभाव्यमानखिलेष्वपि पंडितेषु ।
मूर्ध्नी क्षमाय करयुग्मयुतेन सर्वं
ग्रंथं व्यधाद् दिनकरः सकलागमज्ञः ॥

इति श्रीमद्रामेश्वरभट्टसूरिसूनुश्रीमन्नारायणभट्टसुतरामकृष्णभट्टात्मजभट्टदिनकरकृते दिनकरोद्योते विधानानि ॥ समाप्तो दिनकरोद्योतः ॥

Then follows what is evidently the beginning of a supplement to the work, treating of *aśauca*, by the author's son, viz. (cf. next MS.):

मीमांसैकधुरंधरः श्रुतिधरो न्याये ऽपि वागीश्वरः
साहित्यामृतसागरः सुजनतापज्ञीरसालद्रुमः ।
यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं
तेनाशौचनिबंधनो दिनकरोद्योतो ऽधुना पूर्यते ॥ १ ॥
श्रीमद्गुरुचरणानां प्रसादतो [–] मुदे सुविज्ञानां ।
श्रीमद्दिन(l. वा)करसूनुराशौचे किंचिदातनुते ॥

विश्वेश्वरापराख्यस्य गागाभट्टमनीषि[णः] । here the MS. terminates at the bottom of fol. 208*b* (72*b*).

The author's son *Gāgābhaṭṭa* is also quoted in the body of the work, foll. 39*a*, 85*a*, 179*b*, and his work *Viśveśvarī paddhati*, fol. 204*a*. Of other works quoted may be mentioned: *Nirṇayāmṛita*, foll. 67*a*, *b*, 98*b*, 100*b*; *Purāṇasamuccaya*, 88*b*; *Prithvīcandrodaya*, 63*b*, 84*b*; *Madanaratna*, 27*b*, 28*a*, etc.; *Rudrayāmala*, 95*b*, 104*b*; *Vishṇurahasya*, 71*a*, 73*b*, 108*b*, 124*a*.

The author's younger brother, *Kamalākara*, wrote his *Nirṇayasindhu* in 1611–12 A.D.

[H. T. Colebrooke.]

## 1606.

**1335.** Foll. 234 (originally numbered 1–272 on the right hand margin, of which are, however, missing 47–49, 136–143, 148–151, 197, 198, 209, 220–229, 232, 233, 235, 236, 238–241, 252–256, while three leaves have been inserted between 97 and 98); size 11½ in. by 5 in.; fairly good Devanāgarī writing of 1652 A.D.(?); twelve lines in a page.

*Vrata-Dinakaroddyota*, a digest of matters relating to voluntary fasts and penances, intended as a supplement to (or *Vratakāṇḍa* of) *Dinakara's* work, by his son *Viśveśvara Bhaṭṭa*, surnamed *Gāgābhaṭṭa*. It begins:

नीलोत्पलाभिरामं कामं साकेतबालानां ।
दशरथतोषनिधानं जगद्विदानं तदाकलये ॥ १ ॥
मीमांसैकधुरंधरः श्रुतिधरो न्याये ऽपि वागीश्वरः
साहित्यामृतसागरः सुजनतापज्ञीरसालद्रुमः ।
यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं
तेनायं व्रतगोचरो दिनकरोद्योतो ऽधुना पूर्यते ॥ २ ॥

तत्र व्रतप्रशंसा हेमाद्रौ ०

The work consists of two parts, the first of which, ending fol. 199*a*, deals with the *vratas* performed at certain fixed times in the course of the year (*dvādaśamāsavratāni*), whilst the second part treats of miscellaneous other voluntary penances (*prakīrṇakavratāni*).

From fol. 95 a different hand has re-numbered the leaves 103 etc.

At the end of the first part the date of the MS., Saṃvat 1709, occurs.

It ends: इति पराशरोक्तो जलवासविधिः ॥ इति श्रीमन्मीमांसकभट्टनारायणसूनुभट्टरामकृष्णसुतभट्टदिनकरसूनुगागाभट्टापरनामकभट्टविश्वेश्वरपूरितो व्रतदिनकरोद्योतः समाप्तः ॥

For another copy of the same work see Rāj. Mitra, Bikāner Cat., no. 831; for other supplements to the *Dinakaroddyota*, by the same author, viz. *Śūdradharmoddyota*, below, no. 1652; *Pūrtakāṇḍa*, Bikāner Cat., no. 829; *Vyavahārakāṇḍa*, ib., no. 830.

[H. T. Colebrooke.]

## 1607.

**181b.** Foll. 21; size 10½ in. by 4 in.; legibly written, in Devanāgarī; ten lines in a page.

Some portions of the *Vijayavilāsa*, by *Rāmakrishṇa.*

The MS. begins:

नत्वा श्रीपार्वतीपुत्रं सिद्धिबुद्धियुतं गुरुं ।
स्नानसंध्याविधिं कुर्वे कर्काचार्यादिसंमतं ॥ १ ॥
आलोच्य धर्मशास्त्राणि मन्वादिभिः कृतानि च ।
कात्यायनकृतं सूत्रं कर्कभाष्यं तथैव च ॥ २ ॥
भाष्यं हारिहरं चैव गदाधरकृतं तथा ।
सारमेव समुद्धृत्य स्मृतीनां वचनं तथा ।
सिद्धांतानि समूलानि विचार्य लिख्यते मया ॥ ४ ॥
स्वाभिप्रायेण हि मया न किंचिदिह लिख्यते ।
किं तु वाचनिकं सर्वमतो ग्राह्यं च सज्जनैः ॥ ५ ॥
शौचादिकाः प्रवक्ष्यामि क्रियाश्चानुक्रमेण तु ।
तिथीनामपि सर्वेषां निर्णयमप्यसंशयात् ॥ ६ ॥

योगीश्वरः ॥ यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत । °

The passage on the division of the Vaidic *śākhās* referred to by Colebrooke, Misc. E., I., p. 14 (2nd ed., p. 13), foot-note, begins fol. 2*a*:

द्वापरादौ वेदव्यासेन चतुर्भ्यः स्वशिष्येभ्य उपदिष्टास्त एव मुख्या वेदाः । तैर्व्यासशिष्यैर्विभज्य स्वशिष्येभ्यो दत्ताः शाखा इति ॥ भागवते ।

चयतीर्णो महाभाग वेदं चक्रे चतुर्विधं । ° (XII. 6, 49)

इति ° शौचविधिः ॥ अथ स्नानविधिः । fol. 5*a*. The greater part of fol. 8 is left blank. अथ प्रातः-संध्याप्रयोगः fol. 13*b*; इति प्रातःसंध्या समाप्ता fol. 15*b*.

The MS. ends: इति श्रीरामकृष्णविरचिते विजय-विलासे ब्रह्मयज्ञतर्पणविधिः ॥

[H. T. COLEBROOKE.]

## 1608.

**78.** Foll. 102 (numbered 105, foll. 39–42 being missing, and no. 51 double); size 9¾ in. by 3¾ in.; good Devanāgarī writing of about 1650 A.D. (the last leaf by a modern hand); nine, from fol. 61 ten, lines in a page.

*Mādhavaprakāśa*, or *Sadācāracandrodaya* (or *Ācāracandrodaya*), a digest of rules regarding religious observances, according to the *Vājasaneyins*, compiled by *Maheśa Śarman*, son of *Sārasvatadurga Śarman*, and pupil of (*Viṭṭhala*) *Purushottama Kavivara* of Mithilā; under the patronage of *Mādhava*, a territorial chief at Lāvapura, on the banks of the Irāvatī in Western India. Incomplete.

It begins:

गोपीवल्लभवल्लभं गुरुतमं श्रीविट्ठलं विट्ठलं
 वंदे ऽहं पुरुषोत्तमं कविवरं विद्यागुरुं मैथिलं ।
यत्पादांबुजसेवया न नितरां श्रीकृष्णसेवारतिर्
 मैत्रीसत्सु सदा सभासु विदुषां विद्याविलासोदयः॥१॥

विश्वं यत्कुरुते बिभर्ति हरते शैलूषवत्प्रत्यहं
 यच्छ्वासप्रभवा नुवंति निगमाः सांगाः ससूत्रागमाः ।
संसारार्णवतारणाय जगतां यन्नाम नौका दृढा
 तद्वंदे सहजप्रकाशममलं चैतन्यरूपं महः ॥ २ ॥

ज्ञात्वा गोकुलमर्दितं मघवता विस्मापयन् भूधरं
 धृत्वा वामकरे करीव कमलं यो ऽपादपायाद् व्रजं ।
गुंजाहारमयूरमौलिमुरलीपीतांबरालंकृतो
 गोपीलोचनचुंबितो जयते गोपालचूडामणिः ॥ ३ ॥

अस्तीरावतिरोधसीह नगरं विद्वज्जनालंकृतं
 धर्मश्रीसदनं विटंकविलसत्प्रासादमालाचितं ।
स्मृत्याम्नायविधाननित्यनिरतैर्वर्णाश्रमैः सेवितं
 नाम्ना लावपुरं पुरंदरपुरीगर्वापहं पश्चिमे ॥ ४ ॥

सेवा यत्र गुरौ हरौ च नितरां धर्मेषु कार्पण्यधीस्
 तर्के वादमतिर्गजेषु मदः सारीषु मारोक्तयः ।
बंधो वेणिषु मानितापणपथे स्नेहक्षयो दीपके
 द्वारे देवगृहस्य दंडघटना संदृश्यते नान्यतः ॥ ५ ॥

तस्मिन् राजसभासु लब्धविभवः काव्[:]कवीनां प्रियो
 ह्यासीदुप्प(? त्प)लवंशपंकजरवी राजन्यचूडामणिः ।
येनादायि हिरण्यमश्वमचला गावः सवत्सा हरेः
 प्रीत्यै विप्रवरेषु बंधुजनतावर्गेषु मानर्द्धयः ॥ ६ ॥

तत्पुत्रो ऽजनि बंधुवर्गनिरतो धर्मैकचित्तो ऽनिशं
 ब्रह्मण्यो गुरुदेवपूजनरतो नानू नरेंद्राग्रणीः ।
येनेदं कुलकैरवं विधुरुचा नित्यं विकाशीकृतं
 धर्माचारयशः प्रतापविभवैर्वर्वर्त्ति सर्वोपरि ॥ ७ ॥

जातास्तत्तनयास्त्रयः सविनया गोपीशपादाश्रया
 ज्येष्ठस्तत्र परोपकारकुशला (l. लः) ख्यातः स्म धौरी
वापीकूपतडागदेवभवनारामादिनिर्माणकृद् [ति यः ।
 दाता बंधुजनाश्रयो नृपसभालब्धैकपूजोदयः ॥ ८ ॥

तस्यानुप्रभवो बलैकविभवो दाता सदा धर्मधीर्
लोके यो भगवान इत्यभिहितो यस्यानुजो माधवः ।
रूपेणानुजगाम यो रतिपतिं भोगैः सुराणां पतिं ।
भक्त्या दैत्यपतिं नये भृगुपतिं शीले कुरूणां पतिं ॥९॥
तद्धर्मपत्नी समसूत रंगोनारायणानंतजनार्दनादीन् ।
सुतां(?l.तान्) सुराभां(?l.भान्) गुरुदेवभक्तां(?l.क्तान्)
[यथेशभक्तिर्विहिताखिलार्थान् ॥ १० ॥
तेनाचारमभीप्सता सविनयं विज्ञापितो धीमता
श्रीसारस्वतदुर्गेशर्मतनयो नाम्ना महेशः कृती ।
ग्रंथे यत्र हि माधवादिरभयत्सार्थैः प्रकाशांतकः
शब्दस्तं कुरुते हिताय जगतामाचारचंद्रोदयं ॥ ११ ॥

अथास्यानुक्रमणिका समासेनैव कथ्यते । ° here follows an analysis of the eight chapters of which the work consists. The MS., however, breaks off abruptly in the 4th *pariccheda*, at the bottom of fol. 104*b*. An additional page, by a modern hand, has supplied some sort of conclusion with the colophon:

इति श्रीमहोपाध्यायश्रीसारस्वतदुर्गेशर्मतनयमहेश्वरविरचिते आचारचंद्रोदयनामको ग्रंथः संपूर्णः ॥

The colophon of the other chapters runs thus: इति श्रीमाधवप्रकाशे महेशकविदर्शिते सदाचारचंद्रोदये ° परिच्छेदः ॥

Of rarer and comparatively recent authorities have been noticed: *Ācāracintāmaṇi*, fol. 79*a*; *Karmapradīpa*, fol. 15*a*; *Kalpatarukāra*, fol. 12*a*; *Dharaṇikosha*, fol. 104*b*; *Smṛitisāra*, foll. 45*a*, 103*b*.

For a complete MS. of the work see Rāj. Mitra, Notices, V., p. 97.

[H. T. Colebrooke.]

## 1609.

**1251a.** Foll. 71; size 9 in. by 4 in.; fairly written, in Devanāgarī; ten, sometimes nine, lines in a page.

*Ācārapradīpa*, or *Ācāradīpa*, a manual of common every-day religious observances, by *Nāgadeva*.

It begins:

चंचच्चासपुटस्फुटाभिनयनव्यग्राग्रपादाहति-
क्षुभ्यन्नूपुरमंजुलध्वनिमिलत्क्वाणात् स्खलत्कंकणं ।
शुंडादंडविघट्टितोडुकुसुमैर्व्योमांगणं मंडयन्
संध्याताडवडंबरं विरचयन् भूत्यै गणेशो ऽस्तु वः ॥ १ ॥
उक्तो वाजसनेयेन याज्ञवल्क्येन धीमता ।
आचारो द्विजवर्याणां सुबोधः कथ्यते ऽधुना ॥ २ ॥
तत्र दक्षः । प्रातरुत्थाय कर्तव्यं यद्द्विजेन दिने दिने ।
तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकं ॥ ३ ॥ °

इति ° आचारप्रशंसा fol. 2*a*; ° आत्मचिंतनं fol. 2*b*; ° सुप्रभातविधिः fol. 3*a*; ° मूत्रपुरीषोत्सर्गविधिः fol. 3*b*; शौचविधिः fol. 5*a*; आचमनविधिः fol. 6*b*; दंतधावनविधिः fol. 7*b*; यज्ञोपवीतविधिः fol. 8*a*; प्रणवविधिः, शिखाबंधन ° fol. 10*a*; प्राणायाम ° fol. 11*a*; ° स्नानविवरणं fol. 19*b*; मालापकर्षणं fol. 20*a*; तिलकप्रकरणं fol. 22*a*; प्रातःसंध्याविधिः fol. 33*a*; अभिवादनविधिः fol. 34*a*; प्रातर्होमविधिः fol. 35*a*; नित्यदान ° fol. 36*b*; मंगलावेक्षण ° fol. 37*a*; अध्ययनविधिः fol. 39*b*; प्रतिग्रहाधिकारनिरूपणं fol. 41*a*; मध्याह्नस्नानविधिः fol. 45*a*; ब्रह्मयज्ञविधिः fol. 46*b*; स्थलतर्पणं fol. 48*b*; जलदेवतार्चन ° fol. 51*b*; गृहदेवतार्चन fol. 52*b*; पंचमहायज्ञविधिः fol. 58*b*; भोजनविधिः fol. 63*b*; सायंसंध्याविधिः fol. 64*a*; उपशयनविधिः fol. 65*a*; स्त्रीगमनविधिः fol. 65*b*; योगप्रकरणं fol. 67*a*; स्पृष्टास्पृष्टविधिः fol. 68*b*.

Colophon: इति द्रव्यशुद्धिप्रकरणं ॥ इति श्रीउपाध्यायनागदेवविरचिते आचारप्रदीपे अष्टमो ऽध्यायः ॥ आचारप्रदीपः समाप्तः ॥ संवत् १८३५ ॥

[H. T. Colebrooke.]

## 1610.

विश्वेश्वरेण मुनिना संगृहीतानि भागश: ॥

यतिधर्मप्रकाशाय ज्ञानमोक्षप्रसिद्धये ।
एकत्र(!) परमहंसानां मुमुक्षूणां विशेषत: ॥

इति परमहंसपरिव्राजकविश्वेश्वरसरस्वतीसंगृहीते यतिधर्मसमुच्चये नित्याद्याचार: ॥

यतीनां प्रेतसंस्कारविधिं व्याख्यास्याम: fol. 72a.

It ends: अहं ब्रह्म भोक्ता ब्रह्म अन्नं ब्रह्म ॥ ब्रह्मार्पणं ॥ गीतापाठ: ॥ तेषां वस्त्रालंकरणं दद्यात् ॥ इति नारायणबलि: समाप्त: ॥

Among the authorities cited by the author, are the following:—*Prayogasāra*, fol. 62a; *Medhātithi*, 17a, 37a, 45a, etc.; *Yatidharmasamuccaya*, 19b, 48a, 54a, 55a (cf. also fol. 72a, above); *Vāsudeva*, 72b; *Vyāsasūtra*, 29b, 42a; *Śaṅkarācārya*, 26b; *Śivagītāḥ*, 24a; *Shaṭtriṃśanmata*, 5a; *Sureśvarācārya*, 26b, 42a; *Smrityarthasāra*, 4a.

For another MS. of this treatise (*yatidharmasamuccaya*), see Rāj. Mitra, Notices, V., p. 75; for another treatise on the same subject, entitled *Yatisaṃskāraprayoga*, by the same author, ib., I., p. 173.

[H. T. COLEBROOKE.]

## 1644.

**1696d.** Foll. 40; size 9½ in. by 3¾ in.; fairly written, in Devanāgarī, towards the end of the last century; nine lines in a page.

The same treatise. Incomplete.

It ends: इति श्रीपरमहंसपरिव्राजकविश्वेश्वरसरस्वतीविरचिते परमहंसपरिव्राजकधर्मसंग्रहे ज्ञानांतरं धर्मसंग्रह: (fol. 29b of preceding MS.) ॥

[H. T. COLEBROOKE.]

## 1645.

**1563.** Foll. 93; size 11 in. by 6½ in.; good, old Devanāgarī writing; 11–16 lines in a page.

*Yati-Siddhāntanirṇaya,* a very similar treatise on the same subject, by *Saccidānanda Sarasvatī.*

Unless the authors are the same, one of them has plundered the other wholesale.

It begins:

नमस्कृत्य गणाधीशं स्वाधारस्थितमीश्वरं ।
वक्ष्ये सारतरं शास्त्राद् यतिसिद्धांतनिर्णयं ॥ १ ॥
सच्चिदानंदयतिना क्रियते वेदमानतः ।
यतेः परमहंसस्य धर्माणामेव संग्रहः ॥ २ ॥

तत्रादौ सन्यासाश्रमकालनिर्णयः ॥ ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेदिति जाबालश्रुतिविहितः ॥ अव्यवस्थितविकल्पो ऽपि गृहाद्वा वनाद्वेति ॥ आरुण्युपनिषदि च ॥ गृहस्थो ब्रह्मचारी वानप्रस्थो वा लौकिकाग्नीनुदराधीयाग्नौ (?l. °उदराग्नौ) समारोपयेदिति °

इति ° संन्यासग्रहणादिसर्वेषां कुटीचकादीनां संमिश्रितसकलधर्मसंग्रहः प्रथमोद्देशः fol. 29*b*; इति ° नित्याचारो द्वितीयः । 63*a*; इति ° निबंधक्रमरचनाप्रकारः समाप्तः ॥ यतिधर्मं संपूर्णं ॥ 80*a*; इति ° संन्यासग्रहणविधिः 84*b*; इति ° कुटीचकादिचर्यायां शौचादिविधिः 89*a*; इति ° परमहंसविधिः 91*a*.

It ends: इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्सच्चिदानंदसरस्वतिना संगृहीते यतिसिद्धांतनिर्णये यतेः प्रेतसंस्कारः क्रमः समाप्तः ॥ सन्यासर्वं पूर्ववत् ॥ इति श्रीसीद्धांतसारसमस्त संपूर्णं ॥ ° ॥ संवत् सके पंद्धारावरषे(!) नलनामसंवत्सरे। पूस वदी वारतीय रवीवार शममी(!) संपूर्णं ॥

[H. T. COLEBROOKE.]

## 1646.

**1062.** Foll. 34; size 6⅜ in. by 3 in.; clear Devanāgarī handwriting of the latter part of the last century; seven lines in a page.

*Saṃnyāsi-paddhati,* a manual for religious mendicants of the *Vaishṇava* sect.

It begins: अथ संन्यासग्राह्यपद्धतिः ॥ प्रथमे गृहमातापिताभ्राताभगिनीपुत्रं प्रार्थयति। हो सर्वपरिवाराः अहं संन्यासं करोमि। तदनंतरमात्मगृहग्रामादि प्रदक्षिणा कृत्वा तत्र ग्रामांतरं गत्वा क्रोशप्रमाणं । तत्र स्नानं कुर्यात्। देवार्चनादिकं कृत्वा । देवपित्रादिस्मरणं कृत्वा । पुनर्गुरुदर्शनं कुर्यात् °

इति संन्यासप्रार्थनविधिपद्धतिः fol. 3*a*; इति दशनामसंन्यासः 4*a*; इति तर्पणप्रयोगः 5*b*; इत्यष्टश्राद्धविधिः 7*b*; इति यज्ञोपवीतिमंत्रः 12*a*; शिखाहोममंत्रः 12*b*; दीक्षामंत्रः 13*b*; परिव्यामंत्रः 15*a*;-- इति चत्वार संध्याया विधिः 22*a*;-- इति श्रीदत्तात्रेयविरचिते महाज्ञानयोगपटं संपूर्णं । अथाश्रमविवेक लिख्यते 31*b*; इति श्रीमच्छंकराचार्यविरचितं समस्तसूत्रदीक्षासारविवेकः । अथ संकल्पमाह । 33*a*.

It ends: वेदऋषिपितृतर्पणादि शुभकर्म श्राद्धाष्टकं कृत्वा वीर्याहोमपूर्वकं संन्यासग्रहणमहं करिष्येति(!) संकल्पः ॥ इति समस्तमहावाक्यार्थविधिपूर्वकं पंचीकरणं समाप्तं ॥

[H. T. COLEBROOKE.]

## 1647.

**619a.** Foll. 16; size 9½ in. by 4 in.; fair Devanāgarī writing; 12 or 13 lines in a page.

*Yatisaṃskāravidhinirṇaya,* an exposition of the purificatory ceremonies prescribed for ascetics.

There are some *lacunæ,* especially after fol. 7*a* (when a fresh paging begins), on fol. 8*b*, and 12*a*.

The MS. begins: यतिसंस्कारविधिः ।

सिद्ध्यनंतरं पुत्रादिः शिष्यो वा स्नात्वा अधिकारसिद्ध्यर्थं वपनसूत्रावरणे कृत्वा देशकालौ संकीर्त्य ब्रह्मीभूतं नारायणरूपिणं भिक्षुं शौनकोक्तविधिना संस्करिष्य इति संकल्पाव्रणं नवं कलशमानीय तीर्थोदकेनापूर्य तदुदकं ॥

गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिंधु कावेरि जले ऽस्मिन् सन्निधिं कुरु ॥
यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयते ऽपि वा ।
अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

नारायणः परं ब्रह्म तत्त्वं नारायणः परः । °

इति यत्यौर्ध्वदेहिकविधिः । fol. 2*b*; °बौधायनशौनकयमस्मृत्यनुसार्याचारानुगृहीतो नारायणबलिप्रयोगः । 6*a*;

० नागरखंडानुसार्याचारानुगृहीत स्वाराधनप्रयोगः। 7*b*; यागकालः। 10*a*.

It ends: सर्वं कुर्वतः अश्वमेधादिफलं। इति यतिसंस्कारविधिनिर्णयः समाप्तः। सं १७२५ ॥

[H. T. Colebrooke.]

## 1648.

**554.** Foll. 103; size 13 in. by 4½ in.; fairly, written in the Bengalī character, in Śaka 1710 (A.D. 1788); nine lines in a page.

*Ācāracandrikā*, a compendium of the duties of *Śūdras*, by *Śrīnātha Ācāryacūḍāmaṇi*, son of *Śrīkarācārya*. The *pūrvakhaṇḍa*.

It begins:

विचार्य मन्वादिमुनीन्द्रसंहिता
  हिताय यत्कर्मनिविष्टचेतसां।
आचार्यचूडामणिना वितन्यते
  तुरीयवर्णाखिलकर्मपद्धतिः॥

आचारचन्द्रिका चित्तकुमुदामोददायिनी।
भूयात् परगुणानन्दश्रीजुषां विदुषामियं॥

अत्र यद्यपि विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते। यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निष्फलमिति मनुवचनाद्विप्रसेवाव्यतिरिक्ते कर्मणि शूद्रस्य फलाभावादप्रवृत्तिरेवावगम्यते। तथा तत्संहितापुराणादिषु शूद्राणामपि कर्मविशेषेषु शौचाचमनपञ्चयज्ञादिष्वधिकारश्रुतेरन्यथापि प्रवृत्तिरनुमीयते। मनुवचनस्य तु विशिष्टं प्रकृष्टं निष्फलमल्पफलं फलशून्यमेवेति व्याख्यानमिति पारिजातकारादयः। ०

अथ शूद्राणां संक्षेपतो विहितनिषिद्धकर्माणि fol. 2*a*; अथाचमनविधिः 9*a*; अथ दंतधावनं 16*a*;—अथ भोजनप्रयोगः 45*b*; अथ स्त्रीसंयोगः 55*a*; इति साह्निकविधिः समाप्तः। इदानीमन्त्येष्ट्यादिसकलौर्ध्वदेहिकविधिनिरूपणमारभ्यते। 57*b*; अथ वृषोत्सर्गः 91*a*.

It ends: इति महामहोपाध्यायश्रीमच्छ्रीकराचार्यात्मजश्रीमच्छ्रीनाथाचार्यचूडामणिकृतायामाचारचन्द्रिकायां पूर्वखंडः समाप्तः॥

शाके चिन्हेन्दुसिन्धुग्रौमाने श्रीशिवशर्मणा।
अलेखि काशियासिश्रीमनसाचारचन्द्रिका॥

For the author's *Śrāddhacandrikā*, see no. 1734, his commentary on *Jīmūtavahana's Dāyabhāga*, no. 1513. [H. T. Colebrooke.]

## 1649.

**2515.** Foll. 147; size 11 in. by 4 in.; excellent Devanāgarī writing of about 1550 A.D.; 7 or 8 lines in a page.

*Smṛitikaumudī*, an exposition of the religious duties of *Śūdras*, composed (by *Viśveśvara*) under the patronage of *Madanapāla*.

It consists of four books (*kalollāsa*) of 2, 4, 5, 5 chapters (*kiraṇa*) resp.

For the introduction नमः सकलकल्याणकारणाय० see Aufrecht, Cat. Bodl., no. 653.

It ends:

जयत्यखिल[–◡–]भुवनगीतकीर्तिः सुत[:]
  महाराण(?r. महारण or सधारण)महीपतेर्मदनपाल-
    [पृथ्वीपतिः।
अनेन कृतिना कृता स्मृतिपदाङ्किता कौमुदी
  महार्णवसहोदरी मदनपारिजातानुजा॥

इति श्रीकृतिमनोहरायां कौमुद्यां श्रीमदनपालराजेंद्रोः आम्नायकलोल्लासे पंचमः किरणः समाप्तोयं॥

For other MSS. of this work, see Burnell, Tanjore MSS., p. 133*b*; Rāj. Mitra, Bikāner Cat., p. 466. [H. T. Colebrooke.]

## 1650.

**2514.** Foll. 179; size 10½ in. by 5 in.; clearly written in Devanāgarī, about the middle of last century; nine lines in a page.

*Śūdradharmatattva* (or *Śūdrakamalākara*), a compendium of the religious duties of the fourth caste, by *Kamalākara Bhaṭṭa*, son of *Rāmakrishṇa Bhaṭṭa*. It begins:

प्रणम्य रामं पितरौ कमलाकरशर्मणा।
रामकृष्णतनूजेन शूद्रधर्मो निरूप्यते॥

तत्र शूद्रत्वमूढसवर्णाजत्वं विप्रत्वादिवत्। यद्यपि सगोत्रकालीने विश्वामित्रादौ च नैतत्तथापि तत्रादृष्टविशेषारब्धशरीरत्वमेव ब्राह्मणत्वमन्यत्र तु पूर्वोक्तमेवं शूद्रेऽपीति दिक्। ०

For an analysis of the work, see Aufrecht, Cat. Bodl., no. 654.

According to Rāj. Mitra, Cat. of Bikāner MSS., p. 499, this treatise forms part of *Kamalākara Bhaṭṭa's* General Digest of Law, entitled *Dharmatattva-Kamalākara*, consisting of the following ten sections:—1. *Vratakamalākara;* 2. *Dānak.;* 3. *Karmapāka;* 4. *Śāntikam.* (or *Śāntiratna*, see no. 1741); 5. *Pūrtak.;* 6. *Ācārak.;* 7. *Vyavahārak.;* 8. *Prāyaścittak.;* 9. *Śūdradharma(tattva);* 10. *Tīrthavidhi.* — See also the author's *Saṃskārakamalākara* above, no. 1630.

The author wrote his *Nirṇayasindhu* in 1611–12 A.D. [GAIKAWAR.]

## 1651.

**1444.** Foll. 89; size 12 in. by 4 in.; legibly written, in Devanāgarī, in 1801 A.D.; ten lines in a page.

The same work. [H. T. COLEBROOKE.]

## 1652.

**2800.** Foll. 173, the first of which is missing; size 9 in. by 4 in.; indifferent Devanāgarī handwriting; eight lines in a page.

*Śūdra(dharma)-uddyota*, another treatise on the duties of *Śūdras*, by *Viśveśvara Gāgābhaṭṭa*, son of *Dinakara Bhaṭṭa*, and nephew of *Kamalākara Bhaṭṭa*.

The treatise is intended as a supplement to *Dinakara's Dinakaroddyota* (see no. 1606).

The second leaf begins: ति चतुष्कान्यतमत्वं भातिचतुष्यव्यापकजात्यंतरं वा ०

इति प्रतिलोमषट्कं fol. 3*b*; इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टसूनुगागाभट्टापरनामकविश्वेश्वरभट्टकृते शूद्रधर्मे जातिविवेकनिरूपणं 22*a*; इति ० शूद्रधर्मनिरूपणे सामान्यधर्मनिरूपणम् ॥ विश्वेश्वरेण विदुषा नत्वा श्रीराममादरात्। निरूप्यंते च शूद्रस्य संस्कारा गुरुमार्गतः ॥ 35*a*; इति ० शूद्रसंस्कारनिरूपणं 38*a*; इति ० शूद्रधर्मे पुण्याहवाचननांदीश्राद्धादिविधिः 43*a*; इति ० शूद्रनांदीश्राद्धप्रयोगः 50*a*; इति गागाभट्टकृतशूद्रकृत्ये सर्वहोमसाधारणविधिनिरूपणं 51*a*; इति गर्भाधानं 51*b*; इति पुंसवनं 52*a*; इति जातकर्म 53*a*; इति नामकर्म 56*b*; इति ० शूद्रविवाहप्रयोगः। अथ संस्कारत्वाच्छूद्रात्येष्टिप्रयोगः 78*b*;—इति तर्पणविधिः। अथ शूद्रस्य देवापूजाविधिः 126*a*; इति ० शूद्रधर्मनिरूपणे सकलाह्निकोपयोगिविचारः। अथ शूद्राह्निकप्रयोगः 134*b*; इति ० प्रातःकृत्यं 137*a*; इति ० शूद्रोद्योते देशाचारानुरोधेन शूद्रस्य नित्यतर्पणप्रयोगः 144*b*; इति ० विश्वेश्वरपूरितदिनकरोद्योते शूद्राह्निकनिरूपणं। ० अथ शूद्रश्राद्धमिहोच्यते 161*a*.

It ends: इति श्रीगागाभट्टपूरितशूद्रोद्योते श्राद्धोपयोगिनिर्णयः शूद्राशौचे अन्ये विशेषाश्चास्माभिर्दिनकरोद्योताशौचकांडे (Rāj. Mitra, Notices, II., p. 114) कृत्स्नप्रपंचिता इत्यलमतिविस्तरेण [॥] इति श्रीमद्विद्वन्मुकुटरत्नसन्माणिक्यमरीचिमंजरीपुंजपंजरितपदद्वंद्वारविंदश्रीमद्रामेश्वरभट्टसूरिसूनुश्रीमन्नारायणात्मजश्रीमद्रामकृष्णभट्टतनयजगद्गुरूधौरेयमीमांसावतंसदिनकरतनूजगागाभट्टापरनामकविश्वेश्वरभट्टपूरितदिनकरोद्योते शूद्रधर्मनिबंधः समाप्तः० मार्गसुदि १४ रवौ संवत् १८५७ ०

[?]

## 1653.

**3009m.** Foll. 31; size 13 in. by 8 in.; good Devanāgarī writing of A.D. 1830; European paper; fifteen lines in a page.

*Kāyasthadharmadīpa*, a manual of rules of conduct for men of the *Kāyastha* caste, by *Viśveśvara Gāgābhaṭṭa*.

From the political allusions, in the introduction, to the emperor *Aurungzebe* (*Avrañjeva*) and to *Śivajī* of Rājagiri (? Rājagṛiha), the founder of the Maratha power, the work would seem to have been composed about 1660 A.D.

It begins:

सिंदूरं नयनं तृतीयकमतिश्यामं गलं कज्जलं
 स्वच्छांगं मुकुटं निशाकरकलामाभुग्नमुक्तासनं।
गंगांबूनि निबद्धपिंगलजटावेटीस्थिता मालतीर्
 बिभ्राणो गिरिजामिवार्चितुमसौ देवः शिवायास्तु वः [॥ १ ॥
या वीतिहोत्रजननीच[र]वेष्टिता पि-
 प्पल्या सरोजसुहृदात्मभुवा सहैव।
संसेवते मलयचंदनगंधवाहं
 तस्यां हरित्यहह राजगिरिस्त्वकास्ति ॥ २ ॥

तत्रास्ति राजनगरी शिवराजधानी
 यत्सौधशेखरगताश्चटकाः प्रभाते ।
पारावता अपि च तांडवयंति तुंडं
 तारासु तंडुलधियाप्य(?l.च) निवर्तयंति ॥ ३ ॥

तत्राभवच्छाहनराधिराजः स क्षत्रधर्मस्य नवावतारः ।
सुरद्रुपुष्पोच्चयकामिनीभिः संगीयते यस्य यशःप्रशस्तिः
 [॥ ४ ॥
कादंबिनीव जनजीवनदानहेतुः
 सौदामिनीव सकलारिविनाशनाय ।
आलंबिनी भवति राजगिरेरिदानीं
 जीजाभिधा जयति शाहकुटुंबिनी सा ॥ ५ ॥

तात्पुण्यराशिरभवच्छिवराजनामा
 यस्य प्रतापसविता क्रमते दिगंतं ।
अस्तोदयाचलपरार्धभुवि स्थितानाम्
 उद्योतपारणमिवाकलम्भिलानां ॥ ६ ॥

प्रतापतपनो महत्प्रकुरुताह्निनं ब्रध्नः
 पराभवितुमीहतामपरकीर्त्युडूनि क्षणात् ।
इदं तु महदद्भुतं दहति सातपत्रानयं
 न तापयति यैः स्वकं कृतमनातपत्रं शिरः ॥ ७ ॥

दृप्योत्तीर्ण्यद्यवनदितिजो क्षौतिदानाय लोक-
 त्राणायोग्रो बहुलकरुणासिंधुराशिर्वभूव ।
मन्ये यस्माद्बहलदितिजाधीशवक्षो विदार्य
 स्थाने स्वीये निखिलविबुधान्स्थापयामास भूयः ॥ ८ ॥

द्यावापृथिव्योर्हि समिद्धवत्योर्
 धाय्येव मध्ये किल यस्य कीर्तिः ।
दिल्लीश्वरक्रोधधनंजयस्य
 प्रकाशयत्याशु समिंधनं या ॥ ९ ॥

यस्योत्पत्तिस्त्रिदशभवने दुंदुभिध्वानकल्पा
 को[ऽ]पि स्पष्टो यवनभवनेंद्रादिनीपात रुपः ।
नामश्चैवं सकृदपि जपो [ऽ]व्रंगजेबस्य कंपोत्-
 कर्षं नित्यं जनयति चिरं जीवताच्छाहसूनुः ॥ १० ॥

स्वेमालंबीभवति भगवान्भानुमान्(?l.मा)कविद्यत्
 गेहारंभीभवति गहने दाववैश्वानरो ऽपि ।
किं चाप्यश्वावदमजनितः सागरे मज्जते यत्
 सो ऽयं सर्वो जयति महिमा यत्प्रतापानलस्य ॥ ११ ॥

यत्र क्षात्रनियाय भार्गवभयत्रस्तं परं विभ्रमं
 वंशो [ऽ] 'गमहीपतेरपि महान्यस्मिन्प्रतंगायितः ।
यन्नाम त्रिदशास्यहतिपटुतात्रासीभवद्भावना-
 वक्षोणोपमितोष्णभूतहृदयो वर्वर्ति दिल्लीश्वरः ॥ १२ ॥

मयातवगिरेर्भृगु(?) भजति गोलकुंडाधिपः
 स दक्षिणदिगीश्वरं श्रयति दक्षिणाशाधिपः ।
महापथमुपासितुं हिमगिरिं च दिल्लीश्वरः
 शिवो [ऽ]यमवमन्यतां जयति राजराजश्रिया ॥ १३ ॥

स्वपुर्ध्वयशंकया सुमेरुर्
 वपुरर्धव्ययशंकितैरमेयः ।
मुदशान्व्यवधाय भूभृद्यीन्
 मृजतः स्वानि शिवाय दीपयंती ॥ १४ ॥

त्वयि दित्सति याचकान्धनेशान्
 ददति त्वय्यथ वीक्ष्य ब्राह्मणेशान् ।
शिवराजनिजाभिभूतिभीत्या
 स्वयमाशांबरतामगान्महेशः ॥ १५ ॥

पीताः शास्त्रमहार्णवा भसितता प्राप्ताः समुल्लासिता
 विश्वं भानुमतेव दीपितमिदं कार्त्स्न्येन लब्धा श्रुतिः ।
नष्या सृष्टिरकारि सृष्टिविरहे जाता द्विजौघाः क्षमा
 वासिष्ठी त्वयि जामदग्न्यसदृश त्वय्येव संभाव्यते ॥ १६ ॥

समस्तसामंतकिरीटरत्नानुबिंबिता यच्चरणार्धरेखा ।
सीमंतिनीनां समुवाच तेषां सीमंतसिंदूरशिरस्थरत्नं॥१७॥

दानोद्यते यत्करपद्मगर्भे रत्नप्रभासे वुलितांबुदर्भे ।
कल्पद्रुदेशः सुरसुंदरीणां संप्राप संकेतनिकेतनत्वं ॥ १८ ॥

पुरा निविडगर्जनैर्भृशमपाकृतं यैर्घनैर्
 जितं सखि मया स तान् प्रियतमो गृहीत्वा गतः ।
विलोक्य गजसंवृतं पतिमुपेत्मारादिदं
 वदंति सकुतूहलं पुनरहो यदर्थिप्रियाः ॥ १९ ॥

अकब्बरकुलोद्भवादुदिततापसंतापिता
 दिवाकरकरा दिवप्रार्थितकीर्त्युपप्रादपि ।
यदंबुवहगर्जितश्रवणनिश्चयात्ते ऽधुना
 तपक्षयविनिश्चयात्परमनिर्वृतिं भेजिरे ॥ २० ॥

विधाने दीनानां श्रियमिह ददाने धनकृतां
 लसद्गर्भे यस्य स्फुरति करगर्भे मृतमति(?) ।
हरेरेषा योषा सपदि कमला हंत कमलाद्
 उपेत्यैतद्भिक्षावधिवसति लक्ष्याधिकधने ॥ २१ ॥

अवरंगजेबयवनाधिपभीतविप्र-
 त्राणाय यः परिगृहीतनवावतारः ।
अन्यो ऽस्ति वा मलयभूवलयात्समुद्रा[त्]
 सुत्रामभीतगिरिरक्षणदीतककः(?गिरिरीक्षणदीनकर्कः)
शिम्भुगवंशोद्भववीरसंधे [॥ २२ ॥
 यः क्षत्रजातिं प्रकटीचकार ।
विजित्य सर्वान्धरणीपतींश्च
 यो ऽधारयच्छत्रमपावदातं ॥ २३ ॥

अज्ञानसिंधौ पतितान्स्मृतौघ
समुद्धाराज्जैनया सकृत्या ।
वेदाब्धिमग्नानुदधौ युगादौ
यथैव विष्णुः कमठः स्वरूपः ॥ २४ ॥

कायस्थप्रभुवंशजः समभवत्तस्य प्रधानो धिया
बालाजीति समस्तकार्यैकरणोदारो महोत्साहकृत् ।
यस्याज्ञामुपयाति राज्यमखिलं सामाद्युपायैः स्फुटैर्
नीत्याद्यैश्च सुगोपितैरपि रिपून्संबाधते ऽहर्निशं ॥ २५ ॥

सावर्जि(?)प्रभुतो मनीषया
यो मनीषिगणनाम्यतामियात् ।
किं च पैमणशिरोपिधिकृतिं(!)
नीतिमार्गगधिया स्वयाकरोत् ॥ २६ ॥

तेन श्रीशिववर्मणा नृपतिना स्वाध्यक्षतां प्रापितो
बालाजी समकारयच्छुभमतिः कायस्थधर्मोदयं ।
मीमांसार्णवसारगामिव च सा विश्वेश्वरेणादरात्
गागाभट्टपराभिधेन सुकृतानुष्ठानसंसिद्धये ॥ २७ ॥

ततो निबंधानवलोक्य भूयो भूयश्च हेमाद्रिमतं विचिंत्य ।
कायस्थधर्माचरणप्रदीपं गागाभिधस्तं प्रकटीचकार॥२८॥

ब्रह्मांडास्कंदडाच(l. च) श्रीबल्लालप्रभेच्छया ।
कायस्थधर्मदीपो ऽयं गागाभट्टेन निर्मितः ॥ २९ ॥

नत्वाभीरकिशोरं चोरं विद्युद्वतो ऽप्यभिख्यायाः ।
कायस्थधर्मदीपं गागाभट्टस्तनोति लीलातः ॥ १ ॥

गागाभट्टपराख्यस्य विश्वेश्वरमनीषिणः ।
सुमनोमानसे शर्म मम निर्मातु निर्मितः ॥ २ ॥

तदुपोद्घातत्वेन सादौ जातिनिर्णयः क्रियते॥ तत्र चातुर्वर्ण्य-प्रयोजकमाह याज्ञवल्क्यः ॥ ०

इति कायस्थाचारदीपिकायां जातिविवेकनिरूपणं ॥
गागाभट्टेन विदुषा नत्वा श्रीराममादरात् ।
जातिं विविच्य संस्कारः कायस्थानां निरूप्यते ॥

कायस्थभेदकथनं तद्धर्मनिरूपणं ॥ निरूपणं च पद्मपुराणे रेणुकामाहात्म्ये ॥ ० fol. 10*a*; इति गागाभट्टकृते कायस्थधर्मदीपे सामान्यधर्मनिरूपणं ॥ fol. 12*b*; इति ० संस्कारनिरूपणं ॥ fol. 15*b*; इति ० स्वस्तिवाचनविधिः fol. 16*b*; इति ० पुण्याहवाचनादिप्रयोगः fol. 21*b*; इति ० सर्वहोमसाधारणप्रयोगः fol. 22*b*; इति ० नवग्रहमखप्रयोगः fol. 26*a*; इति गर्भाधानं । ० पुंसवनं । ० अनवलोभनं । ० सीमंतः । fol. 27*b*; ० जातकर्म । ० षष्ठीपूजा । fol. 28*a*; इति दशकपुत्रविधिः fol. 28*b*; इति नामकर्म । ० दोलारोहः । ० कर्णवेधः । fol. 29*a*; ० उपवेशनं fol. 29*b*; ० अन्नप्राशनं fol. 30*a*.

It ends: इत्यब्दपूर्तिप्रयोगः ॥ [?]

## 1654.

**411.** Foll. 393 (fol. 162 of which is missing); size 12¾ in. by 5¾ in.; clear, modern Bengali handwriting; eight lines in a page.

*Varshakaumudī*, a calendar of religious observances enjoined for the different days of the lunar year, by *Govindānanda Āċārya*, son of *Bhaṭṭa Gaṇapati*. The treatise forms a section of the author's *Krityakaumudī*.

It begins:

चिन्ताश्मीयति धातरि व्रजवधूचित्तेषु पाशीयति
स्वारान्नि स्तुवति प्रसादविहितश्यामायुनन्मीयति ।
यस्त्राञ्जनचातुरो जलधिजावक्त्राम्बुजे ऽलीयति
क्षोणीभारहराय यादवकुलोत्तंसाय तस्मै नमः ॥ १ ॥
धुनोतु ध्वान्तमस्माकममतश्चिन्ताभिसंभृतं ।
गोविन्दवदनोद्भूत्याव्जन्यजयध्वनिः ॥ २ ॥
येन ज्योतिषपङ्कजेषु नितरां मार्तण्डविलायितं
श्रीगोविन्दपदारविन्दयुगले लीलामरालायितं ।
वेदान्तस्मृतिसंततिविषयगोन्मेषे हि मात्रीयितं
केषां नोपरिशीलितो गणपतिर्भट्टः स तादृग्विधः॥३॥
तत्तनुजन्मा विदुषामनुरागमधूलिकाभिरासिक्तः ।
मधुरिपुपदारविन्दश्रद्धामृतमाधुरीरसाभिज्ञः ॥ ४ ॥
कालोच्याखिलसंग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यगयो विविच्य मुनिभिर्मन्वादिभिः संहिताः।
श्रीमत्तातपदारविन्दविलसद्धूलीभवोद्देशतः [॥ ५ ॥
श्रीगोविन्दकविः करोति ललितां वर्षक्रियाकौमुदीं

अथ संवत्सरकृत्ये निरूपणीये प्रायशः कर्माधिकरणतया विहितायां तिथीनां प्राधान्यात् प्रथमं तावत्तिथिस्वरूपनिरूपणपूर्वकं कर्मोपयुक्तभागा निरूप्यन्ते । ०

It ends:

गोविन्दानन्दकृतिना कृतेयं वर्षकौमुदी ।
इमां – – – भजन्तु कृतकृत्यतां ॥
सर्वान्तर्यामिने तस्मै गोविन्दाय नमो नमः ।
यत्कृपा विदुषामस्यामनुरागप्रवर्तिनी ॥

इति श्रीगोविन्दानन्दाचार्यकृता वर्षकौमुदी समाप्ता ॥

Then follow five leaves containing a table of contents in parallel columns.

For the author's *Śuddhikaumudī*, see no. 1744; his *Arthakaumudī*, (MS. 493), further on (Astronomy). [H. T. COLEBROOKE.]

## 1655.

**2705.** Foll. 131 (the first of which is missing), paged (1)–262; size 8½ in. by 7½ in.; 4to.; modern Telugu handwriting; 13–18 lines in a page.

*Kālādarśa*, a treatise on the times and seasons suitable for the performance of religious rites, by *Āditya Bhaṭṭa* (also called *Kavivallabha*, disciple of *Viśveśvarācārya*).

A MS. described by Rāj. Mitra, Notices, VII., p. 243, begins:

ब्रह्मादयो यदङ्गगा युगादिकालप्रभेदाश्च यदीयभेदाः ।
कालात्मकं सानतकमूर्तये ऽहं नित्याय तस्मै नियतं नतो [ऽस्मि ॥ १ ॥ °

विश्वेश्वराचार्यपदारविन्दप्रणामविस्तारितवाग्विलासः ।
आदित्यसूरिः स्मृतितत्त्वदर्शी कालं विनिर्णेष्यति मन्दबुद्धे [॥ ३ ॥

The present MS. begins: °स वृद्धिविधिस्तूपेता-स्त्विकादिविषयस्तदुत्तरत्र विविच्यते । षट्त्रिंशन्मते ऽप्युक्तं ।

त्रिमुहूर्तापि कर्तव्या या तिथिर्वृद्धिगामिनी ।
षण्मुहूर्तेन कर्तव्या या तिथिः क्षयगामिनी ॥

On the fly-leaf, and outside, the work is wrongly marked as *Kālamādhavīya*.

इति कालादर्शे एकादशीप्रकरणं समाप्तं ॥ अथ पर्वनिर्णयः । fol. 53*a*; इति ° महालयनिर्णयः fol. 66*a*; इति ° अष्टकानिर्णयः fol. 67*a*; इति ° अलभ्ययोगप्रकरणं fol. 113*a*.

P. 146*a*:

दृष्ट्वा पुरातनपुराणवचांस्यशेष-
मन्वादिकस्मृतिवचांसि विविच्य तत्त्वं ।
सांवत्सरागमवचांसि च कालतत्त्वं
निर्णीयते स्म कृतिना कविवल्लभेन ॥

इति श्रुतिस्मृतीतिहासपुराणमीमांसादिविद्यार्थमाणानितय - विकारनिर्णयेत्यर्थः ॥ इति कालादर्शे यज्ञकालनिर्णयप्रकरणं समाप्तं ॥

कौविदाकृतदितयः (?1. कौविद्यकृतवितयाः) कवि-
विज्ञापनं शृणुत लोकचितप्रणामाः । [वल्लभस्य
कालस्य निर्णयकरीं कृतिमस्मदीयाम्
एनां निरस्तमदमत्सरमाद्रियध्वं ॥

विज्ञानयोगिनो विश्वरूपाचार्यस्य निश्चयः ।
गृह्यस्य धार्मयोर्भोर्य्य (!) तथा स्मृतिमहार्णवे ॥

विश्वादर्शे नित्यादर्शे मदनं स्मृतिचंद्रिकां ।
अपरार्कं कल्पतरुं शिवस्वामिमतं तथा ॥

बालरूपं स्मृतिरत्नं मंजूषां मानवं मतं ।
स्मृतिसंग्रहणं धर्मप्रदीपं कारणागमं ॥

ज्योतिषाणां च तंत्राणि वास्तुतंत्रं समीक्ष्य च ।
न्यायैः सम्यग्विचार्यायं कालादर्शो मया कृतः ॥

अर्तत्रवचनानां ये मूलं पृच्छंति पंडिताः ।
तेषां प्रेक्ष्या इमे ग्रंथा इति दृष्टं मयोत्तरं ॥

इत्यादित्यभट्टोपाध्यायस्य सूनुः (!1. सूरेः) कविवल्लभापरनाम्नो गर्गकुलतिलकस्य कृतिः कालादर्शो नाम कालनिर्णयः समाप्तः॥

This might seem to be the end of the work, as is the case in the Calc. MS., referred to (which, however, omits the six *ślokas*). The present MS., however, after two blank pages (148-9), proceeds:

प्रबुध्ये(!) च शुक्लपक्षे हरेर्दिन इति ।
तत्कृत्र श्रवणोपेते पावने परिकीर्तिते ॥ °

इति ° अपाकर्मनिर्णयप्रकरणं । अत्र चंद्रदर्शनवर्जमाह पराशरः । fol. 156*a*; इति ° पर्वद्वयनिर्णयः fol. 251*a*; इति ° समावास्यानिर्णयः ॥ अथ मन्वन्तरादीनां युगादीनां निर्णयः । ° fol. 261*a*.

In this second portion several lacunæ occur, esp. at foll. 229-30, 237-38, which are left blank.

It ends rather abruptly: आवृता प्रकारेण । तमाह बृहन्मनुः ॥ – –

For another (incomplete) MS., see Bikāner Cat., p. 399.

The work must have been composed prior to the middle of the 14th century, as it is quoted in the *Kālamādhava* (ed., p. 83).

[MACK. COLL.]

## 1656.

**2490.** Foll. 203; size 11 in. by $4\frac{1}{2}$ in.; excellent Devanāgarī writing; nine lines in a page.

*Mādhavīya-Kālanirṇaya,* also called *Kālamādhava* or *Kālamādhavīya,* another work, in five chapters (*prakaraṇa*), on the same subject, by *Mādhavācārya* (? *Sāyaṇa*).

The work was written (probably about 1360 A.D.) after the completion of the author's commentary on the *Parāśarasmṛiti* (and his *Vyavahāramādhava*), to which it forms a kind of supplement. It has been edited, in the Bibliotheca Indica, by Paṇḍit Candrakānta Tarkālankara (1885–88). See also Weber, Cat. Berl., no. 1166-67; Aufrecht, Cat. Bodl., no. 642.

The MS. is dated; संवत् १६७९ वर्षे आषाढवदि ११ बुधवासरे लिखितम् ।

[GAIKAWAR.]

## 1657.

**2056.** Foll. 186; size $11\frac{1}{2}$ in. by 5 in.; fairly good, modern Devanāgarī writing; 9 or 10 lines in a page.

The same work. [GAIKAWAR.]

## 1658.

**1097.** Foll. 113; size $12\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; fair Devanāgarī writing, of 1790 A.D.; 10 lines in a page.

*Mādhavīya-Kālanirnaya.*

[H. T. COLEBROOKE.]

## 1659.

**116b.** Foll. 32; size 10 in. by $3\frac{1}{4}$ in.; legibly written, in Devanāgarī, about A.D. 1750 (foll. 1–6 by a different hand from the rest); 7–11 lines in a page.

*Kālanirṇayadīpikā,* a summary, in 300 couplets, of the subjects treated in the preceding work, by *Rāmacandrācārya* (son of *Kṛishṇācārya,* and grandson of *Anantācārya*), pupil of *Gopāla.*

According to Prof. Bhandarkar, Report for 1883-84, pp. 58–60, *Rāmacandra,* who was also the author of the *Prakriyākaumudī* (see nos. 613 seq.), lived in the 15th century (c. 1450).

It begins:

कालचक्रप्रयोक्तारं नत्वा श्रीविट्ठलं गुरून् ।
धर्मज्ञानार्थमातन्मः कालनिर्णयदीपिकां ॥ १ ॥
यद्यप्यर्थवशात्मार्थं स्पष्टतायै क्वचित् क्वचित् ।
प्रपंच्यते स्वशब्देन मूलग्रंथानुसारतः ॥ २ ॥
मासाः सावनसौरचांद्रभभुवोह्नां त्रिंशता संक्रमाद्
आसंक्रांतिसितादिपक्षयुगतः सर्वर्क्षयुक्त्या क्रमात् ।
नाडीषष्टिमितार्कराश्यनुगतत्रिंशांशभाक्तिथ्यव-
च्छिन्नो भावधिरेवमेव दिवसः प्रोक्तश्चतुर्धा बुधैः ॥ ३ ॥

It ends:

दुर्बोधग्रंथसिद्धांत[ध्वांत]संघातभंजिका ।
सुश्लक्ष्णा ऽकारि रामार्यैः कालनिर्णयदीपिका ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यकृता कालनिर्णयदीपिका समाप्ता ॥

[H. T. COLEBROOKE.]

## 1660.

**2513.** Foll. 157; size $10\frac{1}{2}$ in. by $4\frac{3}{4}$ in.; well written, in the Devanāgarī character; mostly ten lines in a page.

*Kālanirṇayadīpikā,* with a commentary (*vivaraṇa*), by *Rāmacandra's* son *Nṛisiṃha* (A).

The commentary begins:

श्रीविट्ठलं श्रुतिशिरःप्रथितप्रभावं
भावार्द्रमानससरोवरराजहंसं ।
श्रीरामचन्द्रगुरुमेकमनेकशास्त्र-
पारीणकोविदधुरीणमहं नमामि ॥ १ ॥

येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी
वेदान्तानुमता च वैष्णवमहासिद्धान्तसद्दीपिका ।
कालज्ञानविधौ व्यधायि विबुधानन्दप्रबन्धत्रयं
कृष्णाचार्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥ २ ॥

श्रीरामचन्द्रकृतिना निधिना कलानां
 आनीतमेतमधुना वसुधासुतायाः (? ० सुधायाः) ।
श्रीकालनिर्णयकृदुक्तिसुधाभिसारम्
 आपीय कर्णपुटकैः कलयन्तु कालं ॥ ३ ॥
तत्सूनुना समयनिर्णयदीपिकायां ।
 गाम्भीर्यगर्भपदपद्यगुणान्वितायां ।
निर्णीयते विवरणं कणशः प्रवीणैर्
 आचूलमूलमवलोक्य विवेचनीयं ॥ ४ ॥

It ends:

इति विवरणमेतद्दीपिकाया मया यत्
 कृतमनुसृतवाक्यं न्यायविन्यासगर्भं ।
स्वमतिसदृशतत्तद्दर्शितानेकभावं
 सुजनजनमनस्तद्वीक्ष्य वैलक्ष्यमेतु ॥ १ ॥
श्रीरामस्वामिनामा रघुपति(*)रकरोन्मन्त्रशास्त्रे ऽभिषेकं
 यस्याचार्याभिधां च स्वयमदित ततो ज्ञातसर्वागमार्थः ।
यश्चक्रे पञ्चरात्रागमहृदयमयं वल्लभानां त्रयं सो
 ऽनन्ताचार्यः कुलेशः शमयतु दुरितं मे विमुक्त्यर्थमन्नुः॥२॥
तत्सूनुः श्रीशमेशाचरणविबुधगणानन्दि यो न्याययुक्तं
 भाष्यं सारं श्रुतीनामकृत नृपसभे वादिवृन्दं विजित्य ।
गोपालाचार्यमुख्यात् सुतरतिरभवद्यस्य सो ऽस्मान्नृसिंहा-
 चार्यो ऽव्यात् कल्पवर्त्ति† प्रभवति सततं यस्य गोत्रं
 [पवित्रं ॥ ३ ॥
तत्पुत्रः पात्रभूतो निगमनयमुखाष्टदशानां गिरां यो
 व्याकृत्यां सूत्रवृत्तिं सदसि नरपतेः संदधौ रामनाम्नः ।
यस्याभूतां सुतौ द्वौ द्विजकुलतिलकौ श्रीनृसिंहार्यरामा-
 चार्याख्यौ सो ऽवतान्नो निजजनसुखकृत् कृष्ण आ-
 [चार्यवर्यः ॥ ४ ॥
तत्पुण्यानां फलं यः सुतमयमभवद् भ्रातृभक्तिप्रसक्तो
 गोपालाचार्यदीक्षाक्षपितकलिमलोऽनेकविद्याविदग्धः।
प्रख्याताः सर्वविद्वत्सदसि बहुविधा यस्य ते ते प्रबन्धाः
 सो ऽनर्वाणिप्रणम्यो मम मनसि सदा वर्त्ततां राम-
 [चन्द्रः ॥ ५ ॥
तज्ज्येष्ठभ्रातृपुत्रः परिकलितकलः श्रीगुरो रामचन्द्रात्
 काव्यानां येन टीका व्यरचि स करुणाम्भोनिधिर्ज्ञा-
 [नसिन्धुः ।
श्रीकृष्णाचार्यसंज्ञो गुरुरयमवतान्मां कृपां प्राप्य यस्य
 श्रीरामाचार्यसूनुर्विवरणमकरोद्दीपिकाया नृसिंहः॥६॥

इति श्रीमत्सर्वशास्त्रज्ञसकलसदागमाचार्यपरमहंसपरिव्राजकश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यसुतश्रीनृसिंहाचार्यविरचितं कालनिर्णयदीपिकाविवरणं समाप्तं ॥

[GAIKAWAR.]

## 1661.

**1323.** Foll. 82; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; legibly written, in Devanāgarī, by two hands, in 1805 A.D.; eleven lines in a page.

*Nṛisiṃha's Kalanirṇayadīpikā-vivaraṇa* (B).

[H. T. COLEBROOKE.]

## 1662.

**2644.** Foll. 145; size 10 in. by $4\frac{1}{4}$ in.; fairly written, in Devanāgarī, ten lines in a page.

The same work (C).

Dated: संवत् १६०४ वर्षे माघवदि ११ रवौ लिखितं ॥

[GAIKAWAR.]

## 1663.

**181a.** Foll. 134; size $10\frac{1}{2}$ in. by 4 in.; legibly written, in Devanāgarī, A.D. 1678; foll. 105–131 by a different hand from the rest; ten lines in a page.

*Kālanirṇayadīpikā*, with *Nṛisiṃha's* commentary (D).

For other MSS. of these works see Rāj. Mitra, Notices, I., p. 75; VII., 53 (without the final verses 2–6).

[H. T. COLEBROOKE.]

## 1664–1666.

**885, 886, 887.** Foll. 1–179, 180–380, 381–558, the first 36 of which were apparently lost, and replaced by 35 leaves in a more modern handwriting, as was also the last leaf (including the date); size $10\frac{1}{2}$ in. by 4 in.; on

* नरपति ० D.

† कल्पवृक्षं A.

the whole fairly written, in Devanāgarī, by different hands, about the middle of the last century; 7–10 lines in a page.

*Rāmaprakāśa*, a commentary on *Rāmacandra's Kālanirṇayadīpikā*, composed by (order of) *Kripārāma(nṛipati)*.

The real author probably was *Rāghavendra*, son of *Kāśīnātha*; see his digest of matters relating to *ācāra* (nos. 1600–1602), bearing the same title as the present commentary.

It begins: श्रीसांबमवलंबे ॥

यत: सर्वं विश्वं भजति जनिसत्राल[य]निदं
य आत्मा सर्वेषां स्थिरचरजडानामपि विभु: ।
तमेतं भास्वंतं विधिहरिमहेशानवपुषं
नमस्याम: कामं परमकमनीयं सुकृतिनां ॥ १ ॥
अज्ञानध्वांतहर्तारं कर्तारं सर्वसंपदां ।
आनंदामृतदातारं सवितारं भजामहे ॥ २ ॥
लोकाभिरामं श्रीरामं भक्तानां कामदं परं ।
नीलोत्पलदलश्यामं सरामं तं भजामहे ॥ ३ ॥

धर्मज्ञानार्थमित्यनेन धर्मजिज्ञासुरत्राधिकारीति निर्धारितं कालनिर्णयविधानेनैव कालनिर्णयार्थस्या ऽस्याश्च प्रकाश्यप्रकाशभावलक्षण: संबंधो ऽबोधि । दीपिकेत्यनेन स्पष्टार्थता सूचितेति भाव इति °

इति गौरक्षत्रकुलोद्भव(l. गौड°)° नृपतिश्रीकृपारामविरचिते विधेयाविधेयविचारमहातरंगितकालतत्त्वार्णवसंचारोपायसेतुतरणिभूते रामप्रकाशनामग्रंथे संवत्सरांतकालस्वरूपनिर्णय: fol. 90*b*; इति ° घटिकामुहूर्तादिविभागादिकसामान्यतिथ्यंतनिर्णयप्रकरणं fol. 133*b*; इति° व्रतादिविषये तिथ्यादिकालनिर्णय: fol. 511*b*.

It ends: अत्र वर्ज्यान्याह परिशिष्टे ।

शाकमांसं मसूरं च चणकान्कोरदूषकान् ।
मांसं मधु परान्नं च वर्जयेदीपवस्तके इति ॥

इति गौडक्षत्रकुलोद्भवमाणिक्यचंद्रान्वयमहामतिकपरमज्ञानविराजमानमानोन्नतकीर्तिप्रतापोर्जितनृपतिश्रीकृपारामविरचिते इष्टकालनिर्णयसेतुभूते रामप्रकाशनामग्रंथ समाप्तिमफाणीत् ॥ संवत् १८६२ ॥

[H. T. Colebrooke.]

## 1667, 1668.

**2104, 2105.** Foll. 493; size 9¾ in. by 4½ in.; written, in Devanāgarī, by different hands, in the earlier part of the last century; 8–17 lines in a page.

*Kālatattvavivecana*, another treatise on the times and seasons suitable for the performance of religious and civil obligations, compiled by *Bhaṭṭa Raghunātha (samrāṭ-sthapati)*, son of *Bhaṭṭa Mādhava*, grandson of *Bhaṭṭa Rāmeśvara* and nephew of *Bhaṭṭa Nārāyaṇa* (and *Śrīdhara*), in the year Saṃvat 1677 (A.D. 1620).

It begins:

पितरं माधवमेवां ललितां नारायणं पितृव्यं च ।
सहजमथ विश्वनाथं गणपतिमीशां च शारदां नत्वा ॥ १ ॥
रामं च सीतयोपेतं रघुनाथेन रच्यते ।
सम्राट्स्थपतिना सम्यक् कालतत्त्वविवेचनं ॥ २ ॥
तत्रादौ बहुवाच्यत्वात्तिथितत्त्वं विविच्यते ।
पश्चान्मासाधिमासादि यथामति विवेक्ष्यते ॥ ३ ॥

तत्र तिथिर्नामामासंज्ञकसर्वानुस्यूतनित्यकलाव्यतिरिक्तानां प्रतिपद् °

It ends:

अज्ञस्य शोकमग्नस्य कृत्ये ऽस्मिन्नतिदु:शके ।
यत्पारगमनं तत्र हेतुर्गुरुकृपैव मे ॥ १ ॥
सप्त[सप्त suppl. B.]रसभूमिमिते ऽब्दे
कार्त्तिकासितमुनौ रविवारे ।
ग्रंथपूर्तिसुकृतिं रघुनाथो
राघवस्य परमर्पयति स्म ॥ २ ॥
चतु:समुद्रीपरिखा धरित्री
शिष्यप्रशिष्यैर्गृहिभिक्षुवर्यै: ।
यस्याचिता ब्रह्महरीशकल्पै:
स्वसूनुभिर्यश्च तुरीयरूप: ॥ ३ ॥
नारायणश्रीधरमाधवाख्यै
रामेश्वर: सो ऽजनि गाधिवंशे ।
तस्यांतसूनो रघुमाधवस्य
षड्दर्शनीसागरपारगस्य ॥ ४ ॥
वर्णाश्रमाचारसमूलसंवित्
तत्पूर्वकानुष्ठितिविश्रुतस्य ।
मध्य: सुतो ऽजायत विश्वनाथ-
प्रभाकराभ्यां जनुषा गुणैश्च ॥ ५ ॥

सम्राट्स्थपतिर्यज्वीयो रघुनाथ इति श्रुतः ।
तेनेदं निर्मितं सम्यक् कालतत्त्वविवेचनं ॥ ६ ॥
तत्संतो द्रष्टुमर्हंति सदसद्व्यक्तिहेतवः ।
मीमांसाधर्मशास्त्रेषु सम्यक्कृतपरिश्रमाः ॥ ७ ॥ ० ११ ॥

इति श्रीमत्पदवाक्यप्रमाणाभिज्ञश्रीभट्टमाधवविद्वद्वर्यात्मजसम्राट्स्थपतिभट्टरघुनाथकृतं कालतत्त्वविवेचनं संपूर्णं ॥

[GAIKAWAR.]

## 1669.

**1840.** Foll. 392; size 13½ in. by 6 in.; fair, modern Devanāgarī writing; twelve lines in a page.

*Kālatattvavivecana.*

[DR. JOHN TAYLOR.]

## 1670.

**1468.** Foll. 174 (and 2 *śuddhipattras* between foll. 9 and 10); size 9 in. by 3¾ in.; indifferent Devanāgarī writing; eleven lines in a page.

*Kālanirṇayaprakāśa,* another treatise on the same subject, by *Rāmacandra* (son of *Viṭṭhala Bhaṭṭa,* and grandson of *Bālakrishṇa Bhaṭṭa,* with the family name of *Tatsat*).

It begins:

श्रीनृसिंहपदद्वंद्वं नत्वा गणपतिं गुरुं ।
रामचंद्रो ऽतिसंक्षिप्तं कुरुते कालनिर्णयं ॥

तत्र कालो द्विविधः । नित्यः खंडश्च । नित्यस्त्वीश्वररूप एव । अनादिरेष भगवान् कालो ऽनंतो ऽजरो ऽमर इति वचनात् । खंडः क्षणादिपराधीतः । तत्र नित्यस्य न निर्णयो ऽनुपभोगात् । खंडस्तु संवत्सरायनर्त्तुमासादिरूपेणानेकविधिः । तत्रादौ संवत्सरो निर्णीयते । स च द्वादशमासात्मकः कालविशेषः । द्वादश मासाः संवत्सर इति श्रुतेः । ०

The arrangement is similar to that adopted by *Mādhava,* who is frequently quoted by the author.

Date of MS.: संवत् १८५६ वैशाखकृष्णपक्षे परिवा १ शाके १७०६ । ०

For other MSS., see Rāj. Mitra, Notices, IV., p. 284; Bikāner Cat., p. 401.

According to Prof. Bhandarkar, Report for 1883-84, p. 50, the mother of this *Rāmacandra* was the daughter of *Raghunātha Bhaṭṭa,* the son of *Mādhava Bhaṭṭa,* and grandson of *Rāmeśvara Bhaṭṭa.* If so, the author's date would be approximately determined (latter part of 17th century) by that of his grandfather, who wrote his *Kālatattvavivecana* (nos. 1667-68) in 1620 A.D.

[H. T. COLEBROOKE.]

## 1671.

**2044.** Foll. 124; size 11 in. by 5 in.; well written, in Devanāgarī; 7–13 lines in a page.

*Kālanirṇayasiddhānta,* a summary of the rules laid down by some of the preceding writers, in 114 *ślokas,* with a commentary, composed in 1653 A.D. (by *Mahādevavid,* son of *Śrīkālajit;* from materials compiled) by *Raghurāma,* son of *Jayarāma,* and grandson of *Vaikuṇṭha* of Velāvatapura near Sihor in Kathiawar (A).

It begins:

शिवं कालतनुं नत्वा विपश्चिज्जनतुष्टये ।
कालनिर्णयसिद्धांतं वक्ष्ये ग्रंथानुसारतः ॥

The commentary begins with three *ślokas,* the first of which is:

प्रणम्यैकरदं देवं शारदां गुरुमेव च ।
कालनिर्णयसिद्धान्तं व्याकुर्वे विशदोक्तितः ॥ ०

अथ ग्रन्थकर्ता स्वाभीष्टं प्रतिजानीते । ० । ग्रन्थानुसारत इति । ग्रन्था माधवाचार्यरामचन्द्राचार्यरघुनाथवाजपेयिप्रभृतिरचिता निबन्धाः ०

At the end the following account is given of the author:

श्रीमत्सिंहपुरांतिके द्विनिगमो वेलावटाख्ये पुरे
श्रौतस्मार्तविधानसारचतुरो वैकुंठनामाभवत् ।
तत्सूनुर्जयराम आद्य उदितः श्रीरामनामापरम्
तत्पृष्ठे हरिराम इत्यभिधया ब्रह्मेशविष्णूपमाः ॥ ११५ ॥

तत्र श्रीजयरामजेन रघुरामेणात्र बुद्ध्या स्वया
ज्ञात्वानेकनिबंधकान् विलिखितं निश्चित्य यत्नात्ततः ।
तद् दृष्ट्वा गिरिनारराजमहितः श्रीकालजित् तत्सुतो
वृत्तैस्तर्कहरोन्मितैर्व्यरचयद्ग्रंथं महादेववित् ॥ ११६ ॥

स्वस्त(!) श्रीमन्नृपविक्रमाश्ववियत्सप्तेंदुसंख्ये ऽब्दके
मार्गे मासि सिते दले स्मरतिथौ वारे भृगोर्वह्निभे ।
साध्ये युज्यथ तैतलाख्यकरणे श्रीमद्भुजाख्ये पुरे
दृष्ट्वार्थं रघुरामकृत्स्नमकरोद्ग्रंथं महादेववित् ॥ ११७ ॥

शाके विक्रमभूपतेर्गगनभूसप्तेन्दुसंख्ये ऽयने
सौम्ये माधवमासि उज्ज्वलदलभानोस्तिथौ पुष्यभे ।
जीवारे युजि गंजनाख्नि करणे यत्र भुजे पत्तने
व्या ...यं जयरामजेन रघुणा ग्रंथस्य बुद्ध्या कृता ॥ ११८ ॥

Commentary thereon: अथ ग्रंथकर्ता स्वात्मानमुपदिशति । श्रीमत्सिंहपुरस्य लोकप्रसिद्धशीहोरपुरस्यांतिके समीपे वेलावटाख्ये पुरे लोकप्रसिद्धवेलावटपुरे* त्रिनिगमी द्विवेदी वैकुंठनामा द्विजो ऽभवत् ॥ ११५ ॥

° अनेकनिबंधकान् माधवकालतत्त्वविवेकादिनिबंधान् ज्ञात्वा ° ॥ तत्सर्वं दृष्ट्वा विलोक्य श्रीगिरिनारो रैवताचलः तस्य राजा तेन महितः पूजितः श्रीकालजिद् याडवः तस्य सुतो महादेववित् तर्कहरोन्मितैर्वृत्तैः षोडशोत्तरशतैरिमं(!) ग्रंथं व्यरचयदिति ॥ ११६ ॥

° १७०८ संख्ये ऽब्दके ° स्मरतिथौ त्रयोदश्यां भृगोर्वासरे कृत्तिकानक्षत्रे साध्ये युजि साध्ययोगे तैतलाख्यकरणे एवं पंचांगे श्रीमद्भुजाभिधे पुरे रघुरामेण कृत्स्नं रचितमर्थं विलोक्य महादेववित् ग्रंथमकरोदलिखच्च ॥ ११७ ॥

अथ टीकालिखनसमयं(!) व्याख्याता रघुमुपवदति ॥ १७१० ॥ एतादृशे समये भुजे नगरे द्विवेदिजयरामजेन रघुरामेण ग्रंथस्येयं व्याख्या बुद्ध्या मनीषया कृतेति ॥ ११८ ॥

इति श्रीद्विवेद्यग्निहोत्रिजयरामसुतरघुरामविरचितो निर्णयसिद्धान्तः सटीकः समाप्तिं समगमत् ।

[GAIKAWAR.]

## 1672.

**2045.** Foll. 124; the same size and handwriting.

The same work (B). [GAIKAWAR.]

---

* Thus A; ° उपदिशति । श्रीमत्सिंहपुरे लोकप्रसिद्धे वेलावटपुरे ॥ B.

## 1673.

**2521b.** Foll. 23; size 10¼ in. by 4½ in.; fairly good Devanāgarī writing of 1705 A.D.; 13 or 14 lines in a page.

[*Hemādri-*] *Kālanirṇaya-saṃkshepa* (or *saṃgraha*), by *Bhaṭṭoji Dīkshita*, son of *Lakshmīdhara Sūri;* on the divisions of time with reference to the observance of expiatory, obsequial and domestic rites, in accordance with *Hemādri's* digest.

It begins: मासश्चतुर्धा । त्रिंशता दिनैः सावनः । सूर्यस्य संक्रमादा संक्रांतिः सौरः । पक्षद्वयेन चांद्रः । अश्विन्यादिरेवत्यंतनक्षत्रपरिवर्तनेन नाक्षत्रः । दिवसो ऽपि चतुर्धा । अहोरात्रः सावनः । सौरमासत्रिंशांशः सौरः । तिथ्यवच्छिन्नश्चांद्रः । चंद्रसंबद्धनक्षत्रावच्छिन्नो नाक्षत्रः । अब्दस्तथा । उक्तं हि ब्रह्मसिद्धांते । °

It ends:

मुख्यकालमुपाश्रित्य [गौण]मप्यस्तु मायनम् ।
न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणम् ॥

विस्तारो हेमाद्रौ बोध्यः ॥

भट्टोजिभट्टरचितः कालनिर्णयसंग्रहः ।
गुणगृह्यैर्बुधैः सो ऽयमादरेण विभाव्यताम् ॥

इति श्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन हेमाद्रिकालनिर्णयसंक्षेपः समाप्तः ॥ संवत् १७६२ वर्षे कार्त्तिकमासे लिखितं देवभक्षिणा ज्येष्ठेन तृतीया भौमे स्तंभतीर्थवासिना राजनगरस्थेन ॥ अथ दानविधिः । तुलाग्रकोटीरथचक्रमध्ये ° a few more lines.

For another MS. of this treatise (there ascribed to *Hemādri*), see Rāj. Mitra, Notices, VIII., p. 28; for the author's *Tithinirṇaya-pradīpa* (or *saṃkshepa*), see no. 1677.

[GAIKAWAR.]

## 1674.

**1597d.** Foll. 14; size 9½ in. by 4½ in.; fairly written, in Devanāgarī; twelve lines in a page.

*Parvanirṇaya*, a disquisition on the proper time for the Full and New Moon and cor-

responding obsequial offerings, composed, in 1685 A.D., by *Gaṇapati Rāvala*, son of *Śrī Rāvala Hari*, and grandson of *Rāmadāsa*.

It begins:

श्रीशिवं सद्गुरुं नत्वा कर्कगर्गादियाज्ञिकान् ।
दर्शे च पौर्णमासे च यागकालो निरूप्यते ॥ १ ॥

ज्ञात्युक्तश्रुतिसूत्रभाष्यनिचयं श्रीकर्कदेवोदितान्
श्रीनंताभिधरामयाज्ञिकमतांस्तान् पर्वणो निर्णयान् ।
श्रीगंगाधरनिर्मितं हरिहरं रेणुं तथा मंडनं
श्रीकात्यायनयज्ञपार्श्वसहितं कर्मप्रदीपं तथा ॥ २ ॥

हेमाद्रिं प्रथितं च माधवमतं स्मृत्यर्थसारामृतं
[सारं]श्रीमदनस्य निर्णयमहासिंधुं तथा भास्करं ।
तत्त्वं कालविवेचनं स्मृतिगणान् श्रीकौस्तुभं ज्योतिषं
सिद्धांतस्मृतिचंद्रिकादिनिखिलग्रंथान् विचार्यादरात् ॥ [३ ॥
श्रुतिसूत्रस्मृतिभाष्यप्राचीननिबंधसागरानेतान् ।
गणपतिरावलविदुषा निर्मथ्येयं विधीयते सारः ॥ ४ ॥

औदीच्यद्विजगुर्जरेषु महितः श्रीरामदासो ऽभवद्
गौडाधीशमनोहरार्चितपदो यो याज्ञिकः कीर्तिमान् ।
तत्पुत्रो हरिशंकरो ऽध्वरकृती श्रीरावलख्यातिभृत्
तत्सूनुर्यजुषां स्थितिर्गणपतिर्ब्रूते नयं पर्वणः ॥ ५ ॥

पर्वण्यखंडे स कथं विधेयः
खंडे ऽथवा पिंडयजिः कदा स्यात् ।
राकानुमत्योः सकलं तदेतद्
विचार्य वक्ष्ये सुगमैर्वचोभिः ॥ ६ ॥

धीरान्कुशाग्रधिषणान् धिषणप्रगल्भान्
संप्रार्थये मुहुरहं प्रहितप्रणामः ।
सत्पार्वकालिकविनिर्णयसारमेनं
सानुग्रहाः सुमनसः प्रविचारयंतु ॥ ७ ॥

दर्शपौर्णमासयागं प्रकृत्य श्रूयते । स यो हैवं विद्वान्पौर्णमासेनैव पौर्णमासीं यजत आमावास्येनामावास्यां क्षिप्र एव पाप्मानमपहत इति ॥ कात्यायनसूत्रे च । ०

*Iti paurṇamāsīnirṇayaḥ*, fol. 5*a*; *anvādhānapiṇḍapitriyajñakālanirṇayaḥ*, fol. 8*b*.

It ends:

सत्पर्वनिर्णयः पंथाः पुमर्थाध्वापि धर्मभूः ।
शिवसंप्रापको ऽकारि यज्ञेशः प्रीयतां ततः ॥ १ ॥

पर्वद्वयसमुल्लासी भाति सत्पक्षनंदनः ।
माधवाभ्युद्धृतश्रिवः पर्वनिर्णयचंद्रमाः ॥ २ ॥

शतपथविकटेषु श्रौतमार्गेष्वटंतो
विविधविधिविकल्पध्वांतगूढेषु खिन्नाः ।
पथि गणपतिदिष्टे पर्वणो निर्णयेंदाव्
अमृतकिरणदीपे याज्ञिकाः संचरंतु ॥ ३ ॥

नेत्रांभोभिधराधरक्षितिमिते श्रीविक्रमार्के शके १७४२
मासीषे विजयातिथौ रविदिने माल्हेरदुर्गाचले ।
यागे पर्वविनिर्णयं गणपतिः श्रीरावलाख्यो मुदा
नानाग्रंथविलोकनाद्विमलधीरेनं समापूरयत् ॥ ॥ ४ ॥

इति श्रीमदग्निहोत्रचातुर्मास्यादियजनसमासादितपुरुषार्थसार्थश्रीरावलहरिसूनुगणपतिरावलकृतो ऽयं पर्वनिर्णयः संपूर्णः॥ संवत् १८०७ विक्रमसंवत्सरे माघमासे कृष्णपक्षे ५ पंचमी स्थिरवासरे समाप्तः ॥ [H. T. COLEBROOKE.]

## 1675.

**1139b.** Foll. 38 (the last but one of which is missing); size $8\frac{1}{4}$ in. by $3\frac{3}{4}$ in.; fairly written, in Devanāgarī; six lines in a page.

Another MS. of the same work, apparently copied from the preceding MS.

Dated: संवत् १८४२ मीती जेष्टशुदि ६ वारसोमारके ० [H. T. COLEBROOKE.]

## 1676.

**1843.** Foll. 11; size 12 in. by 4 in.; fair, modern Devanāgarī writing; eight lines in a page.

*Tithisārasaṃgraha* or *Tithinirṇaya*, an abstract of the rules regarding the lunar days appropriate for religious performances.

It begins: अथ तिथिनिर्णयः ।

स्मृत्यर्थसारं हेमाद्रिमाधवनिर्णयामृतं ।
वीक्ष्य निर्णयसिंधुं च स्मृतिदर्पणमादरात् ॥
निर्णयोदन्वतः सारमुक्तोद्धारं करोम्यहं ।
[राघवो विदुषां प्रीत्यै संक्षेपात्तिथिनिर्णयं ॥ Bomb.
तत्र तिथिर्द्वेधा । ० [ed., 1864.]

It ends: फाल्गुनकृष्णप्रतिपदि श्वपचं स्पृष्ट्वा स्नायादिति निर्णयसिंधुः । ततो होळाकाभस्मेन(!) सिंचयेत् । तद्दिने चूतकुसुमप्राशनं च कुर्यात् । इति फाल्गुनः ॥ इति संक्षेपेण तिथिसारसंग्रहः समाप्तः ॥ [DR. JOHN TAYLOR.]

## 1677.

**1140.** Foll. 42; size 7¼ in. by 3¾ in.; fairly good, modern Devanāgarī writing; nine lines in a page.

*Tithinirṇaya-pradīpa* (or *saṃkshepa*), a similar work, by *Bhaṭṭojidīkshita*, son of *Lakshmīdhara Sūri.*

It begins: चैत्रशुक्लप्रतिपदि वत्सरारंभः। तत्र सौदयिकी तिथिर्ग्राह्या।

चैत्रमासि जग्रद् (? l. जगद्) ब्रह्मा ससर्ज प्रथमे ऽहनि।
शुक्लपक्षे समग्रं तु तथा (l. तदा) सूर्योदये सति॥

इति हेमाद्रौ ब्रह्मोक्तेः॥

दिनद्वये ऽपि तद्व्याप्तौ अव्याप्तौ वा पूर्वैव [वा]।
वत्सरादौ वसंतादौ बलिराज्ये तथैव च।
पूर्वैविधैव कर्तव्या प्रतिपत्सर्वदा बुधैः॥

इति गोविंदार्णवे वृद्धवसिष्ठोक्तेः। °

It ends: इति होलिकानिर्णयः॥ इति ° तिथिनिर्णयप्रदीपः समाप्तिमगमत्॥

See Weber, Cat. Berl., no. 1176. To the authorities there mentioned may be added: *Anantabhaṭṭa, Kālādarśa, Tristhalīsetu, Dhanvantarinighaṇṭu, Rāmārcanacandrikā, Smṛticandrikā.*

See also Notices, IV., p. 264.

[H. T. COLEBROOKE.]

## 1678.

**1052b.** Foll. 14; size 16¼ in. by 3¾ in. (folded to half the length); modern Bengalī handwriting; seven lines in a page.

*Tithisvarūpa*, or *Sarvatithisvarūpa*, a manual of feasts and fasts to be observed on the several days of the fortnight; by *Sureśvara.*

It begins:

नत्वा गुरूणां चरणं निधाय हृदीश्वरं सर्वशुभैकहेतुं।
बुधप्रमोदाय सुरेश्वरेण वितन्यते सर्वतिथिस्वरूपं॥

अथ तिथिव्यवस्था। तत्र सर्वकर्मणि मुहूर्तान्यूनकालव्यापिनी तिथिर्योग्या कृष्णजन्माष्टम्यादौ तु मुहूर्तन्यूनकालो ऽग्राह्यः। तादृशकालबोधकवचनात्। एवं षष्टिदण्डात्मिकायां। परनिष्क्रान्ता च योग्या। °

Fol. 2*a*: अथ प्रतिपत् °॥ अथ द्वितीया। सा च शुक्ला परयुता कृष्णा प्रतिपद्युता ग्राह्या। आषाढशुक्लद्वितीयायां रथयात्रा पुष्याभावे ऽपि कार्या। तद्योगे फलातिशयः। तेन पुष्यादरेण न पूर्वेद्युः °

It ends: चातुर्मास्यव्रतस्योद्यापनपूजादक्षिणादिकं हरेरुत्थानात्परं द्वादश्यामेव दिवा कार्यं द्वादश्योत्तरोत्थाने तु बोधोत्तरं दिवा कार्त्तिक्यामेव तुलासंक्रान्त्यामारम्भपक्षे वृश्चिकसंक्रमणात्परं दिवा करणीयं शयने समुत्थानोत्तरपूर्ववद् द्वादश्यां कार्त्तिक्यां वेति॥ इति तिथिस्वरूपं समाप्तं॥

[H. T. COLEBROOKE.]

## 1679.

**84d.** Foll. 24; size 10¾ in. by 4¾ in.; indifferent Devanāgarī writing; nine lines in a page.

*Sārasaṃgraha*, an anonymous treatise on auspicious and unauspicious days for the performance of religious rites.

It begins:

मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा पुनर्जन्मनाम्
आत्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषां।
लोकानां प्रलयो भवस्थितिविभुश्चानेकधा यः श्रुतौ
वाचन्तः(वार्च यः) स ददात्वनेककिरणस्त्रैलोक्यदीपो [रविः॥ १॥

काष्ठानिमेषैर्नवभिर्द्विकघ्नैस्
त्रिंशत्कलास्ता दशपंचयुक्ताः।
कलात्रयीशाद्विमितो मुहूर्तस्
त्रिंशन्मुहूर्तं द्युनिशं वदंति॥ °

The treatise consists of 881 verses, ending thus: ° [८]७६॥ इति शिवरात्रिचतुर्दशीनिर्णयः। °

पृथिव्यां यानि पापानि ब्रह्महत्यादिकानि च।
अन्नमाश्रित्य तिष्ठंति तस्मादन्नं त्यजेन्नरः॥ [८]८०॥

अनुराधा यतिपूज्या विष्णुः पूज्यो गृही सदा।
रेवती यानप्रस्थेन पूज्या च हरिवासरे॥ [८]८१॥

इति सारसंग्रहः॥ संवत् १७७४ चैत्रवदि ११ सोमे पंञ्चामाणिकेश्वरलिखितं °॥

For a MS. copied from the present one, see Aufrecht, Cat. Bodl., no. 668.

[H. T. COLEBROOKE.]

## 1680.

**799.** Foll. 142; size 10½ in. by 4 in.; good Devanāgarī writing of A.D. 1604; nine lines in a page.

*Samayāloka*, a manual of rules regarding the times and seasons for religious observances, compiled—under the patronage of *Durgāvatī*, queen of King *Dalapati*, and mother of *Vīra Sāhi*—by *Padmanābha Miśra Bhaṭṭācārya*, son of *Balabhadra Miśra* and *Vijaya Śrī*.

The work apparently forms the first of seven sections of a general digest of Law, entitled (*Durgāvatī-*) *Prakāśa*.

It begins:

वामांशीभूय रागातिशयवशतया निर्भरं संगतायाः
प्रारंभे तांडवस्य त्रिपुरविजयिनः प्राप्तनृत्योद्यमायाः ।
सद्यःस्विद्यत्कपोलं चलदलकलसद्भालमामुक्तकेश-
प्रोद्भिन्नन्मल्लिमालं क्षपयतु दुरितासंगमंगं भवान्याः॥१॥°

यस्याः पुरः स्फुरति नर्म नृणां दिशंती
सा नर्मदेति तटिनी जगति प्रसिद्धा ।
या दृष्टितो ऽपि जनतामवधूय पापं
भूयः पदे नयति तत्तुहिनांशुमौलेः ॥ १७ ॥ ° १८ ॥

तस्यामविष्णुपृथिवीपतिबाधशास्त्र-
प्रामाण्यतः सकलदेवगणानुमत्या ।
संग्रामसाहिमिषतो द्विपतो निहन्ता
भागो हरेर्धरणिनाथतयाविरास ॥ १९ ॥ ° २५ ॥

तस्माद्बभूव निखिलक्षितिचक्रशक्रो
ऽलर्काधिको नृपदिवाकरतिग्मतेजाः ।
राजा भुजार्जितजयो ऽर्जितराज्यलक्ष्मीर्
मानोन्नतो दलपतिर्दलितारिवर्गः ॥ २६ ॥ ° ३१ ॥

तस्यात्मजो विजयते ऽयमसीमभूमी-
नाथः पृथातनयसार्थयशःकृतार्थः ।
आजानुबाहुरजनीकरकांतवक्त्रः
श्रीवीरसाहिनृपतिर्दिननाथतेजाः ॥ ३२ ॥ ° ३७ ॥

अस्य श्रीवीरसाहेर्दलपतिनृपतिप्रेयसी कल्पवल्लिः
क्षोण्यामन्या वदान्यावधिरमलगुणा भाति दुर्गावतीह ।
या कन्या शालिवाहक्षितिरमणमणेर्या च मुख्या स्नुषासु
श्रीमत्संग्रामसाहेरपि च कविजनानन्दभूः पार्वतीव ॥
[३८ ॥ ° ४५ ॥

संग्रामविजयं वीक्ष्य यस्या दलपतिस्त्रियाः ।
मन्यंते मनुजास्तथ्यं दुर्गायाः समरे जयं ॥ ४६ ॥

तस्या निदेशेन विशेषभाजा श्रीपद्मनाभो बलभद्रसूनुः ।
निबंधनिःपूर्वविवेचितेषु करोति धर्मेषु विवेचनानि ॥
[४७ ॥
दुर्गावत्या निदेशेन विजयश्रीतनूद्भवः ।
लिखितानि निबंधणां विचारयति सादरः ॥ ४८ ॥

दुर्गावत्याः प्रकाशेन दूरीकृततमस्ततौ ।
विचरंतु जना धर्ममार्गे विगतमत्सराः ॥ ४९ ॥ ° ५२ ॥

आदिमः समयस्यायं व्रतस्योक्तस्ततः परः ।
आचारस्य ततः पश्चात् व्यवहारस्य तत्परः ॥ ५३ ॥

दानस्य पंचमः प्रोक्तः शुद्धेः षष्ठः प्रकीर्तितः ।
आराधनाय जगतामधीशस्य तदुत्तरः ॥ ५४ ॥

इत्यं श्रीपद्मनाभेन भट्टाचार्येण निर्मिते ।
दुर्गावत्याः प्रकाशे ऽस्मिन् समालोकाः प्रकीर्तिताः ॥५५॥

धर्मा विवेचितो ऽस्माभिर्विचार्याचार्यनिर्मितौः ।
दुर्गावत्या लसत्कीर्त्याः कल्याणानि प्रयच्छतु ॥ ५६ ॥

तत्र धर्मे विधिः साक्षान्मान स च विधिः क्वचिदपूर्वैः यथा ° तत्रादौ समयो निरूप्यते fol. 10*a*; अथ मलमासनिर्णयः 14*a*; अथ संक्रांतिनिर्णयः 24*a*; अथ ग्रहनिर्णयः 29*b*; अथ युगादिनिर्णयः 34*b*; अथ तिथयो निर्णीयन्ते 36*a*; अथ नक्तव्रतनिर्णयः 50*a*; अथायाचितनिर्णयः 52*a*; अथ दानहोमादिदैवकालनिर्णयः 53*a*; अथ प्रतिपन्निर्णयः 54*b*; अथ द्वितीयानिर्णयः 63*b*, etc.; इति चतुर्दशीनिर्णयः ॥ अथ पौर्णमासीनिर्णयः 130*a*; अथोत्सर्गनिर्णयः 137*a*; इति होलिकानिर्णयः 138*b*; इति पौर्णमासीनिर्णयः॥ अथामावास्यनिर्णयः 139*b*; अथ नक्षत्रनिर्णयः 140*b*.

Colophon: इति श्रीमच्चिरवद्यगद्यहृद्य ° महाराजाधिराजदलपतिप्रेयस्याः श्रीदुर्गावत्याः प्रकाशत्रिदशसिंधुवंधुरवाग्विलासोदयदूरीकृतनिःशेपदेशप्रभवविद्यार्थिस्तोमाज्ञानपंकपरमप्रतिष्ठितसन्मिश्रश्रीबलभद्रात्मजविजयश्रीगर्भसंभवसकलशास्त्रारविंदप्रद्योतनभट्टाचार्यमिश्रश्रीपद्मनाभकृते समय[ा]लोके प्रथमः प्रचारः पूर्णः ॥ संवत् १६६१ वर्षे फाल्गुनसुदि ७ गुरुवासरे पातिसाहकेब्बरभुंजमाने तस्मिन्काले वर्तमाने पोथी लिषाइ श्रीपोजापरमानंदसुपुत्रश्रीपोजामनोहरदास ॥ लिषापितं ठा श्रीपाडेनरायणदास । तत्पुत्र ठा श्रीपाडे राघौदास ॥ कायस्थ श्रीगौरकरलग्रामकौशालालिखी ॥

Whilst the colophon seems to indicate that this is only the first portion of the *Samayāloka*,

the colophon of a MS., in Rāj. Mitra's Bikāner Cat., p. 450, containing the same matter, represents it as the complete work.

Besides *Smritis* and *Purāṇas*, the following authorities have been met with: *Anantabhaṭṭāḥ*, foll. 55*a*, 120*b*, etc.; *Nirṇayāmṛita*, 55*a*, 69*b*, etc.; *Brahmasiddhānta*, 29*b*; *Madanapārijāta*, 136*b*; *Madanaratna*, 17*b*, 39*b*, etc.; *Mādhavācāryāḥ*, 42*a*, 46*b*, 49*a*, etc.; *Ratnamālā*, 23*a*; *Laghusaṃhitā*, 61*b*; *Viśvarūpanibandha*, 61*b*; *Śivarahasya*, 33*b*; *Śuddhamiśrabheda*, 79*b*; *Śuddhāvikā*(?), 83*b*; *Smritisaṃgraha*, 20*b*.

The author wrote his *Vīracampū* in 1578 A.D.; see Peterson, Report, I., p. 101.

[H. T. COLEBROOKE.]

## 1681.

**416b.** Foll. 21; 4to.; size 11¾ in. by 9 in.; large, thick, modern Devanāgarī handwriting; sixteen lines in a page.

*Samayanirṇayoddyota*, a calendar of religious feasts and fasts, being the first of seven sections (*uddyota*) which make up the *Madanaratnapradīpa*, a general digest of civil and sacred law, by *Madana Siṃha Deva*, son of *Śakti Siṃha*. Incomplete. It begins:

आदायेंदुकलां शंभोर्मुखे विसधिया क्षिपन् ।
द्वितीयरदनीकुर्वन् पातु बालो गजाननः ॥ १ ॥
उत्तिष्ठन्यमुनानिकुंजभवने सोल्लासमभ्युन्नतः
भृङ्गारं परिभावयन्सखितयानीतश्च कुंठस्थली ।
इत्येवं भगवानिव प्रियधुराधारीकृतो राधया
गोविंदस्य जगद्विमोहनरसो वंशीरवः पातु वः ॥ २ ॥
जामातुर्न पिता पितामहकथां कन्यापि न स्वीकरो-
त्येतस्मिन्गहने कथं नु भविता कन्याप्रदाने विधिः ।
इत्थं जल्पति नारदे सकुतुकं वस्तुस्थितेर्मौनिनोर्
गौरीशंकरयोस्तयोरयतु वो व्रीडाविनम्रं शिरः ॥ ३ ॥
तरुणतिमिरहन्ता पद्मिनीप्रेमरम्ता
गगनवनविहारी भक्तसाम्राज्यकारी ।
सुरविरचितसेवः स्वर्भुजामेकदेवः
स जयति दिननाथः सिद्धसङ्गीतगाथः ॥ ४ ॥
इष्टारंभविभावनीयचरणश्चिंताग्निसञ्चारणम्
त्रैलोक्याभयदानचित्रविभवस्तुद्य(? ष्य)द्वियत्संभवः ।
उद्यद्विघ्नतमोविघाततरणिर्भक्तेषु चिंतामणिः
पायाद्वः सुकृतैककर्मठमतिर्देवो गणानां पतिः ॥ ५ ॥
स्वास्ते देशः प्रशस्तद्विजवरललिताचारचित्तानितांता-
राध्यो ऽवाध्यो विपक्षक्षितिपतिनिकरैर्निर्भरैः सङ्गरे ऽपि ।
ढिल्लीनामा निकामाहवनवमहिमोद्दण्डदोर्दण्डदीप्यत्-
प्रारंभध्वस्तदंभप्रतिबलयरिबह्रीरनीराजितश्रीः ॥ ६ ॥
चत्वारो यत्र वर्णाः श्रुतिनियतविधेः स्वस्ववृत्तिं [भजन्ति]
यत्राचारो विशालो यदवधिविरता वीरवार्ता भवंति ।
दानं यत्राभिमानं हरति सुरतरो क्षत्रियाणां वराणां
सो ऽयं रम्यप्रदेशो जगति विजयते को ऽपि ढिल्लीति
[देशः ॥ ७ ॥

तथा Here the MS. breaks off, leaving a blank of more than two pages, and resuming at *śloka* 22.

यो वेदाखिलवेदबोधितविधानाचारपारङ्गमो
येनाद्यापि च संस्कृतेरवधिना संध्या न वंध्या कृता ।
यो देवद्विजजातकर्मचितसद्धर्मक्रियातत्परः
सोऽयं श्रीमदनो नृपो विजयते विद्यावसिष्ठद्युतिः ॥ २२ ॥
तेनाहूय मनीषिमंडनमणिं सन्मिश्ररत्नाकरं
गोपीनाथमनुत्तमं च सुधियं श्रीविश्वनाथं तथा ।
मुग्धे पंडितमुन्नतद्युतिमतिं भट्टं च गंगाधरं
राज्ञा शक्तनसूनुना सुकृतिना ग्रंथो ऽयमारभ्यते ॥ २३ ॥
अमुष्य परिनिर्मितान्मदनरत्नदीपाद्बुधा (? r. पा)
विधाय मतिमंदतातिमिरजातघातक्रियां ।
श्रुतिस्मृतिविबोधिते विहितनिंदिते कर्मणी
निरीक्ष्य नृपतेः कृतः कलयतेह पुण्याशिषः ॥ २४ ॥
उर्वीं यावदहीन्द्रदंडशिखरासीनातपत्रा[⏑]ते
यावत्सम्कृतको चकुंभमुपमापुष्णाति(? ष्णाति) हेमाचलः ।
यावद्बालमृगांकमंजुलकलामौली मृडानीपतेर्
उद्योतैर्मदनप्रदीपमहिमा तावत्समुज्जृंभताम् ॥ २५ ॥
उद्योताः समयाचारव्यवहारविवेचकाः ।
प्रायश्चित्तस्य दानस्य शुद्धिशान्त्योश्च सप्तमे ॥ २६ ॥
तत्रादौ राजसिंहेन सर्वधर्मो ऽयं योगतः ।
तन्यते मदनेंद्रेण समयस्य विनिर्णयः ॥ २७ ॥ ०
सुखावगमसिद्ध्यर्थमस्मिन्समयनिर्णये ।
उद्योते विहिता येऽर्थाः क्रमस्तेषां निरूप्यते ॥ २८ ॥

तत्रादौ समये मानं तत्स्वरूपमथोदितं ।
कर्मांगत्वमथास्योक्तं ततो वत्सरनिर्णयः ॥
अयनस्य तथर्तोश्च मासस्याथ विनिर्णयः ।
निर्णयो मलमासस्य तत्र वर्ज्यादिनिर्णयः ॥
सामान्यतः सर्वतिथिनिर्णयश्च ततः कृतः ।
एकभक्तस्य भक्तस्य तथैवापाचितस्य च ॥
तथैव दानहोमादेः कालस्य च विनिर्णयः ।
तत्तत्तिथ्युपवासस्य तत्तत्तिथिविनिर्णये ॥

etc., 77 more *ślokas*; the two last of which are (fol. 7*b*):

ततः कालविशेषेषु यद्वर्ज्यं तत्प्रपंचितं ।
निरूपितं ततः सम्यग्वर्जनीयं कलौ युगे ॥
एतावंतः क्रमेणार्थो यथाशास्त्रं प्रपंचिताः ।
अस्मिन्प्रथम उद्योते समयस्य विनिर्णये ॥

इति श्रीकोदण्ड(श्रीकोदण्ड in some colophons)परशुरामेत्यादिविविधविरुदावलीविराजमानमानोन्नतमहाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे समयनिर्णयोद्योते ऽनुक्रमणिका ॥

अथ निर्णयसमयसद्भावे किं प्रमाणं किं च तस्य स्वरूपं । उच्यते । श्रुतिस्मृतिपुराणानि तत्र प्रमाणानि । तत्रापि । °

The MS. ends with the disquisition on the intercalary month (*malamāsa*), and thus contains only a small portion of the treatise.

The complete digest thus consists of the following sections (*uddyota*): 1. *Samayanirṇaya;* 2. *Ācāra;* 3. *Vyavahāra;* 4. *Prāyaścitta;* 5. *Dāna;* 6. *Śuddhi;* 7. *Śānty-uddyota.*

The *Madanaratna(pradīpa)* was largely used by *Nīlakaṇṭha* for his *Bhagavantabhāskara;* see West and Bühler, Digest, 3rd ed., I., p. 20.

[H. T. COLEBROOKE.]

## 1682.

**416a.** Foll. 20; 4to.; size 11¾ in. by 9 in.; European paper; fairly written, in Devanāgarī; fifteen lines in a page.

*Samayaprakāśa,* being the section on the times and seasons suitable for religious ceremonies, of a general Digest of Sacred and Civil Law, called *Kīrtiprakāśa,* by *Vishṇuśarman* (*svarāṭ samrāṭ agnicit*), minister of worship to King *Kīrtisiṃha,* son of *Kanakasiṃha,* and descendant of *Jaitrasiṃha,* of the *Gaura-vaṃśa.* The MS. contains only a small portion of this section. There are many lacunæ.

The MS. begins: अथ सर्वांगकर्मणां मुख्यांगरूपः कालो निर्णीयते ॥ तत्र केचित्प्रत्यवतिष्ठंते नित्यत्वव्यापकत्वाभ्यां प्राप्तत्वादेव कालस्य निर्णयो न संभवति। निर्णयो नाम नानाविरुद्धविधायकवाक्यानां व्यवस्थापनेन सिद्धो ऽर्थ उच्यते । °

इति कालस्य निर्णेयत्वविचारः fol. 7*b*; इत्यहोरात्रभेदाः 9*b*; इति मासस्वरूपं 10*b*; इति मासविनियोगाः 12*a*; इत्यृतवः 14*a*; इत्ययननिर्णयः 15*a*.

इति श्रीमद्गौरवंशावतंसमहारायश्रीजैत्रसिंहकुलतिलकमहारायश्रीकनकसिंहात्मजकोदंडपरशुराममानोन्नतमहारायश्रीकीर्त्तिसिंहप्रयुक्तस्वराट्संम्राडग्निचित्स्थपतिमहायाज्ञिकश्रीविष्णुशर्मविरचिते कीर्त्तिप्रकाशे निबंधराजे समयप्रकाशे क[ाल]स्य निर्णेयत्वमहोरात्रमासर्त्वयनसंवत्सरनिर्णयः ॥ १ ॥

अथ मासशुद्ध्यनुरोधेन प्रसंगान्मलमासो निर्णीयते fol. 16*b*.

The MS. breaks off abruptly in the middle of this chapter.

Among the authorities quoted in this fragment may be mentioned: *Maṇḍanamiśra,* fol. 7*a*; *Trikāṇḍamaṇḍana,* fol. 12*a*; *Jyotir-Gārgya,* fol. 11*a*; *Uttara-Saura,* fol. 16*a*.

[H. T. COLEBROOKE.]

## 1683.

**18a.** Foll. 68; size 9½ in. by 4 in.; fairly written, in Devanāgarī; ten lines in a page.

*Samayapradīpa,* a treatise on the proper time for the performance of *vratas,* or voluntary acts of ceremonial observance, in three chapters, by *Śrīdatta.*

It begins:

श्रेयः सनादिशतु सालसपक्ष्मपाते
निद्राजिते अपि दृशौ भृशमुन्नमय्य ।
संवाह्यमानचरणाम्बुजजातहर्षो
लक्ष्मीमुखेक्षणपरः परमेश्वरो वः ॥ १ ॥

निबंधेषु निबद्धानि वचनानि विचिन्वता ।
श्रीदत्तेन व्रतादीनां सारमाकृष्य लिख्यते ॥ २ ॥

तत्र पूर्वदिने स्नानादिना शरीरशुद्धिं कृत्वा निरामिषमेकवारं भुक्ता दंतान् संशोध्य व्रतदिने प्रातः स्नात्वा सूर्योदये व्रतं गृह्णीयात् ॥ तत्र प्रयोगः । अद्य सूर्यवारेत्यादिना प्रकारेण व्रतोपयुक्तं कालविशेषं निर्दिश्य भगवन्सूर्य भगवत्यो देवताः उपवासं नक्तमयाचितं वाहं करिष्ये इत्यभिधाय संकल्पं कुर्यात् । अनेकाहसाध्ये व्रते अद्यस्थाने अद्यादीति प्रयोगः ॥ तत्र देवलः ।

अभुक्ता प्रातराहारं स्नात्वाचम्य समाहितः ।
सूर्याद्यदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥

प्रातर्व्रतमाचरेदिति संबंधः । प्रधानपदार्थान्वयस्याभिहितत्वात् ॥ अभुक्ताहारमित्यर्थात्पूर्वदिने एकवचनानुरोधात्तु एकभक्तमायाति । °

Ch. I., *Samayapariccheda* ends fol. 37*b*; II., *Saṃvatsarakrityap.*, fol. 63*a*; III., *Prakīrṇaka-pariccheda*, ends:

गतिमिष्टां यथाकामं प्रददाति त्रिविक्रमः ।
विघ्नो न जायते तस्य यजेद्यस्तु विनायकं ॥

अपहंतु तमः सकलं सम्यक्कर्मप्रचारमपनयतु । [नूनं ॥
समयप्रदीप एष मेतितिथिमेतु(l. स्थितिमेतु) सतां गणे

इति श्रीमहामहोपाध्यायश्रीश्रीदत्तकृते समयप्रदीपे प्रकीर्णकपरिच्छेदस्तृतीयः समाप्तः ॥ संवत् १७१ए ० ॥

Besides *Purāṇas* and *Smṛitis*—incl. *Gauḍa-smṛiti*, viz.:

उपवासे तथा श्राद्धे न खादे(? r. कुर्याद्) दंतधावनं ।
दंतानां काष्ठसंयोगो दहत्या सप्तमं कुलं ॥ fol. 7*b*;

सूर्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
तस्यां स्नानं च दानं च महापातकनाशनं ॥ fol. 59*a*.

the author quotes *Hari*, fol. 64*b* [अत्र हरिर्मेघादिलग्नस्यानिमित्तत्वमाह। ग्रासावच्छिन्नकालस्य गणितप्रमितत्वात्। दर्शनपदस्य तदुपलक्षकत्वात्। न च दर्शनविषयत्वमेव प्रयोजकं कर्मकाले तदभावात्। °]; *Harihara*, fol. 67*a* [हरिहरस्तु पौर्णमास्यमावास्ययोर्युगादित्वे विकल्पमुक्तवान्। केचित्तु राजाज्ञावाक्यबलात्।]

For other MSS. of the work, see Rāj. Mitra, Notices, V., p. 259; Bikāner Cat., p. 452; for a different work of the same title, by *Harihara Bhaṭṭācārya* (the father of *Raghunandana*), Notices, III., p. 55. [H. T. COLEBROOKE.]

## 1684.

**1889.** Foll. 312; size 11½ in. by 5 in.; on the whole fairly written, in Devanāgarī, about the middle of last century; eleven lines in a page.

*Vratārka*, a favourite Digest of matters connected with vows or voluntary rites of penance, compiled by *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha*, and grandson of *Bhaṭṭa Śāṅkara*.

It begins:

दिवाकरपदद्वंद्वं फलद्वंद्वप्रदायकं ।
त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहं ॥ १ ॥

यो जाग्रन्निजकरमंदराद्रिमंथैर्
निर्मथ्य प्रथिततराधकारसिंधुं ।
लोकेभ्यो वितरति सत्प्रकाशरत्नं
तं वंदे वनजवनीविनोदबंधुं ॥ २ ॥

नामं नामं प्रणामोद्धुरभरतचलल्लोचनालिंगनेन
भ्राम्यद्भृंगाब्जभूरिभ्रमजननपरौ जानकीवल्लभांघ्री ।
तातश्रीनीलकंठामलपदकृपया लब्धशास्त्रार्थतत्त्वः
कुर्वे श्रीशंकरो ऽहं सहृदयप्रीतये सद्व्रतार्कं ॥ ३ ॥

तत्र व्रतारंभकालः ॥ हेमाद्रौ गार्ग्यः । °

अथ व्रतधर्माः fol. 4*a*; इति ° परिभाषा 19*b*.

अथादौ प्रतिपद्व्रतानि ib.; इति संवत्सरारंभविधिः 22*a*; ° आरोग्यप्रतिपद्व्रतं 22*b*; ° तिलकव्रतं 24*a*; ° श्रीशिवपुराणे बिल्वरोहणे बिल्वरोटकव्रतं 26*a*.

अथ [द्वितीयाव्रतानि। अथ] कार्त्तिकशुक्लद्वितीयाया यमद्वितीया। ib.; इति हेमाद्रौ भविष्ये यमद्वितीयाविधिः 26*b*.

अथ तृतीयाव्रतानि 27*a*; इति मात्स्ये सौभाग्यशयनव्रतं 28*b*; ° हेमाद्रौ स्कांदे अरुंधतीव्रतं 31*b*; ° भविष्योत्तरे अक्षयतृतीयाव्रतं 32*b*; ° स्वर्णगौरीव्रतं 35*b*; ° हरितालिकाव्रतं 40*a*; ° बृहद्गौरीव्रतं 42*a*; ° सौभाग्यसुंदरीव्रतं 46*a*.

अथ चतुर्थीव्रतानि ib.; इति स्कांदे संकष्टचतुर्थीव्रतं 49*a*; ° दूर्वागणपतिव्रतं 50*a*; ° सिद्धिविनायकव्रतं 54*a*; ° गौरीचतुर्थीव्रतं 65*b*.

अथ पंचमीव्रतानि 65*b*; ऋषिपंचमीव्रतं 67*b*; ° नागदष्टपंचमीव्रतं 72*b*; उपांगललिताव्रतं। इति ° पंचमीव्रतानि 79*a*.

अथ षष्ठीव्रतानि ib.; इति हेमाद्रौ स्कांदे कपिलाषष्ठीव्रतं 82b; ० स्कंदषष्ठीव्रतं ॥ इति ० षष्ठीव्रतानि 83b.

अथ सप्तमीव्रतानि ib.; इति हेमाद्रौ भविष्योत्तरे अमुक्ताभरणसप्तमीव्रतं 88b; ० रथसप्तमीव्रतं 90b; ० अचलासप्तमीव्रतं 92a; ० पुत्रसप्तमीव्रतं ॥ 92b.

अथाष्टमीव्रतानि ib.; इति भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे बुधाष्टमीव्रतं 97a; ० दूर्वाफलव्रतं 99b; जन्माष्टमीव्रतपद्धतिः 103a; ० जन्माष्टमीव्रतं 111a; भविष्योत्तरे ज्येष्ठाव्रतं 113b; महालक्ष्मीव्रतं 119b; अशोकाष्टमीव्रतं 124b.

अथ नवमीव्रतानि ib.; इति स्कंदपुराणे ० रामनवमीव्रतं 132a; दुर्गाभक्तितरंगिण्यां महाष्टमीमहानवम्योः पूजा 139b.

अथ दशमीव्रतानि ib.; इति भविष्योत्तर आशादशव्रतं 140b; ० दशावतारव्रतं 141b; इति मदनरत्ने गोपथब्राह्मणे विजयादशमीविधिः 143a.

अथैकादशीव्रतानि ib.; इति ० निर्जलैकादशीव्रतं 154a; ० शयन्येकादशीव्रतं 155a; ० गोपद्मव्रतं 158a; ० उत्थापनमहोत्सवविधिः 159b; ० हेमाद्रौ भीष्मपंचकं 161b; ० वैतरणीव्रतं 162b; कृष्णैकादशीव्रतं 164a; ० उभयैकादशीव्रतं 166b.

अथ द्वादशीव्रतानि ib.; इति ० हे ० भ ० श्रवणद्वादशीव्रतं 172a; ० भ ० वामनजयंतीव्रतं 174b; ० सुकृतद्वादशीव्रतं 177a.

अथ त्रयोदशीव्रतानि ib.; इति भ ० गोत्रिरात्रव्रतं 185a; ० भ ० अशोकत्रिरात्रव्रतं 187b; ० शनिप्रदोषव्रतं 191b; भ ० अनंगत्रयोदशीव्रतं 194a.

अथ चतुर्दशीव्रतानि ib.; इति हेमाद्रौ नृसिंहपुराणे नृसिंहचतुर्दशीव्रतं 197a; ० अनंतव्रतं 207b; इति भ ० कदलीव्रतं 210b; वैकुंठचतुर्दशी 211a; इति श्रीलिंगपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतं 222b; ० स्कांदे शिवरात्र्युद्यापनं 224a.

० स्कांदे (ज्येष्ठपूर्णिमायां) सोद्यापनं सावित्रीव्रतं 233a; ० नारदीये गोपद्मव्रतं 235a; ० वाराहे कोकिलाव्रतं 241b; ० नारदीये कोकिलाव्रतोद्यापनं 242b; ० रक्षाबंधनविधिः 243b; ० शिवरहस्ये उमामहेश्वरव्रतं 249b; ० कोजागरव्रतं 253a; ० स्कांदोक्तमर्धोदयव्रतं 255a; इति भविष्ये सोद्यापनं सोमवत्यमावास्याव्रतं ॥ इति ० अमावास्याव्रतानि ॥ 260a.

अथ चातुर्मास्यादिव्रतानि 260a; इति श्रीभविष्योत्तरपुराणे चरलक्ष्मीव्रतं 265a; ० स्कांदे दानाफलव्रतं 267a; ० भविष्योत्तरे धारणपारणव्रतं 268b; ० विष्णुरहस्योक्तं मासोपवासव्रतं 274a; ० देवीपुराणे मलमासव्रतं 278b; इति मासव्रतानि 279a.

अथ वारव्रतानि 279a; इति सौरधर्मोक्तं सूर्यव्रतं 281a; ० स्कांदे आदित्यव्रतं 282b; ० स्कांदे सोमवारव्रतं 285a; ० हेमाद्रौ पाद्मे भौमवारव्रतं 288b; ० पद्मपुराणोक्तं मंगलव्रतं ॥ इति ० वासरव्रतानि ॥ 289b.

अथ संक्रांतिव्रतानि हेमाद्रौ स्कांदे। ib.; इति धान्यसंक्रांतिव्रतं 290b; लवणसंक्रांतिव्रतं ib.; रूपसं०, तेजसं० 291a; सौभाग्यसं०, तांबूलसं०, ० मनोरथसं० 291b; आयुःसं० 292b; ० संक्रांत्युद्यापनं 293a; इति घृतकंबलविधा 293a;

अथ व्यतिपातव्रतं वाराहे। ib.; इति व्यतीपातव्रतं 297b; इति लक्षपूजाविधिः 299b; ० भविष्योत्तरे ० लक्षनमस्कारविधा 301a; ० वायुपुराणे लक्षवर्तिकथा 304b; ० अगस्त्यार्घविधिः 306b; ० सोद्यापनं अश्वत्थव्रतं 308a; ० पार्थिवलिंगोद्यापनं 309b; इति व्रतार्के तुलसीविवाहः ॥ इति श्रीमीमांसापारावारपारीणभट्टशंकरसूरिसूनुभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के समाप्तिमगमत् ॥ 310a.

Then follows an *anukramaṇikā* in *ślokas*, beginning:

व्रतार्के विततग्रंथे सुग्रहार्थविपश्चितं ।
बहूनर्थवितानर्थान्दर्शयामि यथाक्रमं ॥ ०

It ends:

सनिर्णयानि यानीह कथितानि व्रतानि तु ।
तेषां द्रुताप्तये भट्टशंकरो ऽनुक्रमं व्यधात् ॥

इति व्रतार्कस्यानुक्रमणीका नाम समाप्तव्रतार्कः ॥

The author wrote his *Kuṇḍoddyotadarśana* (or *Kuṇḍabhāskara*) in 1671 A.D. For the family tree see V. N. Mandlik, *Vyavahāra Mayūkha*, p. lxxvi. [Dr. John Taylor.]

## 1685, 1686.

**1630, 1631.** Foll. 1–215, 216–426; size 9¾ in. by 4 in.; good Devanāgarī writing of 1796 A.D.; nine lines in a page.

*Vratārka.*

Colophon: इति श्रीमीमांसकभट्टश्रीमन्नीलकंठात्मजभट्टश्रीमच्छंकरकृतौ व्रतार्के अनुक्रमणिका समाप्तमगमत् ॥

[H. T. Colebrooke.]

## 1687, 1688.

**2360, 2361.** Foll. 1–224, 225–452; size $10\frac{3}{4}$ in. by 5 in.; good Devanāgarī writing of the latter part of the last century; nine lines in a page.

The same work. [Gaikawar.]

## 1689, 1690.

**2784, 2785.** Foll. 1–177, 178–343; indifferent Devanāgarī writing of the latter part of last century; ten lines in a page.

The same work.

[Coll. of Fort William.]

## 1691.

**2485.** Foll. 397 (253–263 of which are missing); size 11 in. by $4\frac{3}{4}$ in.; Devanāgarī character, legibly written in 1705 A.D.; ten lines in a page.

Another copy of *Bhaṭṭa Śaṅkara's Vratārka.*

For other MSS. see Weber, Cat. Berl. nos. 1178–80; Rāj. Mitra, Notices, IX., p. 303; Bikāner Cat., p. 499; Burnell, Tanjore MSS., p. 138*b*. [?]

## 1692, 1693.

**2196, 2197.** Foll. 1–344, 345–667; size 11 in. by 5 in.; well written, in Devanāgarī, towards the end of the last century; ten lines in a page.

*Vratarāja*, another digest of matters relating to voluntary fasts and observances, highly esteemed in Western India, and compiled at Benares, in 1736, by *Viśvanātha* (*Daivajñaśarman*), son of *Gopāla.*

For an analysis of part of the work, see Aufrecht, Cat. Bodl., nos. 663, 664.

Vol. II. begins in the *ekādaśīvrata.*

[Gaikawar.]

## 1694, 1695.

**2199, 2200.** Foll. 1–342, 343–674; size 11 in. by $5\frac{1}{4}$ in.; fairly written, in Devanāgarī, about the end of last century; ten lines in a page.

The same work. [Gaikawar.]

## 1696, 1697.

**2061, 2062.** Foll. 1–344, 345–383; size $10\frac{3}{4}$ in. by 5 in.; legibly written, in Devanāgarī, about the end of last century; ten lines in a page.

The same work. [Gaikawar.]

## 1698.

**773.** Foll. 122; size 10 in. by $4\frac{1}{2}$ in.; legibly written, in Devanāgarī, towards the end of last century.

Another MS. of the *Vratarāja*, differing considerably in its introductory verses, and omitting the one containing the date of its composition:

भवानीतनयाद्याद्यतमयानंददायक ।
ततः सर्वे जनाद्यौघौ हारीन् (? यतः सर्वो जनाद्योघो [ऽहारीत्) ढुंढे नमो ऽस्तु ते ॥ १ ॥
जयति जयति काशी काशितज्ञानराशिः
शिवहरिहरधातृश्रीगणेशांबिकानां ।
निवसतिरियमाद्या तां भजध्वं भजध्वं
स्मरत नमत शुद्धां शुद्धये कीर्तयध्वं ॥ २ ॥
विलोक्य विविधान् ग्रंथाँल्लिख्यते सुजनाय वै ।
तन्निमित्तो मयारंभः किमज्ञातं मनीषिणः ॥ ३ ॥
चित्रा(*r.* चित्त)पावनजातीयशांडिल्यकुलमंडनः ।
गोपालात्मजदैवज्ञः संगमेश्वरसंस्थितः ॥ ४ ॥
नत्वा श्रीविघ्नराजं च गुरून् पितृपितामहान् ।
कुर्वे वै विश्वनाथो ऽहं व्रतराजं सुविस्तरं ॥ ५ ॥

अथ व्रतराजप्रारंभः । °

The MS. is incomplete, ending with the *śukla-ekādaśī-udyāpana.*

[H. T. Colebrooke.]

## 1699, 1700.

**2178, 2179.** Foll. 1–320, 321–675; size 11 in. by 5 in.; clear Devanāgarī writing of the latter part of last century; eleven lines in a page.

The same work. [Gaikawar.]

## 1701.

**1818.** Foll. 489, two of which (221 and 222) are missing; size 12 in. by 5 in.; well written, in Devanāgarī; 11 or 12 lines in a page.

Another MS. of the *Vratarāja*, beginning in the same way as the *Vratārka*.

Dated: शके १६९५ वर्षे वर्तमानविजयनामसंवत्सरे आश्विनशुद्धपंचम्यां इंदुवासरे व्रतराज समाप्तमगमत् ॥

There are, besides, three leaves containing two separate tables of contents.

[Dr. John Taylor.]

## 1702.

**1647.** Foll. 164; size 9 in. by 4 in.; fairly written, in Devanāgarī, at the end of the last century; nine lines in a page.

*Vratodyāpanakaumudī*, a manual for the performance of *vratas* (especially the concluding rites) by *Śaṅkara*, son of *Vallāla Sūri*.

It begins:

नत्वा गणेशं संतुष्ट्यै शंकरेण वितन्यते ।
मुदा पुराणविख्यातव्रतोद्यापनकौमुदी ॥

तत्र तावत्सर्वव्रतोपयोगित्वात् किंचिन्निर्णयादिकं लिख्यते । तत्र व्रतलक्षणं । अभियुक्तव्रतप्रसिद्धिविषयः संकल्पविशेष एव व्रतं । तत्र व्रतकालमाह हेमाद्रौ गार्ग्यः । °

It ends: इति श्रीस्कंदपुराणे ईश्वरपार्वतीसंवादे कर्कटिव्रतोद्यापनं संपूर्णं ॥ इति श्रीमच्चित्पावनकुलाब्धिसंभवद्या(?घा)रोपनामकवल्लालसूरिसूनुशंकरविरचितायां व्रतोद्यापनकौमुदी समाप्ता ॥

For another MS. of this treatise, see Rāj. Mitra, Notices, V., p. 132. For the same author's *Tīrthakaumudī*, ib., VII., p. 257.

[H. T. Colebrooke.]

## 1703.

**838.** Foll. 70; size 12¾ in. by 4½ in.; fair, modern Bengalī handwriting; seven lines in a page.

*Saṃkalpakaumudī*, a treatise on the mental resolve (*saṃkalpa*) to undertake some religious observance, by *Rāmakṛishṇa*. It begins:

प्रणम्य कमलाकान्तं देववन्द्यपदाम्बुजं ।
तन्यते रामकृष्णेन रम्या संकल्पकौमुदी ॥

यद्यपि संकल्पपदं नानार्थं तथापि संकल्पः कर्म मानसं इत्यमरकोषे मानसं कर्म मनःसंकल्पितत्वमाहार्यारोपविषयत्वं । यथा रुद्रयामले । न्यायेनोपार्जितं वित्तं मनसोपार्जितं तु या ।
निवेदयेदिष्टदेवे भक्तिश्रद्धासमन्वितः ॥
निवेदयेदिति लाभार्थक-विदधातोस्तेन लाभयेदित्यर्थः । °

It ends: इति छात्रपाठाय गुरुकल्पितं गृहं मठो न तु छात्राणां स्वत्वं आदित्याद्यमतिष्ठ्यादि मीमांसकैर्विग्रहस्वीकारेऽपि तस्या देवतात्वं गम्यते ॥ इति सङ्कल्पकौमुदी समाप्ता ॥

For an analysis of the treatise, see Rāj. Mitra, Notices, IV., p. 222.

[H. T. Colebrooke.]

## 1704, 1705.

**719, 720.** Foll. 1–154, 155–709; size 15¾ in. by 5 in.; excellent, modern Bengalī handwriting; eight lines in a page.

*Dānasāgara*, a digest of matters relating to gifts, their special virtues and modes of consecration, compiled (with the assistance of *Aniruddha*), in Śaka 1091 (A.D. 1169), by *Rājā Vallāla Sena Deva* of Bengal, son of *Vijaya Sena*, and grandson of *Hemanta Sena*.

It begins (with the numbers supplied):

ये साक्षादवनीतलामृतभुजो वर्णाश्रमज्यायसा
येषां पाणिषु निक्षिपन्ति कृतिनः पाथेयमामुष्मिकं ।
यद्वक्त्रोपगताः पुनन्ति जगतीं पुण्यास्त्रिवेदीगिरस्
तेभ्यो निर्भरभक्तिसंभ्रमनमन्मौलिर्द्विजेभ्यो नमः ॥ १ ॥
इन्दुर्विश्वैकवन्द्यः श्रुतिनियमगुरुः क्षत्रचारित्रचर्या-
मर्यादागोत्रशैलः कलिचकितसदाचारसंचारसीमा ।
सद्वृत्तस्वच्छवर्णोज्ज्वलपुरुषगुणाक्लिष्टसंतानधारा-
वन्ध्यैर्मुक्तामरश्रीर्निरगमदवनेर्भूषणं सेनवंशः ॥ २ ॥

तत्रालंकृतसत्पथः स्थिरघनच्छायाभिरामः सतां
स्वच्छन्दप्रणयोपभोगसुलभः कल्पद्रुमो जङ्गमः ।
हेमन्तः परिपन्थिपङ्कजसरःसङ्घस्य नैसर्गिकैर्
उन्नीतः स्वगुणैरुदात्तमहिमा हेमन्तसेनो ऽजनि ॥ ३ ॥

तदनु विजयसेनः प्रादुरासीन्नरेन्द्रो
दिशि विदिशि भजन्ते यस्य वीरध्वजत्वं ।
शिखरविनिहताशा वैजयन्तीं वहन्तः
प्रणतिपरिगृहीताः प्रांशवो राजवंशाः ॥ ४ ॥

सर्वाशाः परिपूरयन्नुपचितश्रीर्दानधारा घनैर्
आसारैरभिषिक्तनिर्मलयशःसानेयभूमण्डलः ।
दैन्योत्तापभृतानुकालजलदः सर्वोत्तरः क्ष्माभृतां
श्रीवल्लालनृपस्ततो ऽजनि गुणाविर्भावगर्भेश्वरः ॥ ५ ॥

वेदार्थस्मृतिसंकथादिपुरुषश्लाघ्यो वरेन्द्रीतले
निस्तन्द्रोज्ज्वलवीचिलासनयनः सारस्वतं ब्रह्मणि ।
षट्कर्माभवदाढ्यशीलनिलयः प्रख्यातसत्यव्रतो
वृत्तारेरिव गीष्पतिर्नरपतेर्यस्यानिरुद्धो गुरुः ॥ ६ ॥

अधिगतसकलपुराणस्मृतिसारः श्रद्धया गुरोरस्मात् ।
कलिकल्मषापसादं दाननिबन्धं विधत्ते कामो ऽपि* ॥ ७ ॥

दुरधिगमधर्मनिर्णयविषयाध्यवसायसंशयस्तिमितः ।
नरपतिरयमारेभे ब्राह्मणचरणारविन्दपरिचर्यां ॥ ८ ॥

शुश्रूषापरितोषितैरविरतं संभूय भूदेवतैर्
दत्तामोघवरप्रसादविपदस्तात्तस्खलत्संशयः (?) ।
श्रीवल्लालनरेश्वरो विरचयत्येतं गुरोः शिक्षया
स्वप्रज्ञावधिदानसागरमयं श्रद्धावतां श्रेयसे ॥ ९ ॥

भूयो भूयः प्रणम्य क्षितिवलयमिलन्मौलिबन्धा द्विजेन्द्राः
श्रीमद्वल्लालसेनः स्थविर(वि)नयनिबद्धाञ्जलिर्याचते वः ।
काले काले भवद्भिः स्मृतसुकृतलवैः पालनीयो ममायं
सामान्यः पुण्यभाजां भवजलधिमहासेतुबन्धो निबन्धः ॥ १० ॥

ब्राह्मं वाराहमाग्नेयं भविष्यं मात्स्यमेव च ।
वामनं वायवीयं च मार्कण्डेयं च वैष्णवं ॥ ११ ॥

शैवं स्कान्दं च पाद्मं च पुराणं कौर्ममेव च ।
पुराणानि तथा कूर्मपुराणादिपुराणयोः ॥ १२ ॥

उक्तान्युपपुराणानि व्यक्तदानविधीनि च ।
आद्यं पुराणं शाम्बं च कालिकाह्वयमेव च ॥ १३ ॥

नन्दिमादित्यसंज्ञं च नारसिंहं तथैव च ।
मार्कण्डेयकृतं तद्वद् विष्णुधर्मोत्तराह्वयं ॥ १४ ॥

शास्त्रं च विष्णुधर्माख्यं गोपथब्राह्मणश्रुतिं ।
श्रीरामायणमाख्यानं महाभारतसंहितां ॥ १५ ॥

मनुं वशिष्ठं संवर्तं याज्ञवल्क्यं च गौतमं ।
कात्यायनं च जाबालं व्यासं दानं बृहस्पतिं ॥ १६ ॥

वृद्धं वशिष्ठं हारीतं पुलस्त्यं विष्णुमेव च ।
शातातपं यमं योगियाज्ञवल्क्यं च देवलं ॥ १७ ॥

बौधायनं चाङ्गिरसं दानव्यासं बृहस्पतिं ।
द्वौ शङ्खलिखितावापस्तम्बं शाट्यायनं तथा ॥ १८ ॥

महाव्यासं लघुव्यासं लघुहारीतमेव च ।
छन्दोगपरिशिष्टं च कात्यायनमशेषतः ॥ १९ ॥

इत्यालोच्य पुराणोपपुराणश्रुतिसंहिताः ।
समाहृतानि दानानि निबन्धस्यास्य सिद्धये ॥ २० ॥

महादानानि कीर्त्यन्ते तत्रादौ षोडश क्रमात् ।
पर्वतानां च दानानि दशैव तदनन्तरं ॥ २१ ॥

ततो गुडादिधेनूनां चत्वारिंशदनुक्रमात् ।
एकन्यूनानि दानानि वक्ष्यन्ते ऽत्र यथाविधि ॥ २२ ॥

अलंकृतानां पञ्चाशच्चत्वारिंशत्त्रयामथ ।
दानान्यलंकृतगवीसमूहस्य ततस्त्रिधा ॥ २३ ॥

ततो ऽनलंकृतगवीदानानि दश पञ्च च ।
तथानलंकृतगवीसमूहस्य च सप्तधा ॥ २४ ॥

अलंकृतानां दानानि वृषाणामष्टधा तथा ।
ततो ऽनलंकृतानां तु दश दानानि पञ्च च ॥ २५ ॥

गवाह्निकप्रदानानि दशधा तदनन्तरं ।
भूमेर्दानानि कीर्त्यन्ते पञ्च पञ्चाशदेव तु ॥ २६ ॥

आसनस्य प्रदानानि षडेतत्तदनन्तरं ।
ततो वारिप्रदानानि षट्त्रिंशदिह संख्यया ॥ २७ ॥

तैजसानां च पात्राणां दश दानान्यनन्तरं ।
दानानि जलपात्राणां ततश्च नव संख्यया ॥ २८ ॥

ततो ऽन्नस्य प्रदानानि त्रिचत्वारिंशदेव तु ।
ततस्त्रीण्येव भक्ष्यस्य पञ्चधा लवणस्य च ॥ २९ ॥

ततो घृतस्य सप्तैव त्रीणि दध्नस्त्वनन्तरं ।
क्षीरस्य च ततस्त्रीणि पञ्च चैक्षवयस्तुनः ॥ ३० ॥

पानकस्याथ चत्वारि फलानां नवधा ततः ।
ततश्चत्वारि मधुनो ऽभ्यङ्गस्य षडनन्तरं ॥ ३१ ॥

त्रयोदशाथ गन्धस्य ततो धूपस्य पञ्चधा ।
अनुलेपनदानानि चत्वारि तदनन्तरं ॥ ३२ ॥

---

* ? l. विधत्ते ऽपि, or निबन्द्धुकामो ऽपि. The MS. reads विधत्ते (marg. विनुत्ते) कामोमो ऽपि ॥

सत्यमेव जयते

अष्टौ (नव corr.)पुष्पस्य वस्त्राणां षड्युक्तविंशतिस्ततः।
त्रीणि यज्ञोपवीतस्य दानानि तदनन्तरं ॥ ३३ ॥
सुवर्णस्याथ दानानि सप्तत्रिंशदनुक्रमात् ।
रजतस्य च दानानि चत्वारि तदनन्तरं ॥ ३४ ॥
सामान्यदेवताभ्यस्तु चतुर्विंशं यथाक्रमात् ।
अलंकारस्य चत्वारि यशस्य नवधा ततः ॥ ३५ ॥
गृहाणां चैव दानानि ततः सप्तदशैव तु ।
नव प्रतिश्रयस्याथ शय्यायास्तु ततो नव ॥ ३६ ॥
इन्धनस्याथ चत्वारि दीपस्यैकोनविंशतिः ।
दानानि च पुराणानामेकोनविंशतिस्ततः ॥ ३७ ॥
नानाविधानां विद्यानां चतुर्विंशतिरेव च ।
त्रिंशद्दानानि कन्यानां प्रेष्याणां तु ततो दश ॥ ३८ ॥
शस्यानामथ दानानि पञ्चविंशतिरेव च ।
तिलस्य दश दानानि तथारामस्य पञ्चधा ॥ ३९ ॥
कीर्त्यन्ते षोडशैवात्र वृषस्य तदनन्तरं ।
संभारस्याथ चत्वारि पशूनामष्टधा ततः ॥ ४० ॥
कृष्णाजिनस्य सप्ताथ छत्रस्य दश पञ्च च ।
कीर्त्यन्ते पञ्चदशधा ततो दानान्युपानहः ॥ ४१ ॥
तथा द्वादश यानानां चत्वारि करिणामथ ।
द्वादशाश्वस्य दानानि चत्वारि महिषस्य च ॥ ४२ ॥
अह चारोग्यदानानि कीर्त्यन्ते तदनन्तरं ।
अभयस्य च दानानि त्रयस्त्रिंशदतः क्रमात् ॥ ४३ ॥
सूर्यादिवाररहितान्येकादशमतः परं ।
मासोपलक्षितेष्वत्र दिनेषु नियतेष्वथ ॥ ४४ ॥
सप्ततिः परिकीर्त्यन्ते दानानि तदनन्तरं ।
मासेष्वनियतेष्वत्र नियतासु तिथिष्वथ ॥ ४५ ॥
क्रमाद्दानानि कीर्त्यन्ते नानारूपाणि विंशतिः ।
मासतिथ्योर्नियतयोस्त्रिपञ्चाशदनन्तरं ॥ ४६ ॥
चतुर्दश च नक्षत्रनियतासु तिथिष्वथ ।
ततो नक्षत्रविहितान्यष्टौ पञ्चाशदेव तु ॥ ४७ ॥
मासव्यापीनि दानानि षड्वेव तदनन्तरं ।
रविसंक्रमणेष्वेवमेकोनविंशदेव तु ॥ ४८ ॥
धातूपदिष्टानि ततो दानानि दश पञ्च च ।
वत्सरादिप्रदानानि सप्तैव तदनन्तरं ॥ ४९ ॥
विप्रकीर्णानि दानानि त्रिपञ्चाशदनन्तरं ।
सामान्यदेवताभ्यस्तु चतुर्विंशतिधा ततः ॥ ५० ॥

एको(r. एक)न्यूनानि सूर्याय चत्वारिंशदनन्तरं ।
महेश्वराय दानानि ततः सप्तदशैव तु ॥ ५१ ॥
विष्णवे चैव दानानि चतुर्विंशशतं ततः ।
विच्छिद्य पञ्चसप्तधा वर्णिरेका पृथक्कृतैः ॥ ५२ ॥
नानामुनिप्रवचनामृतनिर्यासराशिभिः ।
पञ्चसप्ततिसंयुक्तत्रयोदशशतं मितैः ।
दानैर्निरूप्य यत्नेन नानागमसमाकृतः ॥ ५३ ॥
विद्वत्सभाकमलिनीराजहंसेन भूभुजा ।
श्रीमद्बल्लालसेनेन कृतोऽयं दानसागरः ॥ ५४ ॥
जलाशयानां दानानि तथा च सुरवेश्मनां ।
नोक्तानि सम्यगुक्तानि प्रतिष्ठासागरे यतः ॥ ५५ ॥
श्रुतान्यादिपुराणे तु दानान्यन्दविभागतः ।
आचारसागरोक्तत्वान्न कीर्त्यन्तेऽत्र कृत्स्नशः ॥ ५६ ॥
भागवतं च पुराणं ब्रह्माण्डं चैव नारदीयं च ।
दानविधिशून्यमेतत्त्रयमिह न निबन्धमवधार्य ॥ ५७ ॥
बृहदपि लिङ्गपुराणं मत्स्यपुराणोदितैर्महादानैः ।
अवधार्य लब्धसारं (?)दाननिबन्धेतरनिबन्धे ॥ ५८ ॥
समम्ब्यथपिपुराणं भविष्यमपि संगृहीतमतियत्नात् ।
स्कन्दाष्टमीनयम्योः कल्पौ पापण्डिभिर्यस्तौ ॥ ५९ ॥
लोके प्रसिद्धमेतद्विष्णुरहस्यं च शिवरहस्यं च ।
द्वयमिह न परिगृहीतं संग्रहरूपत्वमवधार्य ॥ ६० ॥
भविष्योत्तरमाचारप्रसिद्धमविरोधि च ।
प्रामाण्यं ज्ञापकादुष्टैर्न्यादस्मात्पृथक्कृतं ॥ ६१ ॥
प्रचरद्रूपतः स्कन्दपुराणैकांशतोऽधिकं ।
यत्खण्डचितयं पौण्ड्रेवावन्तिकथाश्रयं ॥ ६२ ॥
तार्क्ष्यं पुराणमपरं ब्राह्ममाग्नेयमेव च ।*
त्रयोविंशतिसाहस्रं पुराणमपि वैष्णवं ॥ ६३ ॥
षट्साहस्रमितं लिङ्गं पुराणमपरं तथा ।
दीक्षाप्रतिष्ठापाषण्डमुक्तिरत्नपरीक्षणैः ॥ ६४ ॥
मृषा वंशानुचरितैः कोषव्याकरणादिभिः ।
असंगतकथाबन्धपरस्परविरोधतः ॥ ६५ ॥
तन्मीनकेतनादीनां भण्डपाषण्डलिङ्गिनां ।
लोकवञ्चनमालोक्य सर्वमेवावधीरितं ॥ ६६ ॥
तत्तत्पुराणोपपुराणसंख्याबहिष्कृतं कल्मषकर्मयोगात् ।
पाषण्डशास्त्रानुमतं निरूप्य देवीपुराणं न निबद्धमत्र॥६७॥

* Colebrooke notes in the margin: 'Interpolation. See quotation in *Vardhamāna's Tattvāmṛita.*'

सत्यमेव जयते

ये दानधर्मविधिसंस्तुतये पुराणपुण्या-
गमस्मृतिगिरो बहवो विवर्णाः ।
ते ग्रन्थविस्तरभयादविचिन्त्य केचि-
दस्माभिरत्र कथित[ा]ः कलयन्तु सन्तः ॥ ६८ ॥

एवं निरूप्य यत्नेन प्रारब्धे दानसागरे ।
आदौ ब्राह्मणमाहात्म्यं ततो दानगुणस्तुतिः ॥ ६९ ॥

पात्रप्रशंसा पात्राणामपवादस्ततः परं ।
दानस्वरूपं कर्ता च श्रद्धादानविधिं प्रति ॥ ७० ॥

दानस्य कालदेशाश्च देयस्य च निरूपणं ।
अपवादश्च दानानामसंधाननिरूपणं ॥ ७१ ॥

ततो दानस्य च विधिः प्रतिग्रहविधिस्ततः ।
सर्वतः परिभाषा चेत्यर्थाः पञ्चदश क्रमात् ।
निरूप्य मुख्यसम्बन्धार्थं वक्ष्यन्ते ऽत्र महीक्षिता ॥ ७२ ॥

अथ ब्राह्मणप्रशंसा । ०

The *purāṇadāna* is dealt with at fol. 191*b* ff., where the eighteen Purāṇas are enumerated, their extent stated and the merits attaching to gifts of copies of them set forth, in accordance with a passage from the *Matsyapurāṇa*.

The colophon runs thus: इति महाराजाधिराजनिःशङ्कशङ्करश्रीमद्बल्लालसेनविरचिते श्रीदानसागरे वसुदेवसंप्रदानकदानावर्त्तः ॥

धर्मस्याभ्युदयाय नास्तिकपदोच्छेदाय जातः कलौ
श्रीकान्तो ऽपि सरस्वतीपरिवृढः प्रत्यक्षनारायणः ।
पादाम्भोजनिषण्णविश्वयसुधासाम्राज्यलक्ष्मीयुतः
श्रीवल्लालनरेश्वरो विजयते सद्वृत्तचिन्तामणिः ॥

ब्रह्मपुराण वराहपुराण अग्निपुराण भविष्यपुराण मत्स्यपुराण वामनपुराण वायुपुराण मार्कण्डेयपुराण विष्णुपुराण शिवपुराण स्कन्दपुराण पद्मपुराण कूर्मपुराण शाम्बपुराण कालीपुराण देवीपुराण नन्दिपुराण आदित्यपुराण नरसिंहपुराण लिङ्गपुराण महाभारत श्रीभागवत श्रीरामायण विष्णुधर्मोत्तर छन्दोगपरिशिष्ट लघुहारीत बौधायन शाट्यायन मनु याज्ञवल्क्य देवल पैठीनसि कात्यायन शातातप दानव्यास दक्ष देवल वशिष्ठ वृहस्पति यम हारीत पुलस्त्य जावाल आङ्गिरस आपस्तम्ब महाव्यास लघुव्यासाः ॥ एतेषां ग्रन्थानां मतमालोच्य श्रीवल्लालसेनदेवेन दानसागरः कृतः ॥ इति दानसागरः समाप्तः ॥

Then follow five leaves containing a table of contents up to fol. 292*b*.

On the second page of the fifth leaf the authorities are repeated with numbers after them, the *Devīpurāṇa* and *Śrī-Bhāgavata* being omitted. Then follows:

अथ वङ्गदेशीयराज्ञामनुक्रमेण नामानि । तत्र प्रथमं हेमन्तसेनः १ ततः विजयसेनः ततो वल्लालसेनः तेन दानसागरः कृत इति ॥ अस्य गुरुः अनिरुद्धः ॥ अत्र सम्वत्सरादिसमयविशेषपरिचयाय दानसागरनिर्माणवर्षस्यैव सम्वत्सरत्वप्रतिपादनाय लिख्यते । निखिलभूपचक्रतिलकश्रीमद्बल्लालसेनदेवेन पूर्ते शशिनवदशमित १०९१ शकवर्षे दानसागरो रचितः ॥

For another MS. of this work, see Rāj. Mitra, Notices, I., p. 151 (where the date is made to be Śaka 1019); for a different work of the same title (by *Mahārāja Kāmadeva*), ib., VI., p. 239. [H. T. COLEBROOKE.]

## 1706, 1707.

**260, 261.** Foll. 253 and 239 (the latter numbered 254–498, 490–532); size $9\frac{3}{4}$ in. by $5\frac{1}{2}$ in.; written, in Devanāgarī, by several hands, in the last century; 12–18 lines in a page.

*Dānaratnākara*, a comprehensive treatise on gifts, compiled, under directions of King *Anūpa Siṃha*, of Jodhāpur in Marvār, by *Bhaṭṭa Rāma* (with the family name of *Hosiṅga*), son of *Bhaṭṭa Viśvanātha*, and grandson of *Bhaṭṭa Mudgala*. It begins:

शर्वाणीतनयं देवं सर्वाभीष्टप्रदायकं ।
वंदे मंदेतरप्रज्ञाकारणं वारणाननं ॥ १ ॥

कापि कल्पलतिकेव कवीनां
या मतिं वितरतीह नवीनां ।
राजहंसविहितासनां सतीं
तां भजामि वरदां सरस्वतीं ॥ २ ॥

मोचनं सर्वपापानां शशिसूर्यविलोचनं ।
करुणावरुणावासं लक्ष्मीनारायणं नुमः ॥ ३ ॥

विस्फूर्जच्चंद्रहासप्रतिहतरिपुणा प्राज्यसाम्राज्यभाजा
ख्यातं जोधापुरं तद्गुरुमरुविषये येन धात्रेव सृष्टं ।
वीराणामग्रगण्यः प्रबलभुजबलाक्रांतभूमंडलः स
श्रीमात्सूर्यान्वये ऽभून्नृपमुकुटमणी राजयोधाभिधानः ॥ ४ ॥

तत्सूनुः प्रथितो ऽभवत्पृथुसमो बीकाख्यया विक्रमी
राजाजानुभुजो ऽखिलक्षितिभुजां मान्यो वदान्योत्तमः ।
पित्र्यं मानभरादुपेक्ष्य नगरं यः स्वीयनाम्नाकरोद्
बीकानेरमिति प्रतीतमपरं व[ा]स्तुं महाजांगले ॥ ५ ॥

तस्माच्छ्रीलूनकर्णः समभनि विजयी शस्त्रशास्त्रप्रवीणो
ज्ञाता दाता दयालुर्दिशि दिशि कविभिर्गीयमानोरु-
[कीर्तिः ।
छत्राधीशैरसह्यान्दहत इव ततुं मंत्रवन्नामवर्णान्
आकर्ण्याकर्ण्य कर्णे प्रतिभटभुजगैः स्तंभ एवावृतो ऽभूत्
[॥ ६ ॥
जयसिंहस्तस्मादभवदवनीपालतिलको
न को ऽपि स्थातुं यत्पुरत इह शक्तः किल रणे ।
यदीये तेजोऽग्नौ ज्वलति परितो वैरिसुदृशां
व्यवर्धंताश्चर्यं नयनकमलेभ्यो जलसराः ॥ ७ ॥

रणोद्भटद्वेषिनिखातशल्यः
कल्याणमल्लः क्षितिपस्ततो ऽभूत् ।
कल्याणवान्येन समस्तधन्वा
यो जागरूको निशमात्तधन्वा ॥ ८ ॥

ततो रायसिंहो ऽभवद्भूमिपालः
प्रतिस्पर्धिकालः प्रतापी करालः ।
मतौ यो विशालः किलात्युच्चभालः
सदंतमरालः स्फुरत्कीर्तिजालः ॥ ९ ॥

आसीत्तस्माद्विलासी प्रतिबलदलनः साहसी सूरसिंहः
शूरः क्रूरस्वभावः किल सकलकलाकौशलं संदधानः ।
पुण्यागण्यप्रभावा सुरसरिदिव यत्कीर्तिरच्छस्वरूपा-
कूपारं संप्रयाता ह्यपरिमितसुखैर्व्याप्नुवाना धरित्रीं ॥ १० ॥

सौंदर्यादतिदानतो ऽप्यनुगतामाख्यां समाख्यापयन्
विख्यातो नृपतिस्ततः समभवत्कर्णो गुणार्णोनिधिः ।
श्रीनारायणपादपंकजयुगाभ्यर्चाप्रभावस्फुरत्-
साम्राज्यप्रतिनंदितार्थिनिवहः स्वातंत्र्यमुच्चैर्भजन् ॥ ११ ॥

वादैः पंडितमंडलीविरचितैः काव्यैः कदाचित्कवि-
प्रारब्धैः सरसैस्तथा नटगणैः संगीतसंगीतकैः ।
आलापैर्भिषजां परस्परमथ ज्योतिर्विदां चर्चया
प्रीतिं नीतिपरो वहन्मरुमहीराज्यं स चक्रे महीं ॥ १२ ॥

तत एव महाननूपसिंहो
मरुदेशाधिपतिः स्फुरत्प्रतापः ।
अभवन्मतिमान् प्रभुर्मनस्वी
यशसा व्याप्तजगत्त्रये ऽतिशूरः ॥ १३ ॥

आक्रांते यवनैरिहावनितले दांतात्मनां द्वेषिभिर्
ध्वस्ते वेदपथे ऽप्युपेयुषि तथा धर्मे कथाशेषतां ।
धीरो धर्मधुरंधरः क्षितिभुजां दुष्टात्मनां शासिता
वीरः श्रीमदनूपसिंहनृपतिर्धात्रा धरित्र्यां कृतः ॥ १४ ॥

पात्रेभ्यो यः समस्तान्यपि कनकतुलादीनि दानानि नित्यं
प्रादाद्यो ऽतिप्रतापी जगदिदमसुषत्किंच दारिद्र्यदावात् ।
तेन क्षोणीशचूडामणिखचितपदानूपसिंहेन राज्ञा
ग्रन्थो ऽयं दानरत्नाकर इति सुधिया तन्यते प्राज्ञहेतोः
[॥ १५ ॥

मीमांसाद्वयपारगः श्रुतिषु यः सांगासु च ज्ञानवान्
न्यायोद्भावनतीक्ष्णधीः किल वरेण्यो धर्मशास्त्रबुद्धौ ।
होसिंगान्वयभूषणं द्विजवरं तं रामभट्टाभिधं
सत्कृत्य प्रणयात्प्रयुक्तसुधियं ग्रंथे ऽत्र सो ऽयं नृपः ॥ १६ ॥

तदाज्ञयासौ बुधरामभट्टो विचार्य तत्त्वेन महानिबंधान् ।
नवीनयुक्तिग्रथनप्रकारैरेनं प्रबंधं विशदीकरोति ॥ १७ ॥

मया पूर्वं कृताः पंच ग्रंथा राजनियोगतः ।
चमत्कारकरास्ते च यथाबुद्ध्यतिसोज्ज्वलाः ॥ १८ ॥

आद्यो ऽनूपविवेकाख्यः शालग्रामपरीक्षणे ।
ततो ग्रंथो ऽनन्यः पूर्वः सहस्रद्वयसंमितः ॥ १९ ॥

संतानविषये सम्यक् नवसाहस्रिको ऽपरः ।
संतानकल्पलतिका तस्याख्यैव शुभप्रदा ॥ २० ॥

तत्संख्यया कौतुके च ह्यनूपकुतुकार्णवः ।
कृतो ग्रंथस्तृतीयो ऽयं साधकानां हिताय च ॥ २१ ॥

विषबाधानिवृत्त्यर्थमुपायानां प्रदर्शकः ।
सार्धत्रिभिः सहस्रैश्च संमितो ऽयं चतुर्थकः ।
शिष्टानां संमतो नूनमस्याख्या ऽमृतमंजरी ॥ २२ ॥

चतुःसहस्रसंख्यातः कृतो ग्रंथस्तु पंचमः ।
चिकित्सामालतीमाला तस्याख्यान्वर्थिकी शुभा ॥ २३ ॥

एवं पंच कृता ग्रंथा नानाशास्त्रगताश्च ते ।
इदानीं क्रियते सम्यग् दानरत्नाकराभिधः ॥ २४ ॥

दानरत्नाकरे ह्यस्मिन्ग्रंथे ऽगाधे ऽतिदुस्तरे ।
दानरत्नान्यनेकानि महांत्यपि लघूनि च ॥ २५ ॥

दानांगानि तदंगानि सप्रयोगाणि यानि च ।
निमग्नानीति नो भांति क्रमशस्तान्ययत्नतः ॥ २६ ॥

प्राप्त्यर्थं तन्यते ताधन्मयानुक्रमणी शुभा ।
वंशानुक्रमणं पूर्वं कृतं मंगलपूर्वकं ॥ २७ ॥

सत्यमेव जयते

राजानूपक्षितीशस्य निबंधे यः प्रयोजकः ।
होसिंगाख्याभिधो रामः कर्ता ग्रंथस्य दर्शितः ॥ २८ ॥
दुर्लक्षणनिरासेन कृतं दानस्य लक्षणं ।
स्वत्वस्य लक्षणं प्रोक्तं स्वत्वोत्पत्तेश्च कारणं ॥ २९ ॥
दत्तद्रव्यापहरणे दोषसंकीर्तनं कृतं ।
चतुर्विधविधानां च साकल्येन निरूपणं ॥ ३० ॥
अधिकारप्रसंगेन विचारो बहुशः कृतः ।
नित्यनैमित्तिकादीनां कृतं सम्यङ्निरूपणं ॥ ३१ ॥ °

The *anukramaṇikā* occupies about 200 *ślokas;* after which:

अथ दानस्यात्र प्रतिपाद्यत्वात्तस्य स्वरूपलक्षणमंतराप्रतिपादनं न संभवतीति दानलक्षणं तावदुच्यते ॥ °

इति ° प्रशंसा fol. 20*a*; ° सर्वविधदानस्वरूपनिरूपणप्रकरणं fol. 23*a*; ° दानांगप्रकरणं fol. 48*a*; ° परिभाषाप्रकरणं fol. 118*a*; ° उपोद्घातः fol. 130*a*; अथ दानानि प्रतिपाद्यंते fol. 131*a*. It ends:

मीमांसारत्नमाला विलसति हृदये यस्य बुद्धिः प्रबुद्धा
श्रद्धालुर्धर्मसिंधौ वितरणचतुरस्तारको यः परेषां ।
मात्सर्यं यस्य चित्ते न भवति सहसा ब्राह्मणाग्र्यो ऽत्र वेद्यः
सो ऽस्मिन्ग्रंथे नवीने क्षितिपविरचिते हृष्टचित्तः
[प्रभूयात् ॥

स्वस्ति श्रीमत्सकलभूमंडलदिङ्मंडलमंडणनिजभुजार्जितप्रतापामर्दितसकलसाम्राज्यभाजनस्वपदच्युतसंस्थापितानेकमंडलाधीश्वरसकलसामंतचक्रचूडामणिकिरणरंजितचरणारविंदमहाराजाधिराजमहाराजानूपसिंहाज्ञया होसिंगोपनामकभट्टमुद्गलांगज-भट्टविश्वनाथात्मजभट्टरामविरचिते दानरत्नाकरे कर्मविपाकोक्तदानानि समाप्तप्रायं निबंधः ॥

For another MS. of this work (where, by mistake, the patron is called *Bhūpa Siṃha*), see Bikāner Cat., p. 374. For another work of the same title (by *Caṇḍeśvara*), see above, no. 1388.

An *Anūpa Siṃha* figures as the patron of several other works, *e.g.* the *Anūpavilāsa*, by *Maṇirāma* (Bikāner Cat., p. 360), the *Ayutalaksha-Homaprayoga*, by *Bhadrarāma* (ib., p. 365); the *Śrāddhaprayogacintāmaṇi* (ib., p. 471); the *Anūpa-Saṃgītavilāsa*, by *Bhāva Bhaṭṭa* (ib., p. 510).

[H. T. COLEBROOKE.]

## 1708.

**50.** Foll. 332; size 9 in. by $3\frac{3}{4}$ in.; fairly written, in Devanāgarī, by two or three different, modern hands; ten lines in a page.

*Dānahīrāvalīprakāśa*, a compendium of matters relating to gifts, compiled by *Divākara*, son of (*Bhāradvāja*) *Mahādeva;* and supplied with a versified summary of its contents, by the author's younger son, *Vaidyanātha*.

The author wrote his *Ācārārka* in 1686 A.D. (see nos. 1616–18).

It begins:

पद्मिनीगणविकाशकारणं पाकशासनदिशो विभूषणं ।
यज्ञकर्मचयहेतुमन्वहं भावये द्युमणिदेवमन्वहं ॥ १ ॥
रामधामकमनीयमपूर्वं स्नानदानजपसंमुखपूर्वं ।
सेवितं पितृमुखैर्मम पूर्वं तन्ममास्तु हृदये मतिपूर्वं ॥ २ ॥
भवभीतिहरं सुरेश्वरं जगतां कारणकारणं परं ।
अविमुक्तपुराधिवासिनं शिवमीडे प्रणतार्तिभंजनं ॥ ३ ॥
श्रीरामेश्वरसूरिसूनुरभवन्नारायणाख्यो महान्
येनाकार्यविमुक्तके सुविधिना विश्वेश्वरस्थापना ।
तत्पुत्रो विबुधाधिपः क्षितितले श्रीशंकरस्तत्सुतो
जीवेंद्रारिपुरोहितामलमतिः श्रीनीलकंठाभिधः ॥ ४ ॥
तत्पुत्रीतनयो दिवाकरकृती शास्त्रेष्वधीती पितुर्
मीमांसानयकोविदः पुरभिदः क्षेत्राधिवासी सुधीः ।
सद्विद्याविनयादिसद्गुणगणग्रामाभिरामान्गुरून्
देवं चोषाकरं प्रणम्य तनुते श्रीदानहीरावलिम् ॥ ५ ॥

ननु हेमाद्र्यादिषु सत्सु नायमुद्यमस्तव सफल इति चेद्विद्वदविद्वत्साधारणसंक्षेपप्रदर्शनार्थमित्यवधारणपात्रे स्वसत्त्वात्यागपूर्वकः °

इति श्रीमुक्तावलीप्रकाशकारभारद्वाजमहादेवसूरिसूनुसकलविद्यानिधानश्रीदिवाकरविरचिते धर्मशास्त्रसुधानिधौ दानहीरावल्यन्नीप्रकाशे(!)दानोपयोगी(*r.* ग)निर्णयः fol. 11*b*.

इति श्रीदिवाकरविरचिते धर्मशास्त्रसुधानिधौ दानहीरावलीप्रकाश आशौचनिर्णयः fol. 88.

The work ends fol. 325*b*: इति श्रीमद्भारद्वाजमहादेवभट्टात्मजसकलविद्यानिधानश्री-

दिवाकरविरचिते धर्मशास्त्रसुधानिधौ ।
दानहीरावलिग्रंथे ऽनुक्रमं व्यादधात्स्वयं ॥ [१] ॥

मंगलाचरणं पूर्वं मातृवंशयनुवर्णनं(?मातृवंशानु°)।
दानलक्षणमत्रोक्तं विधिकारिण एव च ॥ २ ॥ °

इत्थं दिवाकरसुतेन कनीयसा श्री-
रामानुजेन गुरुभक्तिपरायणेन।
श्रीतातपादरचिते सुजनप्रिये ऽस्मिन्
ग्रंथे क्रमो विलिखितः सवितुः प्रसादात् ॥ ११३ ॥

इति श्रीमद्भारद्वाजदिवाकरसूरिसुतवैजनाथशर्मविरचिता दानहीरावलीप्रकाशानुक्रमणिका समाप्ता ॥ श्रीरविः ॥ श्रीतिथ्यार्काचारार्कौ श्राद्धप्रायश्चित्ते प्रतिष्ठा च संस्काराशौचयुक्तौ दानग्रंथो दिवाकराज्जातः ॥ १ ॥

[H. T. COLEBROOKE.]

## 1709.

**1756.** Foll. 82; size 8½ in. by 3½ in.; legibly written, in Devanāgarī; 12–14 lines in a page.

*Dānacandrikā*, a manual of rules regarding pious donations, by *Bhaṭṭa Divākara*, surnamed *Kala*, of Benares, son of *Bhaṭṭa Mahādeva* (son of *Bālakṛishṇa?*) and *Gaṅgā* (daughter of *Bhaṭṭa Nīlakaṇṭha*, author of the *Mayūkhas*).

It begins:

प्रणम्य मातरं गङ्गां भैरवं वनशङ्करं।
महादेवाख्यपितरं श्रौतस्मार्तविशारदं ॥ १ ॥
दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः।
शिष्टानां तन्यते तुष्ट्यै दानसंक्षेपचंद्रिका ॥ २ ॥

तत्र परस्वत्वो[त्प]त्त्यंतो द्रव्यत्यागो दानं। देवलः। °

इति प्रतिग्रहस्थानानि। अथादौ तुलापुरुषदानं fol. 5*a*; इति ° तुलाकल्पलक्षणं 7*a*; ° घृतादितुलादानफलं 9*a*; ° नानारोगनिरासार्थं द्रव्यविशेषतुलाः 9*b*; इति श्रीदानोद्योतदानरत्नदानमयूखाद्यनुसारेण च कालोपनामकभट्टदिवाकरकृतदानसंक्षेपचंद्रिकायां ताम्रघृतादितुलापुरुषदानप्रयोगः 13*b*; ° गोसहस्रदानप्रयोगः 14*b*; गोशतदान ° 15*b*; गोदशदान 16*a*; इति दश महादानानि 32*a*; इति (दश) गोदानानि 45*a*; इति भूमिदानं, तिलदानं, हिरण्यदानं 45*a*; इति मंदाग्नित्वहरं मेषदानं 48*a*; इति दशाचलदानानि 55*b*; ° नानाशिखरदानानि 56*b*; त्रिशूलदानं 57*a*; दारिद्र्यहरं धनदमूर्तिदानं 57*b*; लक्ष्मीनारायणमूर्तिदानं, हरिहर°, सूर्य°, गणपति°, गणेश°, सरस्वतीमूर्तिदानं 58*a*, etc.; इति घंटादानं, शंखदानं 59*a*; कालचक्रदानं, कालपुरुषदानं 59*b*; कृष्णाजिनदानं 61*b*; शय्यादानं, शयनदानं 62*a*; वस्त्रदानानि 63*b*; ° पात्रदानानि 64*b*; पुस्तकदानं 65*b*; रत्नदानानि 66*a*; ° हेमंते अग्निदानं, दीपदानं, पांथपरिचर्या 67*a*; गोपरिचर्या, धमघटदानं 67*b*; कलशदानं, यज्ञोपवीतदानं 68*a*; अथ मासदानानि 68*a*; ° संक्रांतिदानानि 69*b*; अथ नानाधान्यदानमंत्राः। तत्रादौ तंडुलदानमंत्रः 70*a*; अथ वासरदोषापनोददानानि, सहस्रब्राह्मणभोजनविधिः 75*a*; अथ प्रतिग्रहशुद्धिः 77*a*; अथ राजप्रतिग्रहप्रायश्चित्तं 80*a*; अथ प्रतिपदोक्तानि प्रायश्चित्तानि 81*b*.

It ends: इति दानचंद्रिकायां प्रायश्चित्तानि ॥ समाप्तेयं दानचंद्रिका ॥ स्वस्ति श्रीमद्विक्रमार्कराज्यातीताब्दसंमितिः। भूचाष्टद्विद्विसंख्याकाः १८२२ शुचिकृष्णचतुर्थिका ॥

The work has been published at Benares (1861, 1863). [H. T. COLEBROOKE.]

## 1710.

**618.** Foll. 95; size 9½ in. by 5 in.; clear, modern Devanāgarī writing; 11–13 lines in a page.

The same work.

Colophon: इति श्रीमत्कालोपनामकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्यसूनुभट्टदिवाकरविरचिता दानचंद्रिका समाप्ता ॥

[H. T. COLEBROOKE.]

## 1711.

**1467.** Foll. 133; size 9 in. by 4 in.; good Devanāgarī writing of 1798 A.D.; eight lines in a page.

Another MS. of the *Dānacandrikā*.

For another MS. of this work, see Rāj. Mitra, Notices, I., p. 4; for a different work of the same title, ib., VI., p. 162.

[H. T. COLEBROOKE.]

## 1712.

**248.** Foll. 88; size 12¾ in. by 4¼ in.; careless, modern Bengalī handwriting; seven lines in a page.

*Dānakriyākaumudī*, another treatise on religious gifts, by *Govinda Kavi*.

It begins:

श्रीगोविन्दपदद्वन्द्वनखेन्दुद्युतिसन्ततिः ।
सन्तश्चिन्ताभिरुद्भ्रान्तचित्तध्वान्तं धुनोतु नः ॥

आलोच्याखिलसंग्रहानविकलं दृष्ट्वा पुराणान्यपि
प्रोक्ताः सम्यगथो विविच्य मुनिभिर्मन्वादिभिः संहिताः ।
श्रीमत्तातपदारविन्दविगलद्धूलीभरोद्देशतः
श्रीगोविन्दकविः करोति गहनां दानक्रियाकौमुदीं ॥

अथ दानविधिः॥ तत्र संवर्तः। दानं वै विधिवद्देयमशुभानां च नाशनं । °

अथ भूमिदानं fol. 22*a*; अथान्नदानं 24*a*; अथ गन्धदानं 26*b*; अथ पुष्पदानं° फलदानं 27*a*; अथ छत्रदानं 29*a*; अथ गृहदानं 31*b*; अथ गुडधेन्वादिदानं 32*b*; अथ तिलदानं 33*b*; अथ ग्रामशिलादानं 36*a*; अथ कृष्णाजिनदानं 44*b*; अतः प्रसङ्गसंगत्या वृषोत्सर्गो विविच्यते 49*b*.

It ends:

कनकालंकृतां कृत्वा जले गामवतारयेत् ।
सामवेदी तु विशेषं दात्रा कर्म कारयेत् (!) ॥

इति श्रीगोविन्दकविकृतदानक्रियाकौमुदी समाप्ता ॥ ° लिखितं श्रीकृष्णमोहनदेवशर्मणा ॥

[H. T. COLEBROOKE.]

## 1713.

**2585.** Foll. 276 (foll. 49–64 of which are wanting); size 12 in. by 4½ in.; fairly written in Devanāgarī, by several hands; 8–13 lines in a page.

*Nityadānādipaddhati*, a compilation (from *Purāṇas* and other works) on various kinds of legal gifts and their consecration, as well as various other religious observances, by (*Tripāṭhin*) *Śāmajit* (? *Śyāmajit*).

It begins:

नित्यदानादिपद्धतिर्लिख्यते ॥ तत्रादौ प्रातःस्नानादि देवपूजनांतं विधाय दानादिकं कुर्यात् ॥ तत्रादौ छायादानं । तत्प्रतिग्राहकब्राह्मणपूजां विधाय प्रयोगं कुर्यात् ॥ प्रयोगश्च । अत्राद्येत्यादिदेशकालाद्युच्चार्य मम शरीर उत्पन्नदिव्यांतरिक्षभौमात्मकत्रिविधतापपापपरिहारार्थं शयनसमयोत्पन्नदुःस्वप्नाद्यत्र-कदोपनिवृत्त्यर्थमिदं ताम्रपत्रं घृतपूर्णं हिरण्यपात्रप्रत्याम्नायद्रव्यसहितं ब्राह्मणायाहं संप्रददे ॥ °

इति दानखंडे बह्वृचपरिशिष्टोक्तं स्वस्तिवाचनं समाप्तं fol. 8*b*; इति नवरात्रव्रतविधिः fol. 20*a*; इति दीपावलिकृत्यं (or दीपदानकर्म) fol. 26*b*; इति सकृद्दानसंकल्पः fol. 35*a*; then follow various kinds of worship; (*Śiva*, foll. 42–46*b*); इति मत्स्यपुराणोक्तग्रहणशांतिविधिः fol. 48*a*; at the end of fol. 48: अथ ग्रहणदानानि; fol. 65 begins: अथ पंचशत आमान्नानि the intermediate leaves being missing); इति व्रतदानादिफलं fol. 67*b*; ° प्रतिमादिलक्षणं fol. 68*a*; various kinds of स्नान (जल° दधि° गोमय° तुलसी etc.); अथ सर्वोदयसमयपद्धतिर्लिख्यते fol. 87*a*; ° दशावतारदानप्रयोगः fol. 90*b*, etc.; इति श्रीमत्त्रिपाठिशामजिद्विरचिता सर्वोत्पातशांतिः । अथ नवग्रहजपस्य मृत्युंजयजपस्य च दशांशहोमपूर्णाहुतिप्रकारो लिख्यते fol. 112*a*; अथ महार्णवोक्तसर्वज्वरहरकुंभदानविधिर्लिख्यते । fol. 157*b*, here follow various *vratodyāpanāni*; foll. 201–7, various kinds of *dāna* (*bhūyasī-*, *gomithuna-*, *vaitaraṇī-*, *ashṭa mahā-*, *hiraṇya-*, etc.); various kinds of *aśauca* (*garbhasrāva-*, °*pāta-*, etc.); कुंडमंडपपद्धतिः from fol. 223*b* (begins: तत्रकुंडाधारत्वात्प्रथमं मंडपो विचार्यते ।); [अथ मंडपारोपस्थानानि fol. 248*b*; इति श्रीविश्वकर्मकृताजयप्रस्थाधिकारे लक्ष्मीप्रियमंडपः fol. 251*b*; इति ° प्राग्ग्रीवादिपंचाशन्मंडपनिर्णयः fol. 255*b*, etc.]; वापीकूपतडागानां विधिः from fol. 259*b* (begins: सूत उवाच । कथमाराध्यते विष्णुर्जलशायी सदा विभुः । °)

The compilation ends: इति श्रीभविष्यपुराणोक्तविधिना चवाडीश्रीशामजीकृता श्रीकृष्णजन्माष्टमीव्रतोद्यापनपद्धतिः ॥

[MACK. COLL.]

## 1714.

**2715.** Foll. 42; size 8¾ in. by 3¾ in.; fair Devanāgarī writing of about 1700 A.D.; 10–12 lines in a page.

*Shoḍaśa-Mahādānapaddhati*, or *Dānapaddhati*, a handbook of matters relating to 'great' gifts, written by *Rāmadatta*, minister to King

*Nṛisiṃha* of Mithilā, with the assistance of *Bhavaśarman*, his domestic priest.

It begins:

आनम्रक्षितिपालमौलिवलभीप्रसुप्तरत्नांकुर-
ज्योतिःक्षालितपादपद्मयुगलः श्रीमान्नृसिंहो नृपः ।
सौर्यश्रीनिकषः प्रशास्ति मिथिलाभूमंडलं रंजयन्
कार्णाटान्वयभूषणः कृतधियां निर्व्याजकल्पद्रुमः ॥ १ ॥
मंत्री तस्य मरुत्वतो गुरुरिव श्रीरामदत्तः सताम्
आधारः सुकृती समस्तभुवनप्रख्यातदानोत्सवः ।
सौजन्यांबुनिधिः क्षमाकुलगृहं षाड्गुण्यपारंगमो
दाक्षिण्यैकनिकेतनं विजयते प्रज्ञाप्रकर्षाश्रयः ॥ २ ॥
किं ब्रूमो धर्मकृत्यं सकलनयनिधेरस्य यन्नाकनाथः
श्रुत्वा वैराग्यमग्नो भवति निजपदप्रच्यवं शंकमानः ।
किं त्वस्मै देवमंत्री कथयति भगवन्नायमन्यायकारी
वीरः किंचिद्विधत्ते भवति पुनरसौ तेन वाक्येन
[स्वस्थः ॥ ३ ॥
मीमांसार्णवकर्णधारकुलको सत्तर्कचिंतामणिः
सत्याचारविचारचारुचरितः खौपालवंशोद्भवः ।
तं तेन द्विजराजमौलिमणिना वेदांतविद्याविदं
श्रीमन्तं भवशर्मसंज्ञकममुं साग्निं नियुज्यादरात् ॥ ४ ॥
मंत्री (?मंत्रिणोः) पुत्रपौत्रेण मंत्रिरत्नेन धीमता ।
श्रीमता रामदत्तेन क्रियते दानपद्धतिः ॥ ५ ॥

अथ तुलापुरुषदानविधिः ॥ तत्र दानपूर्वदिने प्रातः स्नातः कृतनित्यक्रियो यजमानः प्राङ्मुख उदङ्मुखो वा शुचिराचांतः कुशत्रयतिलजलान्यादाय ॰ ओं प्रतिलोकाधिपस्थानाधिकरणकप्रतिमन्वंतरस्थासोत्तराकैवर्णकिंकणीजालमालिविमानकरणकबद्धप्सरःपूज्यमानात्मविष्णुपुरगमनकल्पकोटिशतावच्छिन्नतल्लोकमहितद्वैतल्लौकिकभूपालमौलिमणिरंजितपादपीठात्मकर्तृकभूतलाधिकरणकराजराजत्वभयनश्रद्धाश्रितदीप्तगतापजितसर्वमहीपलोकात्मकर्तृकयज्ञसहस्रयाज्ययनुभवमकामः(!) श्वस्तुलापुरुषमहादानमहं संप्रतिपादयिष्ये । इति प्रधानसंकल्पं कुर्यात् ॥ ततो मातृपूजनमाभ्युदयिकं च विधाय कुशतिलजलान्यादाय । ओं अद्य श्वःकर्तव्यतुलापुरुषमहादानप्रतिबंधकविघ्ननिवृत्तिकामो भगवंतं गोविंदमुमापतिं विनायकं च पूजयिष्ये । इति संकल्प्य । ओं भगवन् गोविंद इहागच्छ इह तिष्ठेत्यावाहनस्थापने विधाय एतानि पाद्यार्घाचमनीयस्नानीयपुनराचमनीयानि ओं गोविंदाय नमः । इदमनुलेपनं ओं गोविंदाय नमः । एतानि पुष्पाणि ओं गोविंदाय नमः । एष धूपः ओं गोविंदाय नमः । ॰

The 16 *mahādāna* dealt with are the following:—*tulāpurusha* ends fol. 11*b*; *hiraṇyagarbha*, 14*a*; *brahmāṇḍa*, 16*a*; *kalpapādapa*, 18*b*; *gosahasra*, 20*b*; (*hiraṇya-*) *kāmadhenu*, 22*a*; *hiraṇyāśva*, 23*b*; *hiraṇyāśvaratha*, 24*b*; *hemahastiratha*, 26*a*; *pañcalāṅgala*, 27*b*; *pṛithvī*, 30*a*; *viśvacakra*, 35*a*; *kalpalatā*, 37*a*; *saptasāgara*, 38*a*; *ratnadhenu*, 40*a*; *mahābhūtaghaṭa*, 41*a*.

It ends: अथ वातान् ग्रामरत्नैः संपूज्य तदनुज्ञयान्येभ्योऽपि ब्राह्मणेभ्यो दद्यात् । भागद्वयं गुरवे भागाष्टकमृत्विग्भ्यः प्रतिपादयेदिति भूपालः । परिशिष्टमन्यत्तुलापुरुषवत् ॥

महामहत्तममहासामन्ताधिपतिमहाराजाधिराजरामदत्तविरचिता षोडशमहादानपद्धतिरियमावसथिकाग्निहोत्रिमहामहोपाध्यायभवशर्मणः कृतिः समाप्ता ॥ ॰ श्लोकसं॰ ११०० श्रावणे मासि दक्षिणायणे चतुर्थे तिथौ भौमे ॥

On the fly-leaf at the end, the work is also called *Hemādrishoḍaśadāna* both in Nāgarī and Telugu characters. The leaves are marked महा॰ षो॰ [MACK. COLL.]

## 1715.

**676.** Foll. 125; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; indifferent Devanāgarī writing of A.D. 1530 (illegible through wear in places); 14–16 lines in a page.

[*Rūpanārāyaṇīya-*] *Mahādāna - paddhati*, a digest of rules regarding gifts and other religious rites, by *Rūpa Nārayaṇa*.

It commences with 17 couplets, the first, and part of the second of which are illegible:

त[द्]वंशमौक्ति[क]मणिर्भुवि मुग्धसींहो (l. ॰सिंहो)
राजा बभूव भुजनिर्जितमोगिराजः (? l. भोगिराजः) ।
तस्याभवन्मदनसींह (l. सिंह) इति क्षितिंद्र (l. क्षितींद्रः)
सूनुः सपत्नदशनो मदनश्च कांत्या ॥ ३ ॥

The following genealogical line is enumerated in the succeeding *ślokas*: *Kṛishṇasiṃha*, *Devasiṃha*, *Lakshmaṇasiṃha*, *Kaivartasiṃha*, *Diksiṃha* (?), *Amarasiṃha*, *Anehasiṃha* (?), *Vikramasiṃha*, *Tejaḥsiṃha*, *Saukhyāyasiṃha* (?), *Śaktisiṃha*, *Udayasiṃha* (? *Dayāsiṃha*).

स्मृत्यागमपुराणानि निबंधानाविलोच्य च ।
कुरुते ऽसौ महादानपद्धतिं सिद्धतेच्छया ॥ १६ ॥
निखिलानां निबंधानां मतमंचमवेक्ष्य यत् ।
तेन ग्रंथांतरालोककौतुकं यान्त्वतां बुधाः ॥ १७ ॥

तत्र मात्स्यपुराणे । °

तुलपुरुषदानं fol. 7*a*; इत्याभ्युदयिकश्राद्धविधिः ॥ अथ संक्षिप्तश्राद्धं 12*b*; इति ° मधुपर्कविधिः 16*b*; अथ ग्रहादिदेवताहोमः 21*a*; अथ याजुर्वेदिकहोमविधिः 39*a*; अथ ग्रहादिदेवताहोममंत्राः 39*b*; अथ सामगानां कुशकंडिकेतिकर्तव्यताप्रकारः 51*a*; अथाथर्वणवेदस्य कुशकंडिका 57*b*;--इति तुलापुरुषप्रयोगः । अथ हिरण्यगर्भदानं 75*a*; इति सामगानां गर्भाधानादिसंस्कारमंत्राः 82*b*; इत्यथर्ववेदस्य गर्भाधानादिसंस्कारमंत्राः 85*a*; इति हिरण्यगर्भमहादानप्रयोगपद्धतिः 85*b*; ° ब्रह्मांडमहादानप्रयोगपद्धतिः 89*b*; कल्पपादपमहादान° 92*b*; गोसहस्रमहादान° 94*a*; हिरण्यकामधेनु° 99*a*; हिरण्याश्वदान° 100*b*; हेमाश्वरथदान° 103*a*; हेमहस्तिरथ° 105*b*; पंचलांगलमहादान° 109*a*; पृथ्वीमहादान° 112*a*; विश्वचक्रमहादान ° 116*a*; कल्पलतामहादान ° 118*a*; सप्तसागरमहादान ° 120*b*; रत्नधेनुदान ° 123*a*; महाभूतघटदान°

It ends: इति श्रीरूपनारायणीये महादानप्रयोगपद्धतौ महाभूतघटदानप्रयोगपद्धतिः समाप्ता॥ शाके १४५२ विकृतसंवत्सरे भाद्रपदवदि ५ रवौ पुस्तकं रामोपाध्यायेन लिखितं ॥

[H. T. Colebrooke.]

## 1716.

**52.** Foll. 207, the first two of which are wanting; size 9½ in. by 3½ in.; legibly written, in Devanāgarī, in A.D. 1581; 10–13 lines in a page.

*Saṃgrāmasāhīya-Vivekadīpikā*, another treatise on gifts, compiled by *Dāmodara* (under the auspices of *Saṃgrāma Śāha*).

इति श्रीसंग्रामसाहीये विवेकदीपके श्रीदामोदरविरचिते सामान्येतिकर्तव्यतानिर्णयः ॥ अथ प्रत्येकं दानानां प्रमाणनिर्णये प्रयोगपद्धतौ ° fol. 8*b*.

इति नानातुलादानप्रकारः ॥ इति ° तुलापुरुषनिर्णयः ॥ अथ तुलापुरुषमहादानप्रयोगः ॥ fol. 48*b*.

इति माध्यंदिनीयमधुपर्कविधिः 60*b*; ° सामगानां कौथुमशाखीयानां मधुपर्कविधिः॥ अथाथर्वणिकमधुपर्कविधिः 62*a*; अथ यजुर्वेदाग्निस्थापनं 66*b*; अथ दशलोकपालहोमः 76*a*;--- इति सामवेदीयशान्तिकाध्यायः (propitiatory verses), 112*a*; अथार्ववेदीयशौनकशाखीयशान्तिकाध्यायः 127*a*; then follow some chapters on *pūrṇāhuti;* after which the sixteen *mahādāna*, in the same order as above, p. 550*a*, *b*.

Colophon: इति श्रीसंग्रामसाहीये विवेकदीपके श्रीदामोदरविरचिते महाभूतघटमहादानपद्धतिः ॥ ° संवत् १६३८ समये कार्त्तिकवदि ९ शनौ लिखितं केशवभटेन ग्रंथसंख्या ७४०० ॥

For another MS. incomplete at the beginning, see Rāj. Mitra, Notices, X., p. 6; for a *Divyanirṇaya*, likewise compiled by *Dāmodara Ṭhakkura*, under the auspices of *Saṃgrāma Śāh*, ib., VI., p. 40. [H. T. Colebrooke.]

## 1717.

**1469.** Foll. 109 (foll. 43 and 44 of which are missing); size 9 in. by 4 in.; indifferent Devanāgarī writing of about the middle of last century; nine lines in a page.

*Jalāśayārāmotsargavidhi*, a treatise on the dedication of tanks, wells, groves etc., by *Bhaṭṭa Nārāyaṇa*, son of *Bhaṭṭa Rāmeśvara*. Rather incorrect.

The MS. begins:

तत्रादौ तद्विष्युत्रापिकाशुश्चतुर्विधौ (?*r.* °पिकोत्सर्गविधौ) तत्कार्यप्रवृत्युत्वमिका (?*r.* °प्रवृत्तिस्तुत्यात्मिका) ज[लाश]यप्रशंसा॥ यमः। कूपारामप्रदाकारी तथा वृक्षं च रोपकः। कन्याप्रदं सेतुकारी स्वर्गं प्राप्नोत्यसंशयं॥ तडागे यस्य पानीयं सततं खलु तिष्ठति। स्वर्गलोके गतिस्तस्य नात्र कार्या विचारणा ॥ °

इति नारायणभट्टकृते जलाशयाद्युत्सर्गविधौ जलाशयप्रशंसा॥ अथ जलाशयदेशः। fol. 4*a*; इति ° जलाशयदेशतत्परिमाणारंभोत्सर्गकालनिरूपणं 7*b*; इति° त[डागा]द्युपया[त]शुद्धिः 13*b*, etc.

Fol. 50*a*: इति° मंडपकुंडवारुणमंडलनिर्माणादिप्रकारः॥ अथ जलाशयोत्सर्गप्रयोगः। उत्तरायणे माघादिमासषट्कान्यतमे मासि कार्त्तिके च मकरकर्ककुंभमीनवृषमिथुनकन्यातुलावृश्चिकान्यतमराशिस्थिते वा सूर्ये मेषधनुःस्थेऽपीति रूपनारायणः। ° इति ° तडागोत्सर्गविधिपद्धतिः 98*a*.

Fol. 99*b*: इति वापीकूपोत्सर्गविशेषविधिः ॥

उक्ता जलाशयोत्सर्गे भट्टरामेश्वरात्मजः ।
भट्टनारायणो ब्रूत आरामोत्सर्गपद्धतिं ॥

तत्र वृक्षारोपणे फलमुक्तं भविष्ये । ०

It ends:

भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
व्यधत्त रुचिरां काश्यामारामोत्सर्गपद्धतिं ॥ इति ०

[H. T. COLEBROOKE.]

## 1718.

**785a.** Foll. 36; size 11½ in. by 4¼ in.; indifferent Devanāgarī writing of about the middle of last century; 10 or 11 lines in a page.

The second (or practical) portion of *Bhaṭṭa Nārāyaṇa's* treatise; corresponding to foll. 50–109 of the preceding MS.

[H. T. COLEBROOKE.]

## 1719.

**515.** Foll. 73; size 10 in. by 3¾ in.; fair Devanāgarī writing of c. 1780 A.D.; 10 or 11 lines in a page.

*Tristhalīsetu* (or *Tīrthatrayīsetu*), a comprehensive treatise on pilgrimage, by *Nārāyaṇa Bhaṭṭa*, son of *Bhaṭṭa Rāmeśvara Sūri*, and grandson of *Govinda Bhaṭṭa*.

Part I., or *Sāmānyapraghaṭṭaka*, treating of the ceremonies to be performed at sacred bathing-places generally. It begins:

सरस्वतीं नमस्यामः प्रत्यूहव्यूहहानये ।
यदेकतानचित्तानां चित्ते संविद्विसृत्वरा ॥ १ ॥

विघ्नाधिप नमस्तुभ्यं विघ्नसंघं विघातय ।
प्रपञ्चं रचयामुञ्चं बुद्धिशुद्धिं विधेहि च ॥ २ ॥ ० ३ ॥

विश्वामित्रकुलोदधौ विधुरिवाखंडः कलानां निधिर्
वाग्गुम्फे निखिले ऽपि यस्य च सुधा शिष्यप्रशिष्यैश्रिता ।
विद्यापद्मविकाशनैकतरणिः श्रीभट्टगोविंदजः
संख्यावज्जननायणीर्विजयते श्रीभट्टरामेश्वरः ॥ ४ ॥

श्रिता वाराणसी तेन नगरी न गरीयसी ।
यतो ऽन्या नगरी हेमनगरीतिमुपेयुषी ॥ ५ ॥

शास्त्रेष्वधीती पितुरेव यः श्रुतीः
स्मृतीः समालोच्य च देशरीतीः ।
नारायणस्तत्तनयो ऽविमुक्ते
तीर्थत्रयीसेतुमसौ विधत्ते ॥ ७ ॥ ० ९ ॥

साधारणस्तीर्थविधिः प्रथमं सम्यगुच्यते ।
प्रयागादित्रयविधिः पश्चादित्यत्र संग्रहः ॥ १० ॥

इह खलु संसारचक्रे परिवर्तमानानां चत्वारः पुरुषार्था धर्मार्थकाममोक्षाख्याः सकलस्मृतीतिहासपुराणादिषु श्रूयंते सेव्यत्वेन । ०

See Rāj. Mitra, Notices, II., p. 202, where an analysis of this section is given; Bikāner Cat., p. 484.

It begins: ओम् ॥ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि श॑ंशिषद्विश्वे देवाः सूक्तवाचः पृथिवि मातर्मा मा हिंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यास॑ं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरो ऽनुमदंतु ॥ ओं शांतिः शांतिः शांतिः ॥ ओम् ॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ etc., the whole *Śatarudriya* (*Taitt. S.* IV., 5, 1–11); followed (on foll. 9*b*–14*a*) by *Taitt. S.* IV., 7, 1–11 (cp. no. 152, p. 21 of this catalogue). Down to the end of this section, marked रुद्र in the margin, the *mantras* are accented throughout.

Then follows a second section the leaves of which are marked ल॰ न्या॰ (the *Laghunyāsa* proper?), beginning (without accents):

ओम्। प्रजनने ब्रह्मा तिष्ठतु ॥ पादयोर्विष्णुस्तिष्ठतु ॥ हस्तयोर्हरस्तिष्ठतु ॥ बाह्वोरिंद्रस्तिष्ठतु ॥ जठरे अग्निस्तिष्ठतु ॥ हृदये शिवस्तिष्ठतु ॥ कंठे वसवस्तिष्ठंतु ॥ वक्त्रे सरस्वती तिष्ठतु ॥ नासिकयोर्वायुस्तिष्ठतु ॥ नयनयोः सूर्याचंद्रमसौ तिष्ठेतां ॥ कर्णयोरश्विनौ देवौ तिष्ठेतां ॥ ललाटे रुद्रास्तिष्ठंतु ॥ मूर्ध्न्यादित्यास्तिष्ठंतु ॥ शिरसि महादेवस्तिष्ठतु ॥ शिखायां चामुंडा तिष्ठतु ॥ पृष्ठे पिनाकी तिष्ठतु ॥ पुरतः शूली तिष्ठतु ॥ पार्श्वयोः शिवाशंकरौ तिष्ठेतां ॥ सर्वतो वायुस्तिष्ठतु ॥ ततो बहिः सर्वतो ऽग्निर्ज्वालामालापरिवृतस्तिष्ठतु ॥ सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु ॥ मा॑ं रक्षंतु ॥ then accented: अग्निर्मे वाचि श्रितः ॥ वा॑ग्हृदये ॥ हृदयं मयि ॥ अहममृते ॥ अमृतं ब्रह्मणि ॥ वायुर्मे प्राणे श्रितः ॥ प्राणो हृदये ॥ हृदयं मयि ॥ अहं॰ ॥ अमृ॰ ॥ सूर्यो मे चक्षुषि श्रितः ॥——॥ चंद्रमा मे मनसि श्रितः ॥ ॰ ॥ दिशो मे श्रोत्रे श्रिताः ॥ ॰ ॥ आपो मे रेतसि श्रिताः ॥ ॰ ॥ पृथिवी मे शरीरे श्रिता ॥ ॰ ॥ ओषधिवनस्पतयो मे लोमसु श्रिताः ॥ ॰ ॥ इंद्रो मे बले श्रितः ॥ ॰ ॥ पर्जन्यो मे मूर्ध्नि श्रितः ॥ ॰ ॥ ईशानो मे मन्यौ श्रितः ॥ ॰ ॥ आत्मा म आत्मनि श्रितः ॥ ॰ ॥ पुनर्म आत्मा पुनरायुरागात् ॥ पुनः प्राणः पुनराकूतमागात् ॥ वैश्वानरो रश्मिभिर्वावृधानः ॥ अंतस्तिष्ठत्वमृतस्य गोपाः ॥ then without accents:

अस्यैनं सर्वशरीर॑ं स्पृशेत् ॥ आत्मानं श्रीरुद्ररूपं ध्यायेत् ॥

शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकं।
गंगाधरं दशभुजं सर्वाभरणभूषितं ॥
नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनं।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं ॥ ॰ 5 more *ślokas*.

आ त्वा वहंतु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिर्वाता जवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वों २ ॥

स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकं । [भव ॥
तावत्त्वं प्रीतिभावेन लिंगे(देवे marg.) ऽस्मिन्संनिधौ
निराकारो ऽपि पूर्णो ऽपि निर्गुणो ऽपि निरामया ।
मदनुग्रहमासाद्य भव त्वं भव मूर्तिमान् ॥

शांतो भव ॥ इति लघुन्यासः समाप्तः ॥ ध्यानं ॥

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं ॥
पद्मासिनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं ॥

शके १७१६ ॥ आनंदनामसंवत्सरे भाद्रपदशुक्लत्रयोदशि इंदुवारश्रवणनक्षत्रप्रातःकालतद्दिने इदं पुस्तकं रामचंद्रज्योतिषीन लिखितं ॥ विश्वेश्वरसुप्रसंन् ॥ पावसग्रामे न वास्तव्यं(!) ॥ विश्वेश्वरसंनिधं ॥ [Dr. John Taylor.]

## 1785.

**2232.** Foll. 22; size $9\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; fair, modern Devanāgarī writing; 13 or 14 lines in a page.

*Rudrabhāshya*, a commentary, in 478 couplets, on the *Rudrādhyāya* (or *Śatarudriya*), by *Ahobala* (son of *Nṛisiṃha*), of the *Bhāskara* family (cf. no. 152).

It begins:

विश्वेश्वरं नतसुरासुरमौलिरत्न
मंदारकुंदकुसुमावृतपादपीठं ।
भस्मावगुंठमहिकंठमुमोपकंठं
सोत्कंठमाश्रय मनः पटु नीलकंठं ॥ १ ॥
चेतोभृंग महेशपादयुगलं यद्विष्णुनेत्रार्चितं
तत्त्वं मौनि मनोमधुव्रततरव्रातात्रयं संश्रय ।
तत्पादाब्जमगण्यपुण्यविभवप्राप्यं ततो दुस्त्यजं
मा मा संत्यज मामको यदि तदा तत्रैव नित्यं वस ॥ २ ॥
संसारसागरसमुत्तरणप्रवीणः
श्रीमानहोबलमहाकविराजराजः ।
श्रीरुद्रभाष्यतरिमुज्ज्वलपद्यरूपां
चक्रे सदाशिवकृपासमुपात्तविद्यः ॥ ३ ॥
अहोबलः पूजितकालकालः
श्रीकालकालार्चितनीतकालः ।
श्रीरुद्रभाष्ये ज्वलचित्तमूलो
जयत्ययं शंकरदत्तशीलः ॥ ४ ॥
अहोबलो भास्करवंशभानुः
श्रीरुद्रमंत्रार्थविचारदक्षः ।
श्रीरुद्रभाष्यं तनुते नितांतं
प्रकाशयद्रुद्रमगाधभावं ॥ ५ ॥ ° ८ ॥
ब्रह्मचारिण इत्यादि महोपनिषदि स्फुटः ।
श्रीरुद्राध्यायमहिमा पुराणेषु स्मृतिष्वपि ॥ ९ ॥
श्रीरुद्राध्यायमध्यस्थमेकैकमपि नाम यत् ।
तदनंतमहापापमहावनहुताशनः ॥ १० ॥
न जाने गिरिजाजाने रुद्राध्यायजपात्परं ।
यज्ञपादब्जजादीनां पदं पादतलीकृतं ॥ ११ ॥ ° १२ ॥
सृष्टिपालनसंहारान्यो भवत्याद्युपाधिमान् ।
करोति स महारुद्रः श्रीरुद्राध्यायदेवता ॥ १३ ॥
तस्य देवादिदेवस्य श्रुतिप्रोक्तं तनुद्वयं ।
तस्यैतेत्यादिवेदेन बोधितं खलु तद्द्वयं ॥ १४ ॥

तथा चोक्तं ।

तस्यैते तनवो(*r.* तनुवौ) घोरान्या शिवान्येति शिवरहस्ये।
तस्यैते तनयो(*r.* तनुवौ) देवा घोरान्या घोररूपिणी ।
शिवान्या सा यतः(?न्यायतः) साक्षाच्छिवदा शिवरूपिणी

नम इति । [॥ १५ ॥ ° १९ ॥
यागादिभिः समाराध्याधीनत्वात्सप्रसादनं ।
प्रह्वत्वापरपर्यायं नम[:]शब्दार्थमीमहे ॥ २० ॥

ते रुद्र मन्यवे ।
ते सर्ववेदवेदांतप्रतिपाद्यस्य वस्तुनः ।
अमेयानंतकल्याणगुणाभेदस्वरूपिणः ॥ २१ ॥
शक्तिक्रोधात्मिका शंभोः शांतिरूपा भवत्त्वियं ।
मा बाधिष्ट महेशस्य भक्तानिष्टमयोशतां ॥ २२ ॥
हे रुद्र ते तवायं यो मन्युः प्रज्वलनात्मकः ।
क्रोधो ऽनर्थादिमूलो ऽस्ति तादृशाय नमो ऽस्तु नः॥२३॥
रोदयत्यात्मविमुखानिति रुद्रः प्रकीर्तितः ।
रुत्संसाराभिदं(*r.* धं) दुःखं तद्विद्रावयतीति वा॥२४॥°२९॥
अग्रे ऽप्यस्तु नयत्येवमनुषंगो यथोचितं ।

उतो त इषव इति ।
उतो इत्यपि चेत्यर्थे ते तवेषुः शरः स्मृतः ॥ ३० ॥
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
सुवर्णाचलरूपाय धन्वने धनुषे नमः ॥ ३१ ॥
बाहुभ्यामुत बाहुभ्यामपि ते तव नो नमः ।
अनंतबाहुविक्षेपो वेदानामप्यगोचरः ॥ ३२ ॥ ° १२५ ॥

शशिपंजराय । शशिपर्णीलतृणां तद्वज्जरः पिंजर इत्यर्थः ।
शशिपंजरो हरस्तस्मै नमः शशिपंजराय ते ॥ १२६ ॥ °

It ends:

एकादशो ऽपि पापघ्नो ऽनुवाको विवृतो ऽखिलः ।
अहोबलेन सुधिया शिवसंतुष्टिहेतुना ॥ [४]१२ ॥ °
व्याख्या श्रीमदहोबलेन रचिता श्रीभास्करीयेण या
श्रीरुद्रस्य मनोहरातिसुगमा सर्वोस्य भाष्याणि सा ।
श्रीविश्वेशपदारविंदनिरतस्वांतातिसंतोषदा
व्याख्याकल्पलता मनोज्ञफलदा संशीलता(*r.* °लिता)
[सादरं ॥ [४]१४ ॥ °
महेश त्वद्वारि(*r.* चि) स्फुरतु रुचिरा वागतितरां
ममैषा निर्दोषा जय जय महेशेति सततं ।
शिवा सैषा वाणी भवतु शिवदा मह्यमनिशं
महेशानाथं मां शरणद सनाथं कुरु विभो ॥ [४]१६ ॥
इति अहोबलेन विरचितं श्रीरुद्रभाष्यं समाप्तम् ॥

Besides the *Śivarahasya*, which is repeatedly referred to, no other authority is met with.

For the author's commentary on the *Mahimnaḥ Stava* in which the present work is mentioned, see Aufrecht, Cat. Bodl., no. 237.

[R. Johnson.]

## 1786.

**353.** Foll. 92; size 10 in. by 3⅞ in.; fairly written, in the Devanāgarī character; seven lines in a page.

*Rudra-paddhati*, a description of mystic rites connected with the worship of *Śiva*, in the form of *Mahārudra*, composed, in Saṃvat 1515 (A.D. 1459), by *Paraśurāma*, son of *Karṇa*.

In its close imitation of the Vedic ceremonial it keeps clear of the indelicacies usually met with in Tantric writings; only passing allusions being made to the existence of a female deity, under the name of *Umā*.

The treatise begins:

श्रीगणेशं गुरुं नत्वा शारदां वरदप्रदां ।
विप्रः परशुरामाख्यः कुरुते रुद्रपद्धतिं ॥ १ ॥
मुक्तिभुक्तिप्रदातारं सोमं सोमार्धधारिणं ।
सदानन्दमयं शान्तं शिवं वन्दे शिवप्रदं ॥ २ ॥
पूर्वाचार्यकृतीर्दृष्ट्वा स्मृतीश्चागमसंमतीः ।
हृद्यैः पद्यैर्मुनीन्द्रोक्तैः क्रियते रुद्रपद्धतिः ॥ ३ ॥
पञ्चाङ्ग[म्]पितु रुद्रा(*r.* रुद्रान्) याजुर्वैश्चान्द्विजन्मनां ।
मद्विधानां च मुग्धानां प्रबोधाय प्रबोधिनी ॥ ४ ॥ °

(some 65 *ślokas*); इति जपप्रशंसा fol. 7*a*;

अथ मण्डपकुण्डादिसाधनं यज्ञसिद्धये ।
साधयेत्प्रथमं प्राचीं शङ्कुना वोडुनाथवा ॥ १ ॥

130 *ślokas*; इति ° मंडपकुंडलक्षणं fol. 19*a*;

अथ रुद्रस्य वक्ष्ये ऽहमितिकर्तव्यतां च तां । °

177 *ślokas*; इति ° कर्तव्यता fol. 34*b*; इति ° देहशुद्धिः fol. 37*b* (33 *ślokas*); इति ° पीठपूजा fol. 48*a* (124 *ślokas*); अथ न्यासविधिरुच्यते ॥

अथाभिधास्ये रुद्राणां शान्तये गृहमेधिनां ।
पञ्चाङ्गानां विधानं तद् यत्कृतं हन्ति पातकं ॥

इति ° न्यासविधिः ॥ fol. 62*b* (173 *ślokas*).

नमस्ते षोडशर्चेन देवतावाहनं स्मृतं । ° (94 *ślokas*).

इति ° आहुतिपात्रलक्षणं । fol. 70*b*; अथ होमविधिः ॥

कृतरुद्रजपस्यान्ते होमं कुर्याद् दृशांशतः । ° 220 *śl.*

It ends:

आदौ जपप्रशंसोक्ता ततो मण्डपकुण्डकं ।
इतिकर्तव्यता पश्चाद् देहशुद्धिस्ततः परं ॥
पीठार्चा न्यास आहुत्याः प्रमाणं हवनं ततः ।
एतान्यनुक्रमेणाष्टौ प्रोक्तानि रुद्रपद्धतौ ॥
संवद्विक्रमभूपस्य पञ्चदशशते गते ।
पञ्चदशोत्तरे वर्षे जन्माष्टम्यां प्रकाशिता ॥
उदीच्यजातिविप्रेण कर्णपुत्रेण धीमता ।
कृता परशुरामेण महारुद्रस्य पद्धतिः ॥ २० ॥
इति यदिदमसूक्तं सूक्तमाहोस्विदुक्तं
तदपि मनसि धार्यं द्वेषतो न प्रहार्यं ।
तदपि(*r.* दधति) मुदमशोका बालकोक्तौ हि लोका
मदुपरि रमणीया मित्रता धारणीया ॥

इति होमविधिः समाप्तः ॥ इति श्रीपरशुरामविरचिता रुद्रपद्धतिः समाप्ता ॥ ° संवत् १६७५ वर्षे मासपौषशुद्धद्वादशीवारशुक्र लिखितं प्राग्गौडज्ञातीयदवे श्रीपरमानंदनमहाकालेश्वरपुरे शुभं ॥

[H. T. Colebrooke.]

## 1787.

**1635a.** Foll. 29; size 9⅜ in. by 4 in.; well written, in Devanāgarī, about the latter part of the 16th century; ten lines in a page.

*Rudra-paddhati*, a shorter treatise on the same subject as the preceding one, and perhaps inspired by it, as the partial identity of the introduction might seem to indicate.

It begins:

श्रीगणेशं गुरुं नत्वा शारदां च वरप्रदां ।
सर्वेषामुपकारार्थं लिख्यते रुद्रपद्धतिः ॥ १ ॥
भुक्तिमुक्तिप्रदातारं सोमं सोमार्धधारिणं ।
सदानंदमयं शांतं शिवं वंदे शिवप्रदं ॥ २ ॥

आदौ समासतो विनियोगः । तत्र जाबालश्रुतिः । किं जप्येनामृतत्वं गच्छति शतरुद्रियेणेति ॥ तथा रुद्राध्यायो मुच्यते सर्वपापैरिति श्रुतिः॥ स्मृतिवाक्यैरपि जपहोमादौ शतरुद्रियस्य विनियोगः ॥ तत्र रुद्ररुद्रीमहारुद्रातिरुद्राणां लक्षणान्याह शातातपः । ०

Fol. 4*a*: युगानां त्रिष्णे(? *r.* त्रित्वे) जाते सप्तविंशतितमे कलियुगे प्रथमचरणे॥ श्रीमन्नृपतिविक्रमार्कसंवत्सराणां बार्हस्पत्यमानेन यथासंख्याधिकषोडशशतमे वर्षे। श्रीमत्शालिवाहनशाकात् संख्याकादधिकपंचदशशतमे वर्षे। अमुकनाम्नि संवत्सरे उत्तराशावलंबितश्रीमन्मार्तंडमंडले । अमुकऋतौ अमुकमासे । पक्षे । तिथौ । वारे । नक्षत्रे । योगे । करणे । अमुकस्थे चंद्रे । सवितरि । देवगुरौ । शेषेषु ग्रहेषु यथास्थाने स्थितेषु सत्सु । एवं गुणविशिष्टे पुण्ये देशे काले च । मम सभार्यस्य सपुत्रस्य क्षेमायुरारोग्यपरमैश्वर्यसुखप्राप्त्यर्थं ० अस्मिन्महारुद्राख्ये कर्मणि आचार्यादिऋत्विजां वरणमधुपर्कस्वस्तिवाचनान्यहं करिष्ये । इति संकल्पं कुर्यात् ॥ ०

Fol. 17*a*: इति महारुद्रपद्धतिः ॥ रुद्रविधानं ॥ अथ स्नात्वा सर्वोपद्रवनाशनं । छंदःपुरुषाय नमः । शरीरे न्यसेत् । गौतमभरद्वाजाभ्यां नमो नेत्रयोः । विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः । वसिष्ठभरद्वाजाभ्यां नमो नासिकयोः । अत्रये नमो वाचि । गायत्र्यै छंदसे ऽग्नये नमः शिरसि । ०

It ends: विरूप १ विश्वरूप २ पशुपति ३ ऊर्ध्वलिंग ४ ॥ शेष १ तक्षक २ अनंत ३ वासुकी ४ शंखपाल ५ महापद्म ६ कंबल ७ कर्कोटक ८ ॥ इति रुद्रपीठदेवताक्रमः ॥

Acc. to the passage on fol. 4*a* (Saṃvat 16. ., Śāka 15 . .) the treatise seems to have been composed between A.D. 1578 and 1643; the writing of the MS. pointing to somewhere about the former date.

For the same treatise see Weber, Cat. Berl., no. 1283. [H. T. COLEBROOKE.]

## 1788.

**91A.** Foll. 52; size 10 in. by 4 in.; fairly written, in Devanāgarī, in the latter part of last century; eleven lines in a page; the last six leaves supplied by a different hand.

*Rudrapaddhati*, another manual of *Śiva* worship, by *Dīkshitānanta*, son of *Viśvanātha*.

It begins:

नमामि पार्वतीसूनुं भक्तानां सिद्धिदायकं ।
रुद्रकर्मविधातॄणां चतुर्वर्गफलप्रदं ॥ १ ॥
दीक्षितानंतविज्ञेन विश्वनाथस्य सूनुना ।
रच्यते सुखबोधाय रुद्रपद्धतिरादरात् ॥ २ ॥

श्रीकुलदेव्यै नमः ॥

सुमुखश्चैकदंतश्च पि[ङ्ग]लो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ १ ॥
धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ ०

It ends: ब्रह्मणे भोजनमयुतहोमात्सहस्रगुणा अन्यत्सर्वं लक्षहोमवत् ॥

इति श्रीमद्यज्ञोपवीताभिधानश्रीविश्वनाथसूनुना दी[क्षि]तानंतेन विर----पका----संग्रहरुद्रानुष्ठानत्रिविधाग्रहमखपद्धतिः ॥

[H. T. COLEBROOKE.]

## 1789.

**1345A.** Foll. 27; size 12 in. by 4½ in.; fair, modern Devanāgarī writing; nine lines in a page.

*Śiva-Liṅgapratishṭhā*, or *Liṅgasthāpanavidhi*, a manual of rites to be performed at the setting up and inauguration of the *Liṅga*, by *Ananta*.

It begins:

अथ लिंगप्रतिष्ठा तत्र मूलवाक्यानि मात्स्ये ।
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥ १ ॥ ०

[39 *ślokas;* after which:

इति शिवप्रतिष्ठाकालादिनिर्णयः ।

लक्ष्मीलालितपादाय लावण्यापूर्णसिंधवे ।
नतभक्ताभीष्टदात्रे नमस्ते शेषशायिने ॥ १ ॥
प्रतिष्ठाग्रंथनिचयान् विलोक्यादरमादितः ।
शिवलिंगप्रतिष्ठा श्रीमदनंतेन तन्यते ॥ २ ॥

तत्र तावदुत्तरायणे माघादिपंचमासेषु शुक्लपक्षे चतुर्थीषष्ठ्यष्टमीचतुर्दशीव्यतिरिक्ततिथौ कृष्णपक्षे ऽपि दशम्याः पूर्वमनिषिद्धतिथौ बुधगुरुकाव्यमंदानामन्यतमस्मिन्वारे ऽश्विनीरोहिणीमृगपुनर्वसुपुष्योत्तराहस्तस्वात्यनुराधाज्येष्ठाश्रवणमूलधनिष्ठारेवतीनामन्यतमस्मिन्नक्षत्रे ऽनुपदिष्टे ऽपि स्वदेवत्ये व्यतीपातादिवर्जिते भद्रादिवर्जिते ज्योतिर्विदुक्तग्रहबलवति सुलग्ने शिवादिप्रतिष्ठा कार्या । ०

It ends: अग्ने नयेति प्रदक्षिणा त्रिचतुर्वसिहा(? त्रिश्चतुर्वा सिक्ता) ऽग्निम् । विश्वभुजे नमः । सर्वभुजे नमः । आत्मने नमः । परमात्मने नमः । इति नमस्कृत्य लिंगप्रतिष्ठासिद्ध्यर्थं द्वादश ब्राह्मणान् भोजयिष्ये देवं प्रणिपत्य प्रार्थयेत् ।

यावच्चंद्रावनीसूर्यास्तिष्ठंत्यप्रतिघातिताः ।
तावत्त्वयात्र देवेश स्थेयं भक्तानुकंपया ॥

ततो नमस्कारनामकरणं तन्नाम्ना देवस्येश्वरपूजां कृत्वा आचार्याय गां दत्त्वा ब्रह्मणे वृषभं सदस्यायाश्वं ऋत्विग्भ्यो दक्षिणां दत्त्वा पूर्णतां वाचयेत्ततो मंपदेताग्निं(? मंत्रेणाग्निं) विसृजेत् ॥ इति बौधायनसूत्रोक्तलिंगस्थापनविधिः समाप्तः ॥

[H. T. Colebrooke.]

## 1790.

**1988a.** Foll. 4; size 7½ in. by 4 in.; clear, modern Devanāgarī writing; eight lines in a page.

*Rudrapūjā*, or *Mahādevaparicaryāvidhi*, a manual for the daily worship of *Rudra-Mahādeva*, by means of offerings of flowers and the recitation of Vedic *mantras*.

It begins: अथातो महादेवस्याहरहःपरिचर्याविधिं व्याख्यास्यामः ॥ स्नातः शुचिः शुचौ समे देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वाक्षतपुष्पैर्यथालाभमर्चयित्वा सह पुष्पोदकेन महादेवमावाहयेदों भूः पुरुषमावाहयाम्यों भुवः पुरुषमावाहयाम्यों सुवः पुरुषमावाहयाम्यों भूर्भुवःसुवः पुरुषमावाहयाम्यायातु भगवान्महादेव इत्यथ स्वागतेनाभिनंदति स्वागतमनुस्वागतं भगवते महादेवायैतत्स्वासनं कूर्ममास्तां भगवान्महादेव इत्यत्र कूर्चं ददाति भगवते ऽयं कूर्चो दर्भमयस्त्रिवृद्धरितसुवर्णस्तं जुषस्वेत्यत्र स्थानानि कल्पयत्यग्रतो ब्रह्मणे दक्षिणतः स्कंदाय विनायकाय पश्चिमतः स्थूलायोत्तरत उमायै नंदिकेश्वराय स्थानं कल्पयामीति सर्वत्रानुषजत्येवं कल्पयित्वा यो रुद्रो अग्नाविति यजुषा पात्रमभिमंत्र्य ०

It ends: भूर्भुवःसुवः पुरुषमुद्वासयामि प्रयातु भगवान्महादेव इति विसर्जयति लिंगस्थानेष्वावाहनोद्वासनवर्जमहरहः स्वस्त्ययनमित्याचक्षत इत्याह भगवान् बौधायनः । पंचदशः ।

प्रयातु भगवानीशः सर्वलोकनमस्कृतः ।
अनया पूजया तुष्टः पुनरागमनाय च ॥

The leaves are marked रु० पू०; and on the outer pages the tract is called बौधायनसूत्रोक्तरुद्रपूजाविधिः ॥

[Dr. John Taylor.]

## 1791.

**1988d.** Foll. 8; size 7½ in. by 4 in.; fair, modern Devanāgarī writing; seven lines in a page.

*Pārthiva(liṅga)pūjā*, a manual for making *liṅgas* of earth, founded on the directions given in the *Baudhāyanasūtra*, the *Brihad-Vāsishṭha* and *Laiṅga(purāṇa)*.

It begins: अथ पार्थिवलिंगपूजाप्रकारविधिः ॥ अरण्यतडागनदीतीरादिशुद्धस्थानं अभिलक्ष्योक्तं ।

गत्वा स्थानं नमस्कुर्यान्मंत्रमेतं समुच्चरेत् ।
सर्वाधार धरादेव त्वद्रूपां मृत्तिकामिमां ।
लिंगार्थं तु प्रगृह्णामि प्रसन्नो भव मे प्रभो ॥

इति मंत्रेण मृत्तिका ग्राह्या । मृत्तिकाप्रमाणं ।

यावत्स्यादात्मनः शक्तिर्मृदं तावत्समुद्धरेत् ।
तदर्धं वाथ तस्यार्धं तदर्धं वा तदर्धकं ।
एवं पलद्वयान्न्यूनं न तु कुर्यात्कदाचनेति ॥

शक्त्यनुसारेण मृदमानीय तदुपरि आर्द्रतार्थं जलं दत्त्वा । ओं सद्योजातं प्रपद्यामीति(!) मंत्रेण मृदं हस्तेन गृहीत्वा ०

It ends: यथाशक्ति मूलमंत्रजपं कृत्वा प्रदक्षिणानमस्कारान्कृत्वा ओं महादेवाय नम इति विसर्जयेत् । स्त्रीभिः शूद्रैश्च प्रणवरहितः शिवाय नम इत्येव सर्वत्र मंत्रः पठितव्यः ।

नमोऽन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ।
विरक्तानां तु शूद्राणामेवं पूजा विधीयते ॥

इति सूतसंहितावचनात् ॥ इति पार्थिवपूजा समाप्ता ॥

[Dr. John Taylor.]

## 1792.

**1258c.** Foll. 82; size 9 in. by 3¾ in.; Devanāgarī character; 7 or 8 lines in a page.

*Śivapūjāsaṃgraha*, a manual for worshippers of *Śiva*, by *Vallabhendra Sarasvatī*.

Very incorrect.

The MS. begins: ओं भशुंडुः(?भुशुंडः) कालाग्निरुद्रं भस्मस्नानविधिं ब्रूहीति होवाच। अथ प्रणवेन विमृज्य तद्भस्म प्रणवमंत्रितेन तु तेनैव दिग्बंधं कारयेत्पुनरपि तेनास्त्रमंत्रेणांगानि मूर्धादीनि उद्धूलयन् मलस्नानमिदं। अथ विधिस्नानमासाद्य पंचभिर्मंत्रैस्तंतुक्रमादुद्धूल्य · ईशानेन शिरोदेशं · मुखं तत्पुरुषेण तु · उरोदेशमघोरेण गुह्यं वामदेवेन · °

इति श्रीवल्लभेंद्रकृतभस्ममहात्म्यसंग्रहो नाम प्रथमोध्यायः fol. 20*b*; इति° भस्ममहात्म्यसंग्रहे द्वितीयोध्यायः fol. 41*b*; इति वल्लभेंद्रकृतशिवप्रसादमाहात्म्यसंग्रहे चतुर्थोध्यायः fol. 67*a*.

It ends:

यस्तु शंकरनिर्माल्यं पादेनाक्रमते नरः।
षष्टिवर्षसहस्राणि तिर्यग्योनिषु जायते ॥

इति वल्लभेंद्रस[र]स्वतीकृ[त]शिवपूजसंग्रहे पंचमोध्यायः॥ संवत् १७२४ नलनामसंवत्सरे दक्षिणायने कार्त्तिककृष्णत्रयोदश्यां शनौ श्रीमत्तुलसीविश्वनाथदत्तनूजेन वि॰ लेन लिखितो ऽयं ग्रंथः काश्यां °

[H. T. Colebrooke.]

## 1793.

**1965.** Foll. 16; size 6½ in. by 4 in.; well written, in Devanāgarī, at the beginning of the present century; European paper; nine lines in a page.

*Śivapūjāpaddhati*, a manual of *Śiva*-worship, by *Rāghavānandanātha*.

It begins:

श्रीमच्छिवषडर्णस्य नित्यानुष्ठानपद्धतिः।
संक्षेपादुच्यते नत्वा मौलौ श्रीनाथपादुकां ॥

तत्र यथाविधि गुरोर्मंत्रदीक्षां लब्ध्वा श्रीशिवमुपासीत। ब्राह्मे मुहूर्त उत्थाय स्वशिरसि श्रीगुरुं ध्यात्वा। ओं ऐं अमुकानंदनाथामुको देव्यंबा गुरुश्रीपादुकां पूजयामि नम इति°

इति° संध्याविधिः fol. 3*a*; इति भूतशुद्धिः fol. 5*a*; इति मातृकान्यासः। अथ मूलऋष्यादिन्यासः fol. 6*b*; इति करांगन्यासः fol. 7*b*; इति गोलकन्यासः fol. 8*a*; इत्यंतर्योगः। अथ बाह्यपूजा fol. 9*a*; इति प्रथमावरणं fol. 12*b*, etc.; षष्ठावरणं fol. 13*b*.

It ends: अस्य षट्त्रिंशल्लक्षजपात्मकं पुरश्चरणं पायसाज्यसंमिश्रैः षट्त्रिंशत्सहस्रहोमः। शेषं गुरुतः शास्त्रतश्चावगंतव्यं॥

राघवानंदनाथेन रुक्मिणीकांतसेविना।
निर्मितापद्धतिः शैवी शैवानां सुखसिद्धये ॥

इति राघवरचिता श्रीशिवषडक्षरस्य संक्षिप्तपूजापद्धतिः समाप्ता॥

[Dr. John Taylor.]

## 1794.

**1967B.** Foll. 20; size 6½ in. by 3½ in.; fairly written, in Devanāgarī, at the beginning of the present century; nine or ten lines in a page.

*Śivapūjāprakāra*, another treatise on the same subject.

It begins: ब्राह्मे मुहूर्ते चोत्थाय स्वेष्टदेवतावंदनं कृत्वा बहिर्गत्वा ऽवश्यकादिकं निर्वर्त्य स्नानं कुर्यात्। तच्चोक्तं शिवरहस्ये। °

इत्यंतःस्नानविधिः। अथ भस्मस्नानं fol. 2*a*; इति भस्मधारणं fol. 3*a*; then follow prayers.

It ends:

शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत्।
शिवो जयति सर्वत्र यः शिवः सो ऽहमेव हि ॥

एवं तन्मयो भूत्वा यथासुखं विहरेदिति॥

[Dr. John Taylor.]

## 1795.

**792.** Foll. 28; size 10½ in. by 4 in.; Devanāgarī writing, somewhat difficult to read; 12–14 lines in a page.

*Gopālapaddhati*, a manual for the worship of *Krishṇa*, (?by *Dinakara*, son of *Nrisiṃha*).

It begins:

श्रुतिमस्तकरत्नौघभाराजितपदांबुजे ।
व्रजवासिजनानंदे मुकुंदे रमतां मनः ॥ १ ॥

उत्तिष्ठन् शयनाद्ब्राह्मे मुहूर्ते मंत्रिसत्तमः ।
इंद्रनीलमणिश्यामं गोपरूपं हरिं स्मरेत् ॥ २ ॥

प्रातः स्मरामि सुखबोधतनुं तुरीयं
त्रय्या निरुक्तमपदं पदमिंदिरायाः ।
आमुक्तमुग्धमुनिमाविनि(? r. मानस)तोयबीजं
नंदात्मजं जनिमजस्य जगत्त्रयादेः ॥ ३ ॥

प्रातर्नमामि नमनीयतरं परं यद्
वागीशशंकरशचीपतिभृंगजुष्टं ।
गोगोपगोपललनासुलभं मुरारेः
पादांबुजं निजभयोद्भवनाशगंधि ॥ ४ ॥

प्रातर्नमामि नवनीरजचारुनेत्रं
बिंबाधरोन्नसमुधाकरबिंबवक्त्रं ।
विद्युन्निपीतवसनावृतमेघगात्रं
गोपालमादिपुरुषं वसुदेवपुत्रं ॥ ५ ॥

प्रातर्बलानुजमजं शयनोपविष्टं
निद्रांतरक्तनयनोत्स्मितगोपिजुष्टं
गोगोपहुंकृतिसुगीतिरवाभितुष्टं
सामैकघुष्टमनुचिंतय चित्तपुष्टं ॥ ६ ॥

प्रातः श्रये यदुवरं वरदं वरेण्यं
वृंदारकैर्नतमनंतसखं सखायं ।
दुःखापहं द्रुपदजाजयसज्जनानाम्
आनंदसिंधुमवधीरितधर्मबाधं ॥ ७ ॥

यः श्लोकपंचकमिदं मनुजो मुरारेः
पादारविंदमकरंदविनिष्ट(r. निविष्ट)चेताः ।
संकीर्तयेदथ शृणोति हरेः प्रगे ऽसौ
भूयात्परावरतनो(? r. धनो) भवतः कृपातः ॥ ८ ॥

इति पठन्नुत्थितो यथावच्छौचाचमनदंतधावनानहर्दिन(? हर्दिवं)-द्वादशगंडूषजिह्वोल्लेखनरात्रिवस्त्रपरिवर्तनद्विराचमनानि विधाय शुचिदेशे कंबलाद्यासनं विस्तार्य गायत्र्यभिमंत्रिततोयेन प्रोक्ष्य ओं नमः पद्मासनायेति धेनुमुद्रां प्रदर्श्यासने उपविश्य ।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

इति तर्जन्या भुवं स्पृष्ट्वा ।

अपसर्पंतु ये भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञयेति ॥ ०

It ends: पंचभावनानुसारेण देवं स्वहृदये उद्वास्य पंचांगानि न्यसेदिति सर्वपूजासु समानं ॥

अनावृतनिजानंदगोविंदाश्रमदेशिकैः ।
दर्शितेन यथा किंचित्सूचितं नातिविस्तरं ॥ १ ॥

दिनकृता दशार्णस्य भुक्तिमुक्तिफलावधेः ।
प्रीयतां तेन विश्वात्मा गोपगोपीजनेश्वरः ॥ २ ॥

इत्यों तत्सद्गोपालार्पणमस्तु ॥

गोपालस्य दशार्णस्य पद्धतिर्येन निर्मिता ।
तं कृपालुमहं वंदे नृसिंहं गुरुमीश्वरं ॥ १ ॥

संवत् १६६४ वर्षे पौषमासे लिखितं ॥

[H. T. Colebrooke.]

## 1796.

**945b.** Foll. 64; size 12 in. by 5 in.; good Devanāgarī writing, of about 1730 A.D.; ten lines in a page.

*Bhagavadbhaktivilāsa*, a comprehensive work on the religious ceremonies of the *Vaishṇavas*, by *Gopāla Bhaṭṭa*.

This MS. contains only two chapters (*vilāsa*), viz. the 18th (*mūrtiprādurbhāva*) and 19th (प्रातिष्ठिक), but in the colophons these numbers have been altered to 1st and 2nd *vilāsas*.

The work has been published, with a commentary, Calcutta 1845.

[H. T. Colebrooke.]

## 1797.

**945a.** Foll. 43; size 12 in. by 5 in.; legibly written, in Devanāgarī, about 1770 A.D.; 9 or 10 lines in a page.

*Kṛishṇabhaktikalpavallī* (also called *Bhaktimañjarī*, or *Haribhaktimañjarī*, at the end of chapters 1 and 2), a work on *Kṛishṇa* worship, in four chapters (*mañjarī*).

It begins: ग्रंथारंभे निर्विघ्नपरिसमाप्तिकामो ग्रंथकारः स्वेष्टदेवतां श्रीकृष्णचंद्रं प्रणमति । ब्रह्मसंहितायां श्रीब्रह्माणं प्रति श्रीशेषदेवप्रणीतेन(!) वचनं जानीते ।

चिंतामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभिरभिपालयंतं ।
लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं
गोविंदमादिपुरुषं तमहं भजामि ॥
वेणुं क्वणंतमरविंददलायताक्षं
बर्हावतंसमसितांबुजसुंदरांगं ।
कंदर्पकोटिकमनीयविशेषशोभं
गोविंदमादिपुरुषं तमहं भजामि ॥ २ ॥
आलोलचंद्रकलसद्वनमाल्यवंशी
रत्नांगदं प्रणयकेलिकलाविलासं ।
श्यामं त्रिभंगललितं नियतप्रकाशं
गोविंदमादिपुरुषं तमहं भजामि ॥ ३ ॥ °

12 verses, after which: तदेवमिष्टदेवताप्रणाममुखेन नित्यं श्रीवैकुंठावस्थितश्रीकृष्णः श्रीमूर्तिरेव परमं तत्त्वं । °

Besides various *Purāṇas*, quotations are found from *Uktirahasya* [तत उक्तिरहस्ये यथा ।
ब्राह्ममुहूर्ते उत्थाय मन्त्री सुस्थिरमानसः ।
सेवेत मानसा(? मनसा) कृष्णं दिनं तद्वच्च यामिनीं ॥
भक्तिप्रदो मुक्तिदायी तथा काम्यफलप्रदः ।
चित्तानंदकरस्तत्र प्रकारः कथ्यतेऽधुना ॥
चिंतयेद्यामिनीं शेषचामीकरगृहोत्तमे ।
पर्यंके शयानं निद्रावशं परमपूरुषं ॥ ° ] fol. 33*b*;
*Gautamīyatantra*, 27*b*; *Prabodhacandrodaya* [संमोहयंति मदयंति विडंबयंति निर्भर्त्सयंति रमयंति विषादयंति । ° *Pr.* I. 27], 7*b*; *Brahmasaṃhitā*, 1*b*; *Haribhaktikalpalatā*, 9*a*, 10*a*, etc.; *Haribhaktisudhodaya*, 3*a*, 5*b*, 6*b*, 20*a*.

Ch. I. treats of the nature and various grades of *Bhakti;* II. (beg. fol. 14*b*), of the efficacy of prayers addressed to *Kṛishṇa*, under his many different names; III., fol. 20*a*, gives a description of the *Vaishṇava* paradise, *Vaikuṇṭha*, and its delights; IV., fol. 33*a*, sets forth the means by which access is obtained to it, esp. certain symbolical practices.

It ends:

निष्पुद्गकाष्टपाषाणतुल्यायामुक्तिवन्यया (विष्पुद्गकष°) ।
षानलरूपताम्याश्वे न्यरसोरसभाग्भवेदिति (!) ॥
इति श्रीकृष्णभक्तिकल्पवल्ल्यां चतुर्थी मंजरी ॥

[H. T. COLEBROOKE.]

## 1798.

**1174b.** Foll. 40; size 13 in. by 5¾ in.; fairly written, in Devanāgarī; 6–11 lines in a page.

*Mantrabhāgavatavyākhyā*, or *Mantrarahasyaprakāśikā*, a treatise in four chapters, by *Nīlakaṇṭha*, son of *Govindasūri*, endeavouring, by interpretation of certain Vedic verses, to prove the Veda to relate to *Kṛishṇa*.

It begins:

सत्यं ज्ञानमनंतं यत्तद्विष्णोः परमं पदं ।
प्राप्तुं मंत्रेषु गोपालविष्णोः कर्माणि पश्यति ॥

See Aufrecht, Cat. Bodl., no. 734.

It ends:

वाक्यार्थे व्यासवाल्मीकी पदार्थे यास्कपाणिनी ।
रामकृष्णकथा मंत्रैर्गायतो मम नायकौ ॥ १ ॥
एतच्छतद्वयमृचां रामकृष्णकथानुगं ।
व्याख्यातं भगवांस्तेन तुष्यतात्सात्वतां पतिः ॥ २ ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकंठस्य कृतौ स्वोद्धृतमंत्रभागवतव्याख्यायां मंत्ररहस्यप्रकाशिकायां मथुराकांडश्चतुर्थः ॥ संवत् १८६२ मितिज्येष्ठशुक्लपूर्णिमायां भौमवासरे मिदं पुस्तकं समाप्तं ॥ लिखितं शिवबालकचतुर्वेदीमिदं पुस्तकं ॥
मंत्रभागवतव्याख्याभिधं पुस्तकरत्नकं ।
भास्कराख्यस्य सुधियस्तेन तुष्यतु मापतिः ॥

On the outer page of the MS., and on the margin of the leaves, the treatise is called *Mantrabhāgavata*.

[H. T. COLEBROOKE.]

## 1799.

**172.** Foll. 335; size 12¼ in. by 5½ in.; fairly written, in Devanāgarī, in the latter part of last century (the last leaf by a more recent hand); twelve lines in a page.

*Nityācārapradīpa*, a compendium of *Vaishṇava* religious duties, by *Narasiṃha* (*Nṛisiṃha*), son of *Murāri*, grandson of *Dharādhara Jaimini*(?), and disciple of (? his uncle) *Vighneśvara*.

It begins:

शाखाभिः सकलाभिरुन्नमहिमा नीलाद्रिमूलस्थितिः
पीनस्कंधधृतप्रसूनविभवः स्वानंदकंदोदयः ।
यः शोणाधरपल्लवो ऽप विबुधैः सेव्यः श्रिया शोभितो
भक्तेभ्यो वितरन् फलं विजयते को ऽप्येष कल्पद्रुमः॥१॥

एकचूतविपिनस्य नायकं दर्शयन् स्थापितपुष्पसायकं ।
पुत्रभावगतसिद्धिनायकं संश्रये ऽभिमतसिद्धिदायकं ॥ २ ॥

रूपं दधत्यतिमनोहरनारसिंहं
दैतेयदारणपरं पुरुषे पुराणे ।
श्रेयः समादिशतु सागरसंभवाया:
सानंदविस्मितससंभ्रमदृक्निपातः ॥ ३ ॥

कालिंदीपुलिने कदंबसुतरोर्मूले मनोजाग्नुषा(r. ज्ञ्रुषौ)
ज्वालाभिः कवलीकृतो ऽपि कथमप्याधाय धीरं मनः ।
स्वैरं वेणुमुदीरयन्नथ दृशा साकूतमालोकयन्
गोपस्त्रीपरिवेष्टितो दिशतु नः श्रेयः श्रियो नायकः॥४॥

अमत्सरः सत्समयप्रणेता कौत्सस्य वंशो वसुधावतंसः ।
प्रासादमीमांसकयज्ञयूपैर्येनोत्कलो भूषित एष देशः ॥ ५ ॥

प्रासादे स्वकृते हरिं परि[च]रन्नासीदमुष्मिन् कुले
मीमांसार्णवकर्णधारतरुणो मृत्युंजयः पंडितः ।
विद्याभिः सकलाभिरुज्ज्वलमतिर्यः शुद्धमुक्तावलि-
ग्रंथेनाखिलमेव पूतमकरोत्स्वीयं कुलं चेज्यया ॥ ६ ॥

अमुष्य पुत्रः किल गोपिनाथमिश्रो गुणैर्यस्य वशे वसंतौ ।
जलेशनारायणनामयोगात्पुत्रौ तु मित्रावरुणावुपेतौ॥७॥

अष्टाब्दे मुकविर्गते च नवमो(l. मे) तर्काब्धिपारंगमो
मीमांसाद्वयसत्प्रपंचरचनासंपूर्तिकृद् द्वादशे ।
जल्पैरल्पदिनैर्विजित्य विदुषो यः षोडशे वत्सरे
योगाभ्यासरतः पुराणपुरुषं नारायणः प्राविशत् ॥ ८ ॥

सिद्धेश्वरी दत्तवरा स्वतंत्रा
षड्गौनी(!) यस्य कुले [ऽ]चलासीत् ।
कापीयने ऽहीनमखाग्निचेता
जलेश्वरः कृष्णपरायणो ऽभूत् ॥ ९ ॥

नरसिंहधनंजयाभिधावथ गंगाधरतोन्यखंडलः(!) ।
तनयाः किल वाजपेयिनो ऽस्य च मृत्युंजयपंचमास्त्विमे
[॥ १० ॥

सन्नैतागममुत्कले ऽवतरयन् संक्षेपशारीरके
कृत्वा वार्त्तिकमध्वरेषु निरतः षण्मासदीक्षाव्रती ।
मीमांसा यत एषु वृद्धिमगमत् काश्यां नृसिंहः सुर-
स्रोतस्विन्युदकैकजीवनविधियोगेन सिद्धिं गतः ॥ ११ ॥

देवानंदः सुतो ऽस्याजनि कृतचयनो यज्ञविद्याधुरीणो
वेदाभ्यासप्रयासात्परिषदि विजये यः कृतः पंडितेशः ।
नानादेशादुपेताः सुनिपुणमतयः संघशो यस्य शिष्या
मीमांसातर्कविद्याश्रुतिशिखरमतप्रौढिमध्यापयंति ॥१२॥

अनुजो ऽस्य च पुंडरीकयाजी
बलभद्रो विदितः श्रुतो न येन ।
सदृशः श्रुतिमौलिभट्टतंत्रे
किमु संवत्सरदीक्षया क्रतौ ॥ १३ ॥

अपरे [च] नृसिंहसूनव इह चत्वार उदारचेतसः ।
स्वकुलोचितविद्ययोर्जिताः सततं कृष्णकथापरायणाः॥१४॥

आनंदपुत्रा वसुतेजसो ऽष्टौ वसूत्तमाः किं वसुधामुपेताः ।
यदीयशिष्या अनवाप्तविद्या ये के ऽपि तल्लक्षणमांजनैव
सर्वे च पुत्रा विगतारिमित्रास्
[॥ १५ ॥
ते वाजपेयादिमखैः पवित्राः ।
काले यथावद्विहिताग्निहोत्रा
महद्भिराशासितसच्चरित्राः ॥ १६ ॥

ते वामदेवाभिधवर्धमानौ
समाधवौ तौ भुवनेश्वरौ ।
धराधरस्यानु गदाधरश्च
रविश्च तेषामिह चाष्टमो ऽभूत् ॥ १७ ॥

धराधर[ा]स्याप्रथितस्य जैमिनेर्
जगन्निवासैकजुषो दशात्मजः(? जाः) ।
गरिष्ठविघ्नेश्वरनामसंवृतो
वशिष्ठ एव व्यजनिष्ट पूर्वजः ॥ १८ ॥

मुरारिपीतांबरवासुदेव-
नारायणश्रीपतिकेशवाख्याः ।
वक्रेश्वरश्रीजयदेवकृष्णाः
स्वाचारविद्यास्तनया नवान्ये ॥ १९ ॥

मुरारिपूजार्जितविद्ययोर्जितो
मुरारिरासीत्स्मृतिमौलिपारगः ।
निरंतरं श्रीनरसिंहसेवया
नृसिंहनामाजनि तस्य चात्मजः ॥ २० ॥

श्रीमद्विघ्नेश्वरगुरोः प्राप्तविद्येन तेन च ।
नित्याचारप्रदीपो ऽयं नृसिंहेन प्रणीयते ॥ २१ ॥

तत्र निमित्तोद्देशेन विहितं कर्म नैमित्तिकं । तन्मध्ये नियतनैमित्तिकं यत्तन्नित्यमुच्यते । तत्र यावज्जीवमग्निहोत्रं जुहुयात् । अहरहः संध्यामुपासीत । अहरहर्जुहुयादा काष्ठात् । अहरहर्भूतेभ्यो बलिं च हरेत् । इत्यादि नित्यं । ०

The work, which shows some Tantric tendencies, is divided into two parts, the first of which, consisting of one chapter, *Ācārakalpa*, ends fol. 87*b*. The second part, consisting of three chapters (*bhāgakṛityam*) has a separate paging (foll. 248).

This portion begins:

गोवर्धनोद्धरणकर्मणि संप्रवृत्ते
गोपेषु विस्मितससंभ्रमसत्वरेषु ।
ब्रह्मांडधारणनियंत्रितरोमकूपः
कृष्णो ऽपि सस्मितमुखो भवतः पुनातु ॥

अथ द्वितीयभागकृत्यं ॥ दक्षः ।
द्वितीये च तथा भागे वेदाभ्यासो विधीयते ।
वेदस्वीकरणं पूर्वं विचारो ऽभ्यसनं जपः ॥ १ ॥ ०

Ch. II. ends fol. 80*a* (of orig. pag.); III., fol. 195*a*.

It ends: षडंगं जप्त्वा ऊर्ध्वमन्यज्जपेदिति स्तोत्रानंतरं सहस्रनामादि जपेदित्यर्थः ॥

मध्याह्ने गोपालपूजायां ध्याने विशेषः ।
वंद्यं देवैर्मुकुंदं विकसितरविमिंदीवराक्षं
गोगोपीवृंदवीतं जितरिपुनिवहं कुंदमंदारभासं ।
नीलग्रीवाग्रपिच्छाकलतस(?)विलसत्कुंतलं भानुमंतं
देवं पीतांबरं तं यजतु च दिनमध्यमे ऽह्नो रमायै ॥

इति श्रीमहामहोपाध्यायाग्निचिद्वाजपेयिनरसिंहविरचिते नित्याचारप्रदीपे चतुर्थभागकृत्यं समाप्तं ॥

The leaves are marked सिं० प्र० (*i.e.* सिंहवाजपेयीकृतप्रदीप acc. to the title given on the front and back pages).

Whatever the age of the work may be, it must be later than the middle of the 14th century, as the *Mādhavīya* is quoted at fol. 29*b*.

[H. T. Colebrooke.]

## 1800.

**800a.** Foll. 181; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; indifferent Devanāgarī writing, of the former half of the last century; eight lines in a page.

*Sadācārasaṃgraha*, a metrical treatise on the religious duties of a pious *Vaishṇava*, in nine chapters (*prakaraṇa*), largely compiled from *Purāṇas*, and here ascribed to *Bhaṭṭa Śaṅkara*, son of *Bhaṭṭa Nīlakaṇṭha*.

It begins:

श्रीमत्स्यकच्छपवराहनृसिंहकुब्ज-
रामाभिरामहलधृग्बुधकल्किरूपान् ।
एको हिताय जगतः स्थितिभंगसर्गान्
धत्ते स मामवतु वाचमलंकरोतु ॥ १ ॥

भूभारक्षपणार्थाय वैभवानां हिताय च ।
भक्तसंरक्षणार्थाय यो ऽवतीर्णो यदोः कुले ॥ २ ॥

तं नमामि परात्मानं जगन्मोहनविग्रहं ।
यस्य प्रसादलेशेन कीर्त्यते सारसंग्रहः ॥ ३ ॥

दुर्ज्ञेयत्वादनंतत्वात् दुष्प्राप्यत्वाद्विचक्षणः ।
सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥ ४ ॥

तत्र प्रथमस्कंधे शौनकवाक्यं ।
मंदस्य मंदप्रज्ञस्य वयो मंदायुषस्य च ।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ ५ ॥
ततः सप्तमस्कंधे प्रह्लादः । ०

I. *Dīkshāvidhānaprakaraṇa* ends fol. 11*a*; II. *snānādikriyāprakaraṇa*, fol. 43*b*; III. *pratimāśālagrāmalakshaṇaprakaraṇa*, fol. 58*b*; IV. *pūjāvidhāna*, fol. 95*a*; V. *śrībhāgavatamahimābhagavaddharmalakshaṇajīvasyasaṃsṛitivarṇana* fol. 113*a*; VI. *bhaktivibhāganāmamahimākīrtanavarṇana*, fol. 136*a*; VII. [*ekādaśī-*]*dvādaśīvratanirṇaya*, fol. 159*a*; VIII. *vārshikamahotsavaparvaṇi divyāvirbhāvavratavarṇana*, 170*a*. Chapter IX. (*vishṇubhaktivishayavarṇane vārshikaparvasu kriyāvidhānavarṇana*, acc. to Rāj. Mitra, Notices, I., p. 103) wants the end; a different hand having supplied (on a page pasted over the last one of the original MS.) a few lines with the (perhaps spurious) colophon: इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृते सदाचारसंग्रहनामको ग्रंथः समाप्तः ॥

In the MS. described by Dr. Rāj. Mitra, the author's name is not given.

[H. T. Colebrooke.]

## 1801.

**1746b.** Foll. 39; size 8½ in. by 4 in.; indifferent Devanāgarī writing, of about the middle of the last century; eleven lines in a page.

*Pañcasaṃskāradīpikā*, a manual of *Vaishṇava* rites of consecration (in accordance with the tenets of *Madhvācārya*), by *Vijayīndra Bhikshu*, pupil of *Surendra*.

It begins:

कल्याणगणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः ॥ १ ॥

उर्व्यां सकर्णतां याति यद्गुणाकर्णने रतः(*r.* रतिः) ।
स्वर्णवगुणरत्नानां पूर्णबोधं तमाश्रये ॥ २ ॥

यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवेत जययोगींद्रं कामयाणच्छिदं सदा ॥ ३ ॥

यो व्यासमुनिदावाग्निः सच्छास्त्रमहता सह ।
ददाह कुमतारण्यं प्रकाशये(l. शाय) तमाश्रये ॥ ४ ॥

श्रीसुरेंद्रगुरोः पादपद्मे रागस्य पीडनात् ।
रक्ते नखदलोपेते सेवे शिष्यालिशोभिते ॥ ५ ॥

मध्वसिद्धांतदुग्धांतमंडलीभवदाकृतिः ।
क्रियते विजयींद्रेण पंचसंस्कारदीपिका ॥ ६ ॥

ननु तापादयः संस्कारा [ना]नुष्ठेयाः तत्कर्तव्यतायां प्रमाणाभावात् । न तावच्छ्रुतिस्तत्र ०

The five consecratory rites are names'-giving, the burning in (? of *Vishṇu's* attributes), the application of the sectarian marks (*paṇḍra*), the initiation into the mantra, and offering.

The handwriting is not very clear, and no ends of chapters are marked.

Fol. 2*b*: रामानुजाचार्यानंदतीर्थयतिविष्णुस्वामिसंप्रदायिभिरन्यैश्च बहुभिस्तदनुष्ठानात् । ०

It ends:

तापः पुंड्रं तथा नाम मंत्रो यागश्च पंचमः ।
अमी हि पंच संस्काराः परमैकांत्यहेतवः ॥

इत्यादि पंचरात्रोक्तं तेषां भगवद्भक्तिहेतुत्वमप्युपपन्नमिति न कश्चित्क्षुद्रोपद्रवः ॥

मध्वसिद्धांतदुग्धांतमंडलीभवदाकृतिः ।
कृतेयं विजयींद्रेण पंचसंस्कारदीपिका ॥

इति श्रीविजयींद्रभिक्षुविरचिता पंचसंस्कारदीपिका समाप्ता॥

On the outer page of the last leaf the title is given: पंचसंस्कारदीपिका विजयींद्रतीर्थरामचंद्रस्य ।

[H. T. Colebrooke.]

## 1802.

**2403b.** Foll. 12; size 7½ in. by 5 in.; Bengali handwriting, of the latter part of last century; twelve lines in a page.

*Vṛindāvanapaddhati*, a brief manual of daily observances for the use of Brāhmaṇical students of the *Vaishṇava* sect, in accordance with the tenets of the followers of *Vallabhācārya*.

It begins:

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभानुजः सोऽसौ श्रीरूपो जीवसंततिः ॥

अथ श्रीवृन्दावनपद्धतिः समासव्यासयोगतः । साधको ब्राह्मे मुहूर्ते चोत्थाय रात्रिवासस्त्यक्त्वाचम्य गुरुकुलं च नत्वा श्रीराधाकृष्णयोर्नामोच्चारणपूर्वकं शौचं गत्वा शौचं विधाय जलमृत्तिकया । ०

Fol. 11*a*: श्रीश्रीमद्गोस्वामिपादानां॥ अथ क्रमदीपिकायां।०

Apparently incomplete. [R. Johnson.]

## 1803.

**785b.** Foll. 15; size 9¾ in. by 4 in.; plain Devanāgarī writing; 9 or 10 lines in a page.

[*Vishṇumūrti-*] *Pratishṭhāvidhi*, a manual for the inauguration of images of *Vishṇu* and other deities; apparently part of a larger work, called *Vaishṇavadharmānushṭhānapaddhati* (or *Nṛisiṃhaparicaryā* ?), by *Krishṇadeva*, son of *Rāmācārya*.

It begins: सुवर्णादिप्रतिमासु तु प्रतिष्ठैव भगवदाविर्भावाद्विधितः प्रतिष्ठा कर्तव्या ।

बौधायनादिसन्मूलास्त्रैविक्रम्यादिपद्धतीः ।
वीक्ष्य वक्ष्यामि विष्ण्वादिचलार्चास्थापनाविधिं ॥

तत्र प्रतिष्ठाकाल उच्यते । उदगयनं माघादिपंचसु मासेषु शुक्लपक्षे चतुर्थीषष्ठ्यष्टमीचतुर्दशीव्यतिरिक्तायां तिथौ °

इति प्राणप्रतिष्ठा fol. 7*a*; इति चलार्चाप्रतिष्ठा fol. 9*a*.

Fol. 11*a*: इति संक्षिप्तचलार्चाप्रतिष्ठाविधिः ॥ इति वैष्णवधर्मप्रतिष्ठाचार्यश्रीरामाचार्यवर्यसुतकृष्णदेववि[र]चितायां वैष्णवधर्मानुष्ठानपद्धतौ नृसिंहपरिचर्यायां नवमः पटलः ॥ प्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छंदांसि क्रियामयवपुःप्राणाख्यदेवता । प्राणप्रतिष्ठायां विनियोगः °

Fol. 12*b*: इति प्राणप्रतिष्ठाविधिः समाप्तः । अथास्यानुक्रमणिका । ° seven *ślokas*, enumerating the sixteen purificatory actions (*saṃskārāḥ*) required on these occasions, ending:

नवमूर्त्तिप्रतिष्ठायां संस्काराः षोडशोदिताः ।
अनेन विधिना कुर्वन्नभते भक्तिमुत्तमाम् ॥

श्रीविष्णुभट्टात्मजरुद्रेण लिखितं ॥

The last four leaves, which are paged separately, are headed (though in a different hand) *Vishṇumūrttinyāsapratishṭhādharma*, beginning: अथ षोडश न्यासान्कुर्यात् ॥ ओं ब्रह्मरूपमकारं पादयोर्न्यसेत् । ओं विष्णुरूपमुकारं हृदये । ओं रुद्ररूपं मकारं ललाटे । ओं भूः पादयोः । ओं भुवो हृदये । ओं स्वः ललाटे । ओं अ तालुके । ओं आ मुखे । ओं इ ई नेत्रयोः । ओं उ ऊ कर्णयोः । etc., a great variety of symbols (such as planets, months, *yugas*, castes, rivers, clouds, etc.) brought in connection with particular limbs; प्राणप्रतिष्ठापूर्वकर्मंगन्यासः । ततो जीवन्यासः ° fol. 3*b*.

Fol. 4*b*: इति विष्णुमूर्त्तिप्रतिष्ठाविधिः समाप्तः ॥

एवं न्यासक्रमो यस्तु न जानाति नराधमः ।
आचार्यो न स मंतव्यो नियाह्यस्तस्करो यथा ॥

रात्रौ भूतबलिं दद्यात् । ° चतुर्भिः कलशैर्देवं शतवारमभिषिच्य भुवा द्यौरिति मंत्रेण तस्यां प्रतिमायां ॥ इति न्यासविधिः ॥ इति श्रीविष्णुभट्टात्मजरुद्रभट्टेन श्रीविष्णुमूर्त्तिप्रतिष्ठा परोपकारार्थं लिखिता ॥ संवत् १६७५ ॥

[H. T. Colebrooke.]

## 1804.

**1747.** Foll. 56; size $8\frac{1}{2}$ in. by $3\frac{3}{4}$ in.; fairly good, modern Devanāgarī writing; seven lines in a page.

*Śālagrāmaparīkshā*, a treatise on *Śālagrāma* stones, describing their colour, shape and properties, and the places where they are found; by *Śaṅkura Daivajña*.

It begins:

नमस्कृत्य हरिं वंदे विश्वव्यापिनमीश्वरं ।
शालग्रामपरीक्षेयं प्रवक्ष्महे समासतः ॥ १ ॥

धर्मसंहितायां ।

हिरण्यगर्भो भगवानाद्यो नारायणः स्वयं ।
वज्रकीटप्रभुत्वात्स चचार वसुधातले ॥ २ ॥

The sacred stones are classified, according to the number of *cakras* they present, from one to twelve, then those which have more (*bahucakramūrti*), and finally those which have none at all (*acakramūrti*). The name is usually misspelt सालिग्राम.

Fol. 50*b*: इति एकचक्रमूर्त्तिवर्गः ।

एवं निरूपिते वर्गे लक्षणं हि यथा तथा ।
विचार्य यद्बुधैः सम्यक् क्षम्यतां मम साहसं ॥

इति शंकरदैवज्ञविरचिता शालग्राममूर्त्तिलक्षणपद्धतिः समाप्ता॥

Then follows another chapter, containing a sort of recapitulation of the first, beginning:

श्रीकृष्णगोपिकानाथं प्रणम्य जगतां प्रभुं ।
ग्रंथान्बहून्समालोच्य गृह्यते ऽत्र क्वचित् क्वचित् ॥

विष्णुना गरुडायोक्तं ।

शालग्रामशिलाभेदं ग्राह्याग्राह्यफलं तथा ।
द्वारमानं तथा(? तथा) क्षेत्रं मूर्तीनां लक्षणं ततः ॥

It ends:

श्रीवत्सलाञ्छनोपेतो मालया परिवेष्टितः ।
अंकुशध्वजसंयुक्तो लक्ष्मीनारायणो हरिः ॥

इति सालिग्रामपरीक्षा समाप्ता ॥

कामासक्तो ऽथवाक्रुद्धः सालिग्रामशिलार्चनात् ।
भक्त्या वा यदि वाभक्त्या कलौ मुक्तिमवाप्नुयात् ॥

शिलाप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत् ।
यथा यथा शिला सूक्ष्मा तथा स्यात्तु महत्फलं ।
तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये ॥

[H. T. Colebrooke.]

## 1805.

**947b.** Foll. 6; size $11\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; clear Devanāgarī writing; nine lines in a page.

*Śālagrāmaśilādānapaddhati,* a short treatise, by *Bābā Deva* (?), on the different kinds of *Śālagrām* stones, and the ceremonies connected with their presentation to worshippers of *Vishṇu.*

It begins: श्रीरामो जयति जगत्त्रयैकहेतुः॥ अथ शालग्रामलक्षणं॥

द्वारमेकं चतुश्चक्रं वनमालाविभूषितं।
सुवर्णतालुं कृष्णाभं लक्ष्मीनारायणं विदुः॥ १॥

नानावर्णमनंतं च नागभोगेन चिह्नितं।
अनेकमूर्तिसंकीर्णं सर्वकामफलप्रदं॥ २॥

वर्तुलं वलयाकारं स्वर्णबिंदुविभूषितं।
तूणगांडीयमाश्रित्य श्रीरामसंज्ञकः(?°कं) परं॥ ३॥

चक्रं च दृश्यते यत्र बाणतूणधनुर्धरः।
कौशल्यानंदनो रामस्तृतीयः परिकीर्तितः॥ ४॥

वैकुंठं स्वर्णपूर्णाभं चक्रमेकं तथाबुजं।
द्वारोपरि तथा रेखा गुंजाकारा सुशोभना॥ ५॥

श्रीधरं च तथा देवं वेष्टितं वनमालया।
कदंबकुसुमाकारं रेखापंचसमन्वितं॥ ६॥

° ३४॥ इति शालग्रामचक्रलक्षणं। fol. 3*a*; इति श्रीभविष्योत्तरपुराणे गंडकीशिलामाहात्म्ये श्रीकृष्णयुधिष्ठिरसंवादे शालग्रामस्तोत्रं संपूर्णं fol. 4*b*.

Fol. 5*a*: अथ शालग्रामदानं मदनरत्ने हरिवंशे॥

चतुःसागरपर्यंता सशैलवनकानना।
दत्त्वा यत्फलमाप्नोति शालग्रामात्तदश्नुते॥

शालग्रामशिलादानमतिदानं प्रकीर्तितं।
शालग्रामं तथा लिंगं यो ददाति कुरूद्वह।
मम लोकमवाप्नोति शिवदानप्रदानतः॥

पाद्मे। शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमं। °

इति शालग्रामदानविधिः॥ अथ प्रयोगः। fol. 5*b*.

Colophon: इति बाबादेवीया शालग्रामशिलादानपद्धतिः समाप्ता॥ संवत् १८५८ समयनाममार्गशीर्षकृष्ण अष्टम्यां ८ सनिवासरे॥

[H. T. Colebrooke.]

## 1806.

**1997.** Foll. 65 + 9; size $8\frac{1}{2}$ in. by 4 in.; fair Devanāgarī writing (Europ. paper marked '*Giormagnani*'); nine lines in a page.

*Mānasapūjā* (or *Gaṇeśapūjā*), consisting of directions for private devotional practices, esp. relating to the worship of *Gaṇeśa*, with extracts from various *Purāṇas* bearing thereon.

It begins: श्रीमन्महागणपतये हरिहरात्मकाय सिद्धिबुद्धिसहिताय गुरुभ्यो नमः॥

सुमुखश्चैकदंतश्च कपिलो गजकर्णकः।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥

विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥

श्रीकृष्ण उवाच॥

एवं जीवं समुत्पन्नं ध्यायेत पुरुषोत्तमं।
अनंतादित्यसंकाशं वासुदेवं चतुर्भुजं॥ १॥ ° ११॥

इति श्रीवामनपुराणे कृष्णयुधिष्ठिरसंवादे मानसस्नानस्तोत्रं संपूर्णं fol. 2*b*; इति श्रीगणेशपुराणे श्रीकृष्णनारदसंवादे गणेशकवचं समाप्तं fol. 5*b*.

From fol. 7*b* directions for daily devotional practices: प्रातरुत्थाय त्वदमितोदारनामस्मृत्यनंतरं। नानास्वरूपधरं त्वामेव नमामि।

सर्वाज्ञानतमोभेदभानवे चित्स्वरूपिणे।
प्रातर्नमस्ते भगवन् विष्णुब्रह्मस्वरूपिणे॥ ° 27 *ślokas.*

इति प्रातःस्मरणं विधाय सूर्योदयात्प्राक् घटिकात्रकाशमवलंब्य गंगातीरमागत्यैकांतस्थानगमनोत्तरं मुखप्रक्षालनं विधाय स्वस्थमानसो भूत्वा यथाविधि।

ईशानेत्यादिमंत्रेण भस्मस्नानोत्तरं तथा।
गोमयस्नानमित्युक्तं गंधद्वारमनेन तु॥ °

इत्याचमनं 11*b*; इति पयःस्नानं। ° दधिस्नानं। ° घृतस्नानं 12*a*; इति मधुपर्कं 13*a*, etc.

इति श्रीभागवते दशमस्कंधे देवस्तुतिर्नाम सप्ततितमोऽध्यायः 39*a*; इति श्रीपद्मपुराणे गणपतिसहस्रनामस्तोत्रं 54*b*; इति गणेशस्तोत्रं 58*b*; इति गणेशाथर्वशीर्षस्तोत्रं 60*b*; this portion ends with another extract from some unspecified work.

The last section, separately paged (1–9), entitled *Mānasapūjā*, begins:

श्रीमत्कामाभिरामं सकलकविकलाकल्पवृक्षालवाली-
भूतं दूक्पाततापत्रितयततितमिश्रापहंतृप्रतापं ।
सिद्धिश्रीसिद्धिबुद्धिप्रदमरुणरुचिं चित्सु कं संवहंतं
ध्यात्वं चंद्रार्धचूडं सकलसुरनुतं भावये श्रीगणेशं ॥ १ ॥

सुरत्नालिभूमौल्लसद्गाढुर्दई ० ॥ २ ॥

हे भगवन् त्वत्कृपातो मद्दृष्टौ ० ॥ ३ ॥ ० ८ ॥

सुगमोपायभूतं पूजनं यदुक्तं तदेव वर्ण्यते । ०

It ends:

भक्तार्तिभीतिगाढाध्वध्वंसमार्तिंड ते पदं ।
प्रपन्नो ऽस्मि भवारण्यभीतस्त्वं त्रातुमर्हसि ॥

मानसपूजा समाप्ता ॥ then follow two stanzas: श्रीमत्पङ्कजास्यपदसारसभृंगचेताः ० ॥ १ ॥ स्वप्नायभासममलं स्तवराजमेनं ० ॥ २ ॥

[Dr. John Taylor.]

## 1807

**819A.** Foll. 83; size 15¾ in. by 5 in.; indifferent Bengali handwriting; 8 or 9 lines in a page.

*Gaṅgāvākyāvalī*, a treatise on the religious advantages of worshipping the river Ganges, of visiting it, and bathing therein etc., composed by *Vidyāpati*, under the patronage of *Viśvāsadevī*.

It begins:

स्वस्त्यस्तु वस्तुहिनरश्मिभृतः प्रसादाद्
एकं वपुः श्रितवतो हरिणा समेत्य ।
तत्राभिपङ्कजसहोत्थमृणाललीलाम्
आविष्करोति हृदि यस्य भुजङ्गराजः ॥

It ends:

कियच्चिवन्धमालोक्य श्रीविद्यापतिसूरिणा ।
गङ्गावाक्यावली देव्याः प्रमाणैर्विमलीकृता ॥

इति समस्तप्रक्रियाविराजमानदानदलितकल्पलताभिमानभवभक्तिभावितबहुमानमहामहादेवीश्रीमद्विश्वासदेवीविरचिता गङ्गावाक्यावली समाप्ता ॥ शकाब्दाः १७२९ ॥

Regarding the author, see Rāj. Mitra, Notices, III., p. 235. See also Aufrecht, Cat. Bodl., no. 708.

[H. T. Colebrooke.]

## 1808.

**1059.** Foll. 12; size 14¾ in. by 3¼ in.; folded to half the length; written in the Bengali character, about the end of the 16th century; 11 or 12 lines in a page.

*Praṇavakalpa*, a treatise on the nature and mystic import of the sacred syllable *Om*, ascribed to *Śaunaka*; with a commentary, by *Hemādri* (?from the *Caturvargacintāmaṇi*).

It begins: तत्र प्रणवप्रशंसा शौनकः ।

ओमिति ब्रह्मोमितीदमोमित्युत्तरीयमक्षरं ।
प्रणवो हि परं ब्रह्म प्रणवश्चापरं स्मृतं ॥
एतनैकतरं विद्वानुपासीनः प्रपद्यते ।

तथा च तैत्तिरीयश्रुतिः । ओमिति ब्रह्म ओमितीदं सर्वं ओमित्येतदनुकृतिर्ह स्म वा अप्योश्रावयेत्याश्रावयन्तीत्यादि । यद्ब्रह्म जगज्जन्मादिकर्ता स ओमिति शब्द एव न ततो भिद्यत इत्यर्थः । तथा इदं सर्वं विकारजातं ओंकार एव नान्यदित्यर्थः । तथा माण्डूक्योपनिषदि श्रूयते । ० — — ॥ तथा च शौनकः ।

अतः परं प्रवक्ष्यामि प्रणवमात्रयात्मतां ।
त्रैविध्यं यद्विदित्वैव मोक्षमृच्छन्ति योगिनः ॥
त्र्यक्षरस्त्रिस्वरश्चैव त्रिमात्रश्च त्रिवर्णकः ।
त्रिस्थानश्च त्र्यवस्थश्च त्रिब्रह्मा त्रिमुखस्तथा ॥ ०

It ends:

अर्चनोपचारभूतहोमस्य संख्याविशेषमाह ।
अष्टाविंशतिमष्टौ वा हुत्वा पापात्प्रमुच्यते ।

अहन्यहनि देवार्चनसमये दध्यादीनामन्यतमेन अष्टाविंशतिमष्टौ वा आहुतीर्हुत्वा पापात्प्रमुच्यते ० एवं निष्कामस्य जपार्चनध्यानसमाधीन् कृत्वा फलमाह ।

क्रमेण नित्याभ्यासादधिकारीह मोक्षे ॥

एवं हि । नित्यं जपादेरभ्यासात्क्रमेण शनैः शनैः आत्यन्तिककाले विद्याकर्मबन्धध्वंसलक्षणे मोक्षे ऽधिकारीश्वरो भवति ॥ इति शौनकीयप्रणवकल्पः हेमाद्रिणा व्याख्यातः ॥

[H. T. Colebrooke.]